vol 5 old series

pts 1—2 252 A

LIBRARY
FEB 1 4 1973
UNIVERSITY OF TORONTO

Z
6605
S3 N5
v. 5

25

VOLUME V.—PART I. No. XIV.

NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

For the year 1878.

CALCUTTA:

PRINTED BY G. H. ROUSE, AT THE BAPTIST MISSION PRESS,

AND PUBLISHED AT THE

ASIATIC SOCIETY'S ROOMS, 57, PARK STREET.

1879.

LIBRARY
OCT 4 - 1972
UNIVERSITY OF TORONTO

NOTICES OF SANSKRIT MSS.

No. 1723. सत्योपाख्यानं ।

Substance, country-made paper, 15 × 6 inches. Folia, 120. Lines, 7 on a page. Extent, 2,551 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshidábád. Bábu Jagannáthaprasáda Gupta. Appearance, old. Verse. Incorrect.

Satyopákhyána.—The history of Ráma illustrated with a variety of anecdotes and stories not to be met with in the Rámáyaṇa. It professes to have been originally imparted by Válmíkí to Márkaṇḍeya, who related it to Vyása, and Vyása to Súta, who recounts it to the Ṛishis assembled at the Naimiha forest. This account shows that the work is a part of some Puráṇa or other; but which Puráṇa it is cannot be identified. The codex under notice contains chapters 1 to 49 of the work. A second volume, purchased for the Government of India, (*ante* II, No. 714, p. 129), contains chapters 50 to 79; but as that stops with the arrival of Ráma at the capital of Guhaka, it is probable there are at least a hundred chapters yet to be found out to complete the work.

Beginning. श्रीमते भगवते निम्बार्काय नमः ।

दशरथसुतरामं योग+याज्ञिपद्मजशिवसनकाद्यैः पूज्यमानं सदैव ।
हृदि हृदि कृतवासं रामनामाख्यदेवं तमहमखिलसेव्यं सर्व+ +नतोऽस्मि ॥
सूतं सर्व्वपुराणज्ञं सर्व्वशास्त्रार्थकोविदं ।
नमस्कृत्याब्रुवन् सर्व्वे ऋषयः शौनकादयः ॥
ऋषय ऊचुः । सूत सूत महाबुद्धे सर्व्वशास्त्रविशारद ।
श्रीरामस्य कथां दिव्यां कथयस्व प्रसादतः ॥
सूत उवाच । विप्रवर्य्याः शृणुध्वं हि श्रीरामस्य कथां शुभां ।
व्यासेन कथितां पूर्व्वं तामहं कथयामि वः ॥

चित्रकूटं महापुण्यं पर्व्वतानां हि सुन्दरं।
वाल्मीकिश्च महातेजा न्यवसद्धर्म्मतत्परः॥
दर्शनार्थं मुनेस्तस्य मार्कण्डेयो महामुनिः।
आजगाम चिरायुर्हि चित्रकूटालयं मुनिं॥

End. किं मया बहुधा वाच्यं सर्व्वपुण्यफलन्त्विदं।
व्यासप्रसादाज्जानामि श्रीरामकृपया तथा॥
इतः परं महारम्यं विवाहचरितं शुभं।
वर्णयामि महापुण्यं श्रोतृणामघमोचनं॥

Colophon. इति श्रीसत्योपाख्याने सूतशौनकसंवादे एकोनपञ्चाशत्तमोऽध्यायः।
समाप्तञ्चेदं पूर्व्वार्द्धं।

विषयः। १-१० अध्याये,—सूतेन सह शौनकादीनां संवादकथनं। वाल्मीकिसन्दर्शनार्थं मार्कण्डेयस्य चित्रकूटगमनविवरणं। तत्पुरतो वाल्मीकिना रामचरित्रवर्णनं। रामस्य बाललीलावर्णनव्याजेन सपुत्राभिः कौशल्यादिभिः अन्तःपुरागतस्य वसिष्ठस्य सपर्य्याविधानादिकथनं। श्रीरामलक्ष्मणादीनां विष्णुशेषादिरूपेण कौशल्यादिभिः स्वप्नदर्शनवृत्तान्तकीर्त्तनञ्च। एकदा कौशल्याधात्रिकायाः कैकेयीमन्दिरगतस्य दशरथस्य समीपे रामानयनवृत्तान्तकीर्त्तनं। कैकेय्या रामाभिनन्दनादिप्रकारकथनञ्च। मन्थरया सह कैकेय्याः संवादकथनं। तत्र विस्तरेण कैकेय्या विवाहवृत्तान्तकथनं। दशरथस्य सत्यपि अन्तःपुरवर्गे तस्यां नितरामनुरागकारणकथनञ्च। नारदेन सह दशरथस्य संवादकथनं।

११-२६ अध्याये,—योगिन्या सह केकयराजमहिष्याः संवादकथनं। गर्गेण सह दशरथस्य संवादकीर्त्तनं। तत्र अजातपुत्रेण दशरथेन कैकेय्याश्चेत् पुत्रो भविष्यति तस्मै राज्यं दास्यामीति प्रतिज्ञाकरणवृत्तान्तकथनं। शत्रुघ्नादिभिः कन्दुकेन ताड़िताया: मन्थराया अभियोगार्थं दशरथसमीपगमने रहश्रवणादिकं। लोमशोक्तमन्थराचरितकीर्त्तनं। तस्याः पूर्व्वजन्मनि विरोचनाभिधानस्य दैत्यराज्यस्य कन्यात्वकथनादिकं। तया विप्रहतानां क्रतुभुजां दुरवस्थादिवर्णनञ्च। पराशरस्य वाल्मीकितो रामचरितपाठकथनं। दशरथाङ्कस्थितस्य रामस्य विस्तरतो रूपवर्णनं। तीर्थदर्शनार्थं सर्व्वेषां देवानां भारतभूमावागमनवृत्तान्तकीर्त्तनं। तत्र पौलोम्याः पुरतः पुरन्दरेण तद्वृत्तान्तकथनञ्च।

२२-३७ अध्याये,—सावित्र्याः पुरतो विधातुरयोध्यादिमाहात्म्यकथनं। तत्र तत्र वृत्तान्तकथनञ्च। विशेषेण अयोध्यायाः शोभादिवर्णनं। श्रीरामसन्दर्शनार्थं ब्रह्मादीनां दशरथपुरप्रवेशवृत्तान्तकीर्त्तनं। रामस्य विचित्रबाल्यक्रीड़ादिवर्णनं। रामहस्तात्

शष्कुलीमाकर्षयतो भूसुण्डनामकस्य काकस्य वृत्तान्तकीर्त्तनं। भूसुण्डकृतरामस्तोत्र-कीर्त्तनं। दशरथस्य अन्तःपुरे विश्वावसुनामकस्य गन्धर्व्वराजस्य सङ्गीतालापेन मोहितानां रामचन्द्रादीनां चेष्टादिवर्णनं। कैकेय्या आदेशेन शरसन्धानपूर्व्वकं दशरथेन इन्द्रसदसि विश्वावसुचेष्टितप्रकाशकपत्रेण सह वाणनिक्षेपादिविवरणं। गन्धर्व्वकृतमोहनादिना दशरथादीनां भ्रान्तिवर्णनं।

३८–४९ अध्याये,—रत्नकलाया वृत्तान्तकीर्त्तनं। रत्नकलावीरसिंहयोः वसिष्ठाश्रम-प्रवेशविवरणकथनं। वसिष्ठस्योपदेशेन तयोः कलायनामकग्रामगमनानन्तरं तत्र तपस्यादिवर्णनं। तयोः यशोदानन्दरूपेण गोकुले जन्म भावीति कथनञ्च। राम-नवमीव्रतमाहात्म्यकीर्त्तनं। अगस्त्याश्रमवर्णनं। तस्य तपस्यानुष्ठानप्रकारकथनञ्च। अगस्त्योक्तरामनवमीव्रतानुष्ठानप्रकारकीर्त्तनं। तत्र मरुकान्तारदेशस्थानां पञ्चपापि-नामुपाख्यानकथनं। विस्तरतः रामस्य पौगण्डलीलावर्णनं। दशरथकृतशरव्यष्टक-स्तोत्रकीर्त्तनं। दशरथस्य पुरतः शरव्या निजजन्मवृत्तान्तकथनं। चारुचन्द्र-शत्रुनाश-सुकण्ठ-विजयप्रभृतिरामचन्द्रवयस्यकथनं। रामचन्द्रादीनां कन्दुकक्रीड़ादिवर्णनं। तेषां धनुर्विद्यादिशिक्षाकथनं। कैशोरलीलावर्णनञ्च। नाविकस्य प्रार्थनया रामा-दीनां मद्विषहननार्थं प्रयाणवृत्तान्तकथनं। त्यक्तमाद्विषरूपस्य विल्वाभिधानस्य गन्धर्व्वराजस्य रामस्तोत्रकीर्त्तनं। एकदा मृगयार्थं गहनमध्ये प्रविष्टस्य रामस्य करस्पर्शमात्रेण वल्मीकदेहं परित्यज्य डिण्डिरनामकस्य किरातस्य आत्मवृत्तान्तकथनं-गुहेन सह रामस्य सखित्वसंस्थापनादिविवरणकथनं। वनशोभावर्णनं। रामवय-स्येन विदूषकेण वसन्तवर्णनकीर्त्तनं। रामचन्द्रादिकृतवसन्तोत्सववर्णनं। भरतकृत-सिंहहननवृत्तान्तकथनं। सिंहस्य पूर्व्ववृत्तान्तकीर्त्तनं। ऋष्यशृङ्गाद्याश्रमगमनविवरण-कीर्त्तनञ्च।

No. 1724. तैत्तिरीयश्रुतिवार्त्तिकं।

Substance, country-made paper, 11 × 5 inches. Folia, 46. Lines, 10 on a page. Extent, 1,057 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, old. Verse. Correct.

Taittiríya-s'ruti vártika.—A dissertation on the theology and philosophy of the Taittiríya Upanishad. By Sures'a Ácharya. The work belongs to the Vedánta School of Philosophy. The author's name is incorrectly given in the codex; it should be Sures'vara Ácharya.

Beginning. ॐ नमो गणेशाय ।

सत्यं ज्ञानमनन्तमेकसकलं ध्वस्तान्धकारं परं
निर्द्वैतं हृदि पद्ममध्यनिलयं निःशेषधीसाक्षिणं ।
वेदान्तोपनिविष्टबोधविषयं प्र+ज्ञया योगिनां
भक्त्या तं प्रणिपत्य वेदशिरसो वक्ष्यामि सद्वार्त्तिकं ॥
यस्येयं सकलामलेन्दुकिरणप्रख्यैर्यशोरश्मिभि-
र्व्याप्तं यस्य कृपालुता-परवशस्यक्ते हितं दुःखिनां ।
यद्वाणीकुलिशावरु+मतयः पेतुर्द्दिशस्तार्क्किका
भक्त्या पूज्यतमं प्रणम्य तमहं तद्भाष्यनीतो यते ॥
तैत्तिरीयकसारस्य मयाचार्य्यप्रसादतः ।
विस्पष्टार्थं रुचीनां हि व्याख्येयं सम्प्रणीयते ॥ इत्यादि ।

End. तैत्तिरीयकसारस्य वार्त्तिकामृतमुत्तमं ।
मस्करीन्द्रप्रणीतस्य भाष्यस्यैतद्विवेचनं ॥
मुमुक्षुसार्थवाहस्य भवनामभृतो यतेः ।
शिष्यश्चकार तद्भक्त्या सुरेशाख्यो महार्थवित् ॥

Colophon. इति श्रीसुरेशाचार्य्यविरचितं तैत्तिरीयकश्रुतेर्वार्त्तिकं समाप्तं ।

विषयः । पद्येन तैत्तिरीयकोपनिषदो व्याख्यानं ।

No. 1725. प्रपन्नदिनचर्य्या ।

Substance, country-made paper, $12\frac{1}{2} \times 5$ inches. Folia, 6. Lines, 9 on a page. Extent, 111 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshídábád, Bábu Jagannáthaprasáda Gupta. Appearance, fresh. Prose. Correct

Prapannadina-charyá.—A manual of the daily religious duties of the Vaishṇavas of the Rámánuja School. Anonymous.

Beginning. श्रीमते रामानुजाय नमः ।

श्रीशापारकृपापात्रप्रपन्नजनसम्मता ।
दिनचर्य्या विशेषज्ञैरुपभोग्या विरच्यते ॥

अथास्यां लीलाविभूत्यां प्रपन्नश्रीवैष्णवो निरन्तराचार्य्याभिमानविरतः कैङ्कर्य्य-
त्वरातिशयेन अपरयामे समुत्थाय गुरुपरम्परापूर्व्वकमित्यादि ।

End. अथ लक्ष्मीनाथसमारम्भामित्युक्तश्लोक एव प्रमाणीक्रियते। इति ।

Colophon. इति प्रपन्नदिनचर्य्या समाप्ता ।

विषयः । रामानुजसम्प्रदायवैष्णवानां दैनिकोपासनादिप्रकारकथनं ।

No. 1726. त्रिकाण्डचिन्तामणिः ।

Substance, country-made paper, 13½ × 5 inches. Folia, 250. Lines, 10 on a page. Extent, 8,092 s'lokas. Character, Bengali. Date, Sk. 1742. Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, new. Prose. Correct.

Trikáṇḍa-chintámaṇi.—Annotations on the *Trikáṇḍa-sésha* lexicon of Amara Siñha. By Raghunátha Chakravartí, of the village of S'rímantasára.

Beginning. नत्वा गिरीशचरणाम्बुजमाकलय्य तन्त्राणि तन्त्रविदुषां रघुनाथनामा ।
श्रीकृष्णवल्लभसदामतिसन्नियोगाद्दीरस्तनोति विमलामरकोषटीकां ॥
याचे विधाय विनयं कृतिनोऽहमेतद्दुष्यं मया यदिह शास्त्रविरुद्धमुक्तं ।
आलोक्य सम्यगवधानपरैः कृतज्ञैर्मात्सर्य्यमत्र कृपया परिहेयमेव ॥
ग्रन्थारम्भे निखिलविघ्नविघाताय अभिमतदेवतानमस्कारेण धर्म्ममुत्पादयन् शैव-
वैष्णवबौद्धान् प्रवर्त्तयितुं शिष्यशिक्षायै चादौ निबध्नाति। यस्येति ।

End. स्वयमेव काम इत्यादिप्रयोगाच्च । पुंस्त्वमित्यादिकमूह्यं ।
मतं गुरूणां प्रविचार्य्य यत्नादालोक्य तन्त्राणि च कोविदानां ।
सतां मुदे श्रीरघुनाथशर्म्मा त्रिकाण्डचिन्तामणिमाततान ॥

Colophon. इति श्रीसामन्तसारग्रामनिवासिश्रीरघुनाथचक्रवर्त्तिकृतत्रिकाण्डचिन्तामणावमर-
कोषटीप्पन्यां लिङ्गादिसङ्ग्रहवर्गविवरणं। समाप्तश्चेदं पुस्तकं। शकाब्दाः १७४२।

विषयः । अमरकोषव्याख्यानं। तत्र निखिलकोषशास्त्रसंवादेन अपूर्व्वेयं निर्म्मिता टीका ।

No. 1727. सोमकर्म्मप्रदीपिका ।

Substance, country-made paper, 10 × 4 inches. Folia, 156. Lines, 7 on a page. Extent, 2,509 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, very old. Prose. Correct.

Somakarma-pradípiká.—A guide to the performance of sacrifices with the Soma beverage. By Ráma.

Beginning. श्रीगणेशाय नमः। सत्याजोऽग्निचितो नत्वा विद्याकरगुरोः पदे ।
रामः पद्धतिमाधत्ते सोमकर्म्मप्रदीपिकाम् ॥
तत्र दर्शपौर्णमासाविष्ट्वा वसन्ते सोमेन यजेत। अथ वोपक्लृप्तसोमो द्विपुरुष-सोमपीथी, आधानसमनन्तरमेव सोमेन यजेत। अद्विपुरुषसोमपीथी अनुप-क्लृप्तसोमो वा आधाय दर्शपौर्णमासपूर्व्वकं यजेत। इत्यादि ।

End. स प्रैषं वाचयति नमो वरुणाय पाश इति प्रथमं सूत्रावभृथा प्राग्वत् ++++ तिष्ठतामे+ सर्व्वेषां । अवभृथेष्ट्या तिष्ठन्तमरन्++त्याश्वलायनवचनात्। तत्र गार्हपत्यं स्थापयेदिति शम्। ग्रन्थसङ्ख्याः २८०० ।

विषयः । सोमयागप्रयोगकथनं ।

No. 1728. एकाहानां पद्धतिः ।

Substance, country-made paper, 10 × 4½ inches. Folia, 10. Lines, 10 on a page. Extent, 1,168 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, very old. Prose. Correct.

Ekáhánám Paddhati.—A manual for the performance of ephemeral or Ekáha rites. Anonymous.

Beginning. ॐ नमो गणेशाय। अथैकाहानां पद्धतिर्लिख्यते। तत्र उदयने पूर्व्वपक्षे पुण्याहे प्रतिपदि वा शोभने नक्षत्रे अनुकूले चन्द्रे वा एकाहा दीक्षा भवन्ति। तेषा-मनादेशे एका दीक्षा तिस्रो वा चतस्रो वा द्वादशो वा अपरिमिता वा दीक्षा भवन्ति तिस्र उपसदः। इत्यादि।

End. राजपुरोहितौ सायुज्यकामौ यजेयातां। पुरोधाः कामो वा ब्राह्मण इति। इतीन्द्राग्नोः स्तोमः॥ इतः खण्डितं। परिशेषे द्वे पत्रे न स्तः।

विषयः। तत्र प्रथमतः, भूर्नामकस्य एकाहयागस्य सङ्क्षेपेण प्रयोगकथनं। एवं ज्योतिः। गौः। आयुः। अभिजित्। विश्वजित्। सर्व्वजित्। ज्योतिः। सर्व्वज्योतिः। विश्वज्योतिः। त्रिराचसम्मितः। अनुक्तिः। विश्वजिच्छिल्पः। श्येनः। एकत्रिकः। चतुःषोड़शी। षट्षोड़शी। द्विषोड़शी। ऊर्द्ध्वस्तोमः। अग्निष्टुत्। इन्द्रस्तुत्। सूर्य्यस्तुत्। वैश्वदेवस्तुत्। इषुयज्ञः। बृहस्पतिसवः। इषुः। सर्व्वस्वारः। सर्व्वस्तोमः। चतुश्चत्वारिंशत्स्तोमः। अष्टचत्वारिंशत्स्तोमः। वाचस्तोमः। त्रिवृत्। पञ्चदशः। सप्तदशः। एकविंशः। त्रिणवः। त्रयस्त्रिंशः। वैश्वदेवोऽग्निष्टोमः। वरुणप्रघासः। अग्निष्टोमः। शाकमेधः। अतिरात्रः। ज्योतिःष्टोमः। अतिकर्म्मसोमाः। अग्न्याधेयसोमः। पुनराधेयसोमः। अग्निहोत्रः। इन्द्राग्निष्टोमः। इतः खण्डितं।

No. 1729. सूर्य्यानुवादिनी।

Substance, country-made paper, 11 × 4 inches. Folia, 50. Lines, 6 on a page. Extent, 845 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zílá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, old. Prose. Correct.

Súryánuvádiní.—A commentary on Mayura Bhaṭṭa's hymn to Súrya in a hundred stanzas. By Vallabha.

Beginning. नत्वा वागीश्वरीं देवीं बालानां बोधसिद्धये।
सूर्य्यानुवादिनी टीका वल्लभेन विरच्यते॥
जम्भारातीति। भूयासुः। भवेयुः। के किरणाः। कस्यै विभूत्यै। इत्यादि।

End. ईदृग्गुणविशिष्टः स निर्णीयते। कैरपि पण्डितैरपि स दशशताभीषुरभ्यर्थितं। दिशतु। इति।

Colophon. इति श्रीपण्डितवल्लभेन विरचिता सूर्य्यानुवादिनी सूर्य्यशतकटीका समाप्ता।

विषयः। मयूरभट्टकृतसूर्य्यशतकस्य व्याख्यानं।

No. 1730. बुधरञ्जनी ।

Substance, country-made yellow paper, 13 × 5 inches. Folia, 35. Lines, 6 on a page. Extent, 841 s'lokas. Character, Bengali. Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bâbu Jagannáthaprasáda Gupta. Appearance, fresh. Prose. Correct.

Budharañjaní.—Annotations on the difficult passages in the 10th book of the Bhágavata Puráṇa. By Vasudeva. The work is not commonly known.

Beginning. नत्वा कृष्णपदद्वन्द्वं वासुदेवेन यत्नतः ।
क्रियते दशमस्कन्धटीकेयं बुधरञ्जनी ॥
कृष्णावतारचरितश्रवणामृतनिर्म्मितः ।
उक्तानुवादेनौत्सुक्याद्राजा पृच्छति तत् पुनः ॥
यद्यपि नवमस्कन्धे सूर्य्यवंशवर्णनानन्तरं सोमवंशवर्णनं, तथापि सोमवंशे श्रीकृष्णावतारात् तस्य प्रधानत्वात् प्रथमत उपन्यासः । अभ्यर्हितत्वात् प्राग्भावो वेति । उत्तरवंश्यानामिति पाठे सूर्य्यवंश्याः पूर्व्वाः सोमवंश्याश्च उत्तराः । तथा च सूर्य्यवंश्यानां श्रीरामाद्यवताराणां चरितं कथितं सोमवंश्यानां कथयेति । यदोः स्वधर्म्मशीलस्य यदोश्च धर्म्मशीलस्य इति पाठः । तत्रांशेनावतीर्णस्य विष्णोर्वीर्य्याणि शंसनः । ननु कृष्णस्तु भगवान् स्वयमित्युक्तत्वात् कथमंशेनेति सङ्गच्छते । अत्र स्वामी, प्रतीत्यभिप्रायेणेति । केचित्तु प्रतीतिः ख्यातिः । पुराणान्तरेषु अंशावतारश्रवणात् । परीक्षितः प्रतीत्यभिप्रायेणेत्यर्थः । तथा च शौनकं प्रति सूतस्य कथनं । कृष्णस्तु भगवान् स्वयं । न तु परीक्षितं प्रति शुकस्य वचनं । तन्न । प्रथमस्कन्धावधि शुकमुखात् परीक्षितश्रवणात् । अत्र गुरवः । हे अंशेन प्रधान इति शुकसम्बोधनं । इत्यादि ।

End. स्वामी तु अमृतत्वे हेतुः । गदाभृतः पीतशेषं । तथा च जन्मकाले श्रीकृष्णेन पीतमिति भावः । तथा च वामनपुराणे । माच्चापि बालकं सुप्तं पर्य्यङ्के स्तनपायिनं । इति श्रवणात् ।

Colophon. इति एकाशीतितमोऽध्यायः ।

विषयः । श्रीमद्भागवतदशमस्कन्धस्य विषमस्थलीयव्याख्यानं ।

No. 1731. प्रपन्नामृतं वा रामानुजचरित्रं ।

Substance, country-made paper, 13 × 4 inches. Folia, 290. Lines, 7 on a page. Extent, 5,752 s'lokas. Character, Nágara. Date, Sm. 1861. Place of deposit, Jápharagañja Baḍa A'khḍá, Zíla Murshidábád, Gopáladása Mahanta. Appearance, fresh. Verse. Generally correct.

Prapannámṛita alias *Rámánuja-charitra*. A legendary life of Rámánuja, the great Bhakta reformer, and founder of the dualistic school of the Vedantists. The name of the author of the work is not apparent, nor have I any means of making a guess as to his age. The work extends to 90 chapters. It opens with a scene in Vaikuṇṭha where Hari, anxious to promote the translation of mankind to his favourite region, desires Phaniràja or Ananta to descend on earth as a saviour. The scene then changes to the village of Bhútapuri in the district of Toṇḍila, three Yojanas to the west of the eastern sea. There lived a pious man of the name of Kes'ava of the Hárita family. He once celebrated a rite during a lunar eclipse, praying for a son. The prayer was granted. Ananta informed him in a dream that he would himself become the son of the devotee, and assume the name of Rámánuja. In due course the son was born, and named Lakshmaṇa A'rya with the alternative name or title of Rámánuja. On his 16th year, the boy was married to a maiden named Rakshákámbá. Soon after this marriage he lost his father, and repaired to Kánchipur, where he placed himself under the tutelage of one Yádava, a renowned scholar.

While he was at Kánchipur, the daughter of the king was possessed by a Bráhman devil, whom none could drive away. Yádava, with his pupils, went to see her, and on her being touched by the feet of Rámánuja, the devil departed. This pleased the king greatly, and he loaded the youth with rich presents. Soon after, his uncle (mother's sister's husband), Govinda came to the place to carry on a polemical disputation with Yádava. The uncle and the nephew took one side of the question mooted, and the teacher the other, and the result was a breach between them. The teacher also coveted the wealth of the pupil, and so the latter, by the advice of his uncle, went away to Prayága. In the way, when passing through the Goṇḍa forest, he was very much overpowered by fear, when Hari, the lord of Hastigiri, and his consort Lakshmí, assumed the form of wild hunters, and advised him to go back to

Kánchipur. On his return he was reconciled to his teacher; but after a time he was induced to become the pupil of a Sannyásí named Yamuná A'rya, who then dwelt at S'ríranga, and there he also contracted a friendship with one Purṇa A'chárya.

On the death of Yamuná A'rya, he returned to Kánchipur, and compiled his great work the *S'ríbháshya*, a commentary on the Vedánta Sútras of Vyása. Here, on one occasion, his wife Rakshakámbá quarrelled with the wife of Purṇáchárya, and Rámánuja, taking the side of his friend, sent his own wife away to her father's house. At the same time he himself became a Sannyásí of the Tridaṇḍí sect, and established a monastery (maṭha) at Kánchipur, and there he consecrated an image of Hastinátha. The people now gave him the title of 'Yatirája,' and his reputation spread far and wide.

On one occasion his former tutor Yádava came to see him, and, in the course of a long disputation, was so completely overcome, that he became a pupil of his pupil, and, forsaking the world, became a Tridaṇḍí under the name of Govindadása.

From this time forward Rámánuja was engaged principally in disputations with learned paṇḍits of Southern India who came to him for the purpose, and in making disciples. Among his antagonists there were a few Buddhists, but the bulk of them were S'ivites. The Chola king of S'ríranga was one of those whom he converted, and made one of his ardent supporters.

He devoted also much time to travelling, and the following are the places he is said to have visited, *viz.*, Dvárká, Mathurá, S'álagráma, S'áketa, Vadarikás'rama, the Naimisha forest, Vrindávána, Sáradapíṭha, Jagannátha, Chitrakúṭa and Delhi, (whence a Delhi princess is said to have gone away with him as his disciple, and in love with a pupil of his) and most of the leading towns of Southern India.

Rámánuja is said to have established 72 principal maṭhs, dedicating in each the image of his tutelary deity. Among these, the image established on the Yádava Hill, was the consequence of a dream, in which Vishṇu inspired him to put up a figure of Náráyaṇa. This image was consecrated on the 14th of the waxing moon in the month of Chaitra, of the S'aka year 1012 = 1090 A. D.

He lived to the age of 120 years, and died on the 10th of the waxing moon of Mágha. Most vexatiously however, the year of death, is not given.

The following are the works he is said to have written (1) *S'ríbháshya*, a commentary on the Vedánta Sútras; (2), *Vedántadípa*, the essence of the Vedánta; (3), *Vedántasára*, the elements of the Vedánta; (4), *Vedártha-saṇgraha* or the true meaning of the Vedas; (5), *Gítá-bháshya*, a commentary on the Bhagavad Gítá; all these works are still in existence.

The concluding sections (76 to 90) of the work give brief notices of the immediate successors of the reformer, from which it would seem that the work was not written until 150 years after his death. The followers of Rámánuja are known by the name of 'S'rí Sampradáyís,' and their number is very large in the south.

It is to be regretted that the work, though very detailed, does not give the year of the pious Yati's birth or death; but the fact of his establishing an image of Náráyaṇa in S'aka 1012, = A. D. 1090, about the close of his life, would suggest the idea that he lived all through the eleventh century. On this subject I quote the following from Wilson's account of the Vaishṇava.

"The *Smriti Kála Taranga* places the date of Rámánuja's appearance in S'aka—1049 or A. D. 1127. A note by Colonel Mackenzie on an inscription, given in the Asiatic Researches IX, 270, places the birth of Rámánuja in A. D. 1008: various accounts, collected by Dr. Buchanan, make it 1010 and 1025 (Buchanan's Mysore 2, 80) and 1019 (ibid 3, 413). Inscriptions make him alive in 1128, (ibid) which would give him a life of more than a century: according to Col. Wilks, indeed (History of Mysore 1, 41, note and appendix), he was alive in 1183. The weight of authority seems to be in favour of the more recent date, and we may conclude that he was born about the end of the eleventh century, and that the first half of the twelfth century, was the period at which his fame, as a teacher, was established."

Beginning. श्रीमते रामानुजाय नमः ।

श्रीरङ्गराजपदपङ्कजराजहंसं रामानुजार्य्यपदपङ्कजभृङ्गराजं ।
श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रं श्रीरङ्गनाथगुरुमन्वहमाश्रयाम ॥
मिथ्यावादिमदान्धसिन्धुरमुधासंरम्भकुम्भस्थली-
निर्भेदोद्भवसूक्तिमौक्तिकमणेः शुभ्रीकृताभ्रस्थली ।
सत्तर्कस्फुरदत्युदग्रनखरो वेदान्तशैलाश्रितः
श्रीरामानुजकेशरी विजयते प्रोद्दण्डविक्रीड़ितं ॥

काश्यिकान्वयसम्भूतं कारुण्यामृतसागरं ।
नृसिंहाचार्य्यतनयं रामानुजगुरुं भजे ॥
नाधीतानि च शास्त्राणि न कृतं गुरुपूजनं ।
वक्ष्यामि कृपया विष्णोरनुगृह्णन्तु देशिकाः ॥
इन्दिरारमणं देवमिभशैलनिवासिनं ।
विवस्वत्कोटिसङ्काशं देवराजमहं भजे ॥
अस्ति वैकुण्ठनगरं सर्व्वलोकेषु विश्रुतं । इत्यादि ।

End. गोदा शठारिपरकालमुखादिसिद्धैर्नाथार्य्ययामुनयतीश्वरकूरनाथैः ।
सार्द्धं जगत् करुणया कलिदोषजुष्टं स्वाधीनरङ्गनिलया सकलं ररक्ष ॥
गोदाचरित्रं सुमहद्विचित्रं समस्तसन्मङ्गलपूर्णपात्रं ।
शृण्वन्ति ये भक्तियुताः पठन्ति सन्मङ्गलास्ते सततं भवेयुः ॥

Colophon. इति श्रीप्रपन्नामृते रामानुजचरित्रे भट्टाचार्य्यवेदान्तिसंवादे गोदारङ्गेश्वरकल्याणं नाम नवतितमोऽध्यायः । इति प्रपन्नामृतं समाप्तं । संवत् १८६१ ।

विषयः । १ अध्याये,—एकदा वैकुण्ठसदने लक्ष्म्या समुपास्यमानस्य "केनोपायेन वैकुण्ठमिमान् जन्तून् नयाम्यहमिति" चिन्तयतो हरेः पुरतः समुपस्थितं फणिराजं समुद्दिश्य पुरा किल लोकसंरक्षणाय मया शङ्खचक्राद्यायुधानि विष्वक्सेनादयश्च प्रेरिताः, तदधुना भवानपि भूमाववतीर्य्य लोकान् रक्षितुमर्हतीति समादेशादिकथनं ।

२ये अध्याये,—पूर्व्वसागरस्य पश्चिमतीरे योजनत्रयेण व्यवहिते तोण्डीरमण्डले भूतपुरीति नाम्ना प्रसिद्धा पुरी आसीत् । तत्र हारीतान्वयः केशवनामकः कश्चिद् भागवतोत्तमोऽनपत्यतया नितरां निर्व्वेदमापन्नः प्रतिवसति स्म । अथैकदा सभार्य्योऽसौ चन्द्रग्रहणकाले भगवन्तमुद्दिश्य इष्टिं चकार । भगवानपि तयेज्यया प्रसादमभ्युपगच्छन् "अहं ते पुत्रो भविष्यामीति स्वप्ने तमेवमब्रवीत् । अथ शेषोऽपि चैत्रशुक्लपञ्चम्यां तत्पुत्रत्वेनावतीर्णो रामानुज इति समाख्यामधिजगाम । ततो लक्ष्मणार्य्यापरनामधेयस्य रामानुजस्य अन्यान्यसंस्कारानन्तरं षोड़शे वर्षे रक्षकाम्बया सह विवाहकथनं । अथ पितृमरणोत्तरं तस्य काञ्चीपुरगमनपूर्व्वकं यादवनामकस्य विद्वद्वरस्य समीपे शास्त्राध्ययनकथनञ्च ।

३ ये अध्याये, —अथ काञ्चीपुरेशकुमारीं ब्रह्मराक्षसोपद्रुतामुपलभ्य तदुपद्रवशान्त्यर्थं यादवस्य सह शिष्यगणैस्तत्र गमनमकृतार्थता च । अथ रामानुजस्य चरणस्पर्शमात्रेण अस्तमितोऽयं ब्रह्मराक्षस इति विज्ञाय राजा तस्मै सुवर्णराशिं प्रददौ । अस्मिंश्च समये रामानुजस्य मातृस्वस्रीयो गोविन्दाभिधानः काञ्चीपुरे तेन सह सि-

विषयः। लित्वा यादवस्य समीपे शास्त्रार्थं चिन्तयन् तस्थौ। अथैकदा यादवेन सत्यज्ञानादिश्रुतिवाक्यानि अपार्थतया व्याख्यातानीत्याकलय्य तेन रामानुजस्य विवादः समजनि।

४—६ष्ठे अध्याये,—अथासौ यादवः स्वान्तिकमनागच्छतोऽपि रामानुजस्य गुणोत्कर्षमसहमानस्तन्निधनेच्छया भूय एव तं मधुराचरेण वशीकृत्य स्वाभीष्टसिद्धये शिष्यैः परावृतश्च प्रयागमुद्दिश्य प्रचचाल। तत्र गोण्डारण्ये गोविन्दस्य उपदेशेन ततः पलायितस्यापि तस्य असहायतया अत्यर्थं भीतस्य साहाय्यार्थं भगवान् हस्तिगिरिनाथो लक्ष्म्या सह व्याधमिथुनवेशेन तत्र आविर्बभूव। सोऽपि तदनुग्रहेण पुनः काञ्चीपुरं प्रत्याययौ। अस्मिन्नेव समये यामुनार्य्याभिधेयः कश्चित् सन्न्यासी रङ्गनगरे निवासमकरोत्। स हि सर्व्वसुलक्षणयुक्तं बालकमेकं प्राप्तुकामः सर्व्वेषु देशेषु शिष्यान् प्रेरयामास। अथ ते रामानुजस्य प्रवृत्तिमाकलय्य तत् सर्व्वं गुरवे न्यवेदयन्। अत्रान्तरे गोविन्दोऽपि प्रयागात् प्रत्यागच्छन् कालहस्तिनगरे शिवमेकं प्रतिष्ठाप्य तत्र उवास। अथ काञ्चीपुरं प्रत्यागतोऽसौ यादवो रामानुजप्रभावाद् भीत इव शिष्यमुखेन पुनरेव रामानुजेन सह सख्यं चकार।

७—९मे अध्याये,—अथ यामुनाचार्य्यः रामानुजदिदृक्षया श्रीरङ्गात् काञ्चीपुरं प्रति प्रययौ। ततः कियद्दूरं गत्वा हस्तिगिरिं ददर्श। तत्र स्वशिष्येण काञ्चीपूर्णेन सह मिलित्वा ततो निर्ज्जगाम। अत्रान्तरे हस्तिगिरिनाथं वरदाभिधानं द्रष्टुकामो यादवो रामानुजादिभिः शिष्यैः सह तत्र समाययौ। काञ्चीपूर्णस्तु तद्दर्शनेन आनन्दमासाद्य यामुनाय तेषां परिचयमदात्। अथ सोऽपि रामानुजसौन्दर्य्यामृतं निपीय भूय एव श्रीरङ्गनगरं प्राप। एकदा रामानुजः तैलेन यादवस्य अभ्यञ्जनं कुर्व्वन्नेव तत्कृतं 'कप्यास्य'मिति श्रुतेरपार्थं निशम्य नितरां सन्तापमधिगम्य च विचारपराजितेन तेन ततो बहिष्कारितो हस्तिगिरिं जगाम। तत्र च काञ्चीपूर्णस्योपदेशवत् कैङ्कर्य्येण वरदार्चनायां निरतो बभूव। अथ वृत्तान्तमिममुपश्रुत्य यामुनाचार्य्यः निजनिर्म्मितां स्तोत्रावलीं समर्प्य स्वान्तेवासिनं पूर्णाचार्य्यं तत्र प्रेरयामास। तत्रैकदा वरदस्य पुरतः पठ्यमानं तत्स्तोत्रमपूर्व्वमिति मत्वा गुम्फितमिदं केनेति जिज्ञासुः रामानुजः पूर्णाचार्य्येण तथा पथि सङ्गतेन महापूर्णेन च समं यामुनाचार्य्यदिदृक्षया रङ्गनगरमुद्दिश्य प्रचचाल। अथ यामुनाचार्य्योऽपि तत्प्रत्युद्गमनाय कावेरीतीरपर्य्यन्तमासाद्य तत्र देहत्यागेन स्वजनान् शोकसिन्धौ निमज्जयाञ्चकार। अत्रावसरे रामानुजोऽपि तत्रोपस्थाय गतजीवितं यामुनदेहं पश्यन्नेव तस्य तदानीन्तनाङ्गुलित्रयसङ्कोचकारणं स्वकर्त्तव्यत्रितयं श्रीभाष्यरचनादिकं प्रतिज्ञाय तत्सङ्कोचमपाद्य च पुनः काञ्चीपुरं प्रत्याजगाम।

विषयः। १०–१२ अध्याये,—रामानुजगृहे काञ्चीपूर्णस्य भोजनादिवृत्तान्तवर्णनं। तदुपदेशेन रामानुजस्य पूर्णाचार्य्यदर्शनार्थं पुनरेव रङ्गनगरगमनं। अथ पूर्णाचार्य्येण पञ्चसंस्कारदीक्षितो रामानुजः सस्त्रीकेन तेन सह स्वगृहं प्राप्य ततो द्रविड़ागमादीन् अधीतवान्। एकदा कूपात् जलोत्तोलनकाले पूर्णाचार्य्यभार्य्यया सह रक्षकाम्बायाः कलहः समजायत। अत एव कारणात् भार्य्यासहायः पूर्णाचार्य्यः भूय एव रङ्गनगरं प्रतिययौ। रामानुजोऽपि रक्षकाम्बायां वीतरागो बभूव। अथैकदा हस्तिगिरिनाथमभ्यर्चयन्तं रामानुजमभ्युपेत्य कश्चिद् ब्राह्मणो बुभुक्षामात्मनो विज्ञापयन् "मद्गृहं गम्यतामिति" तेनानुज्ञातः तत्र गत्वा च रक्षकाम्बया तिरस्कृतोऽसौ पुनरेव तत्समीपमाजगाम। अथ विदितवृत्तान्तेन रामानुजेन "भो विप्र त्वमिदं रोचनारञ्जितं वसनं लेख्यञ्चादाय भूय एव तत्पुरतो गच्छ, कथयस्व चैवं तव पितृगृहे विवाहमहोत्सवो भविष्यतीति" कथितो विप्रस्तथा चकार। रामानूजपत्नी तु तत् श्रुत्वा अत्यर्थमानन्दिता यत्नेन तं भोजयामास। अत्रान्तरे रामानुजोऽपि स्वगृहमागतः किमप्यजानन्निव पत्नीमुखात् सर्व्वं विज्ञाय तदुपायेन तां पितृवेश्मनि प्रेरयाञ्चकार।

१३–१५ अध्याये,—अथ रामानुजो विगतस्पृहतया गृहधनादिकं सर्व्वं विहाय हस्तिगिरिनाथस्य प्रसादमुपलभ्य च त्रिदण्डादिग्रहणेन सन्न्यासं चकार। अत एव काञ्चीपूर्णेन सादरं गृहीतोऽसौ 'यतिराज' इति समाख्यान्तरमधिगम्य तत्र मठस्वामी बभूव। समयेऽस्मिन् रामानुजस्य भागिनेयो दाशरथिस्तथा अनन्तभट्टतनयः कूरनाथश्च हस्तिगिरिमासाद्य यतिराजस्य अन्तेवासिनौ बभूवतुः। अथैकदा यादवाचार्य्यः हस्तिगिरिनाथदर्शनार्थं रामानुजाश्रमं जगाम। तत्र हि शङ्खचक्राद्यङ्कितं रामानुजकलेवरं दृष्ट्वा तं प्रोवाच। भोः किमिदमवैदिकमनुतिष्ठसि कुतश्च त्वया निर्गुणं ब्रह्म सगुणतया ख्यापितमित्यभिहितो यतिराजस्तदुत्तरदानाय कूरेशमादिदेश। सोऽपि श्रुत्यादिप्रमाणैः स्वपक्षं समर्थ्य यादवं पराजिग्ये। ततश्च काञ्चीपूर्णस्य उपदेशात् यादवाचार्य्यः शरणत्वेन रामानुजं संश्रितवान्। स च तस्मै सन्न्यासं दत्वा गोविन्ददास इति नाम्ना आजुहाव। अथ गोविन्ददासो यतिवराभ्यनुज्ञया यतिधर्म्मसमुच्चयाख्यं ग्रन्थं निर्म्माय वैष्णवं लोकं प्रययौ।

१६–२० अध्याये,—अथ यामुनाचार्य्यपुत्रो वररङ्गो रामानुजानयनार्थं हस्तिगिरिं प्रजगाम। तत्र चाभिनयप्रदर्शनादिना सन्तोषिताद्वरददेवादभीष्टप्राप्तिपूर्व्वकं रामानुजं गृहीत्वा रङ्गनगरं प्रत्यागत्य च रङ्गेशाय तमुपदीचकार। अथ रङ्गनाथाद्विभूतिद्वयलाभपूर्व्वकं यतिराजस्तत्र अवस्थितिञ्चक्रे। अत्रावसरे रामानुजमातुलपुत्रस्य शैवधर्म्मरतस्य गोविन्दस्य वेङ्कटाद्रिवासिना श्रीशैलपूर्णनामधेयेन वैष्णव-

विषयः। यतिना सार्द्धं शास्त्रार्थोऽभूत्। तत्र पराजितस्य गोविन्दस्य सन्न्यासग्रहणपूर्व्वकं श्रीशैलपूर्णचरणाश्रयणकथनं। अथ पूर्णाचार्य्योपदेशेन यतिराजस्य चरमतत्त्वजिज्ञासया गोष्ठीपुरमष्टादशकृत्वः गत्वापि गोष्ठीपूर्णाचार्य्यादभीष्टमलब्ध्वा परितप्तस्य च तस्य गोष्ठीपूर्णादेशेन पुनस्तत्र गमनपूर्व्वकं मन्त्रार्थप्राप्तिकथनं।

२१–२३ अध्याये,—यथा गोष्ठीपूर्णेन निषिद्धोऽपि रामानुजः केषुचिन्मन्त्रं कथयामास। स ह्येतद्विज्ञाय तमाहूय च प्रोवाच। भोः कथय गुरुद्रोहकरणस्य किं फलं? रामानुजः प्राह नरकगमनमिति। गोष्ठीपूर्णः पुनराह एवं ज्ञात्वा कथं त्वया तदनुष्ठितं। यतिराजेनोक्तं,——

'पतिष्ये एक एवाहं नरके गुरुपातकात्। सर्व्वे गच्छन्तु भवतां कृपया परमं पदम्'॥

इति। निशम्यैतत् गोष्ठीपूर्णो नितरां प्रीतिमावहन् हर्षभरेण 'मन्नाथ' इति तस्य नामान्तरं विधाय व्याजहार,—अद्यारभ्य लोकेऽस्मिन् वैष्णवदर्शनमिदं रामानुजार्य्यसिद्धान्तमिति ख्यातं भविष्यतीति। अथ दाशरथिः यतिवरस्यादेशेन पूर्णाचार्य्यसुतायाः गृहकर्म्मकरणार्थं तस्याः श्वशुरालयेऽवस्थानञ्चकार। तत्रैकदा केनचित् श्रुतिविरुद्धार्थकारिणा वैष्णवेन सह विचारे लब्धजयश्रीरसौ भूय एव रामानुजस्य चरणावभ्युपेत्य वैष्णवदास इति नामान्तरं प्राप। अथ रामानुजपुत्रस्य सुन्दरवाहोः मालाधराद्दीक्षादिग्रहणकथनं। तत्र मालाधरप्रमुखात् रामानुजेन शठकोपाचार्य्यकृतसहस्रगीतेर्व्याख्याश्रवणञ्च।

२४–२७ अध्याये,—रामानुजस्य गद्यत्रयरचनाकथनं। अथ रङ्गनाथसेवाद्रव्यापहारकाणां बन्धनक्लिष्टानां रामानुजनिधनार्थं तस्मै विषान्नदानं, तस्य च ततः परित्राणादिकथनञ्च। अथैकदा यज्ञमूर्त्तिरिति श्रुतः कश्चिन्मायावादी कृतसन्न्यासोऽपि दिग्विजयार्थं प्रवर्त्तमानः सह रामानुजेन शास्त्रार्थं कर्तुमनाः रङ्गनगरमाजगाम। स हि अष्टादशदिनानि यावत् शास्त्रार्थं कृत्वा रामानुजप्रभावेण विमुग्धोऽसौ तच्छिष्यतां स्वीचकार। रामानुजोऽपि ब्रह्मनिर्गुणत्ववादनिरसनमद्वैतवादादिखण्डनञ्चोपदिश्य तं भूय एव शिखासूत्रादिकं ग्रन्थयामास। अपि च तस्मै देवराज–देवमन्नाथ-मन्नाथेति नाम त्रयं प्रदाय मठेऽन्यस्मिन् तं स्वामिनं चकार। अथ तत्र पुण्यास्यनगरात् वैष्णवानामनन्ताचार्य्यादीनामागमनकथनं। ततो रामानुजाज्ञया देवराजो द्रविड़भाषया ज्ञानसारप्रमेयसारेत्यभिधानं ग्रन्थद्वयं चकार। तथा तदाज्ञया अनन्ताचार्य्यो वेङ्कटगिरिगमनपूर्व्वकं तत्र वृन्दावनं विधाय वेङ्कटेशस्य रामानुज इति नामान्तरञ्च कृत्वा तत्र वासमकरोत्।

२८–३० अध्याये,—अथ रामानुजः वेङ्कटाद्रिगमनपुरःसरं वेङ्कटेशं समभ्यर्च्य दिशमुत्तरां गन्तुकामस्तत्र पथिस्थितां देहलीनगरीं प्राप्य त्रिविक्रमसवन्दत।

विषयः। ततोऽसा अष्टसहस्राख्यं ग्रामं प्राप्य वरदाचार्य्ययज्ञेशनामानौ स्वशिष्यौ विदितप्रवृत्ती चकार। अथ यतिराजः केनाप्यपराधेन यज्ञेशमुखसन्दर्शनमविधाय वरदस्य गृहं प्रययौ। तत्र अनुपस्थितेऽपि तस्मिन् तद्गृहिण्याः भक्त्यतिशयदर्शनेन अत्यर्थं सन्तोषमापन्नोऽसौ भोजनादिकं व्यधात्। समनन्तरञ्च ततो हस्तिगिरिं प्राप्य काञ्चीपूर्णादिभिः सह साक्षात्कारं विधाय च कापिलतीर्थमुद्दिश्य प्रचचाल। तत्र चोपस्थितोऽसौ कञ्चित्कालमुवास। अथ तद्देशाधिपतिः विट्ठलदेवो रामानुजस्य शिष्यत्वमभ्युपगम्य तस्मै तोण्डीरमण्डलादिग्राममुपजहार। अतश्च यतिवरस्य वृषाचल-रङ्गनगरादिवृत्तान्तकीर्त्तनं।

२१-२३ अध्याये,—अथ यदा रामानुजेन बहुशोऽनुरुद्धोऽपि तन्मातुलपुत्रो गोविन्दो गार्हस्थ्यं नाभ्यनन्दत, तदा तस्य सन्न्यासाश्रमग्रहणस्य वृत्तान्तकथनं। अथ कूरेशमात्रसहायस्य रामानुजस्य शारदापीठगमनानन्तरं तत्रत्यान् पण्डितान् विजित्य ततो बौधायनकृतब्रह्मसूत्रवृत्तिपुस्तकमादाय रङ्गनगरं प्रत्यागच्छतस्तस्य अनुगामिनः शारदापीठीयविबुधाः बलादेव तत्पुस्तकं सङ्गृह्य शारदापीठमध्ययुः। तदनेनात्यर्थं विषादमापन्नस्य रामानुजस्य पुरतः कूरेशेनोक्तं, भगवन्! मया खलु रात्रिकालेषु तत् पुस्तकं तत्त्वतो दृष्टं, भवत्कृपया तत् सर्व्वमद्यापि हृदये लिखितमस्तीति। एतच्छ्रुत्वा रामानुजो बौधायनवृत्तिलिपिकरणाय तमादिदेश। समनन्तरञ्च रामानुजो बौधायनमतानुसारेण श्रीभाष्यं, वेदान्तदीपं, वेदान्तसारं, वेदार्थसङ्ग्रहं, गीताभाष्यञ्च रचयाञ्चकार। अथ बहुभिः शिष्यैः परिवृतस्य तस्य शास्त्रार्थेन दिग्विजयार्थं प्रयाणवर्णनं। तत्र चोलमण्डल-पाण्ड्यमण्डल-कुरुकानगरादिस्थितानां पण्डितमण्डलीनां विचारपराजितानां रामानुजसमीपात् कैङ्कर्य्यधर्म्मग्रहणकथनं। ततो रामानुजस्य कुरङ्गनगराधिपतिं दीक्षितं विधाय केरलदेशगमनकीर्त्तनं।

२४–२६ अध्याये,—अथ रामानुजस्य द्वारका मथुरा-सालग्राम-साकेतनगर-वदरिकाश्रम-नैमिषारण्य-वृन्दावनादिगमनकथनं। अथासौ पुनरेव शारदापीठमाजगाम। तत्र वाग्देवी आविर्भूय 'कप्यास्यश्रुतितात्पर्य्यं वदेति' स्वयमेव तं पप्रच्छ। अथ तत्कृतार्थश्रवणेन प्रसादमापन्ना देवी श्रीभाष्यं स्वशिरसि संस्थाप्य सङ्गृह्य च पाणिभ्यां तत्पाणियुगलं भाष्यकार इति तन्नामकरणं विदधे। तत्र भाष्यकारात् तत्रत्यानां पण्डितानां पराजयादिकथनं। अनन्तरं पुरुषोत्तमक्षेत्रगतस्य तस्य प्रच्छन्नसौगतगणविजयानन्तरं रामानुजाख्यं मठं निर्म्माय तत्र अवस्थानकथनं। अथ स पाञ्चरात्रानुसारेण जगन्नाथस्य नित्यपूजादिकं कारयितुमनाः तदर्च्चकानाहूय तथा आदिदेश। तेऽपि तत्रासम्मताः वृत्तान्तमिमं जगन्नाथाय

विषयः। निवेदयामासुः। अथ भगवान् रामानुजेन पूर्व्वं तथा सम्प्रार्थितोऽपि तं ततो निवर्त्तनाय अनुरुरोध। यदा खलु स्थिरप्रतिज्ञोऽसौ स्वव्यवसायात् न निवृत्तो बभूव। तदा निशायां निद्रितं तं योगमायया पुरुषोत्तमक्षेत्रात् कूर्म्मक्षेत्रं प्रेरयाञ्चकार। अथ प्रभातकाले विबुद्धोऽसौ कूर्म्मक्षेत्रमिदमिति विज्ञाय विस्मयमागतः श्रीकूर्म्मनाथं समाराध्य तत्र कतिचित् दिनानि तस्थौ। ततस्तस्य सिंहाचलाहोवलगरुड़ाचलादिगमनकथनं। अथ तेन पुनरेव वेङ्कटाचलगमनपूर्व्वकं ततः शैवानां निर्व्वासनकरणकथनं।

३७–३९ अध्याये,—कूरेशस्य सर्व्वसम्पत्परित्यागानन्तरं स्त्रीमात्रसहायस्य श्रीरङ्गनगरे नित्यवासकथनं। अथ तत्र रङ्गेशप्रसादात् पराशरव्यासयोरंशेन कूरेशस्य यमजौ पुत्रावजायातां। प्रवृत्तिमिमामुपलभ्य रामानुजस्तद्गृहं गत्वा प्रथमस्य पराशर इति द्वितीयस्य च श्रीरामदेशिकः व्यासश्चेति तयोः नाम चक्रे अत्रावसरे गोविन्दस्यापि पुत्रो व्यजायत, रामानुजस्तु पराङ्कुश इति तन्नामकरणं विदधे। अथ रङ्गेशेन अपत्यनिर्व्विशेषतया प्रतिपालितस्य पराशरस्य विवाहादिकथनञ्च।

४०–४३ अध्याये,—अथ रामानुजस्य कृपया मथुरावास्तव्यस्य धनुर्द्दासस्य सह भार्य्यया वैष्णवत्वसिद्धिवर्णनं। एकदा रङ्गेश्वरस्य प्रीत्यर्थं महान् उत्सव आसीत्। तत्र यतीश्वरः स्वयमेव धनुर्द्दासदासमालम्ब्य स्वयमेव महोत्सवं प्रदर्श्य च पुनरागमनसमये तेन सह स्वमन्दिरं प्रविवेश। अथ कुतोऽयं धनुर्द्दासः यतिपतिनैवं सम्मानित इति जिज्ञासूनां वैष्णवानां पुरतो यतिपतिना तस्य तत्पत्न्याः हेमाङ्गनायाश्च गुणकृतोत्कर्षप्रकटनकथनं। अथ गोष्ठीपुरेशः मूकाय निजगुरुविग्रहं प्रदर्श्य तस्मै मोक्षोपायं कथयामासेति वृत्तान्तकीर्त्तनं। चोलदेशाधिपतेः क्रिमिकण्ठस्य उत्पत्त्यादिकथनञ्च।

४४–४८ अध्याये,—क्रिमिकण्ठस्य चित्रकूटराज्यशासनकथनं। शैवधर्म्मश्रेष्ठत्वेन तत्कृतलेखनप्रचारादिकथनं। अथ क्रिमिकण्ठस्य प्रार्थनया तद्राज्यमुद्दिश्य पश्चिमाशाभिमुखं प्रचलितस्य रामानुजस्य व्याधकृतार्च्चनामङ्गीकृत्य चेलाञ्चलाम्बागृहगमनकथनं। तदनुग्रहेण च चेलाञ्चलाम्बाभर्त्तुः पञ्चसंस्कारप्राप्तिवर्णनं। रामानुजात् बौद्धानां पराजयवर्णनं। अथ भक्तनगरे सार्द्धं शिष्यवर्गेण निवसतस्तस्य स्वप्नदर्शनानन्तरं भगवन्मूर्त्त्युद्धरणार्थं यादवाचलगमनकथनं। १०१२ शकाब्दे चत्रशुक्लाचतुर्द्दश्यां रामानुजस्तत्र नारायणप्रतिमां प्रतिष्ठापितवान्। अथ रामप्रियनामकस्य नारायणविम्बस्य दिल्लीशभवने अवस्थितिकथनं। अथ विदिततद्वृत्तान्तो रामानुजो दिल्लीशं अभ्युपेत्य तदनुमोदनेन रामप्रियस्य 'सम्पत्सुत' इति नामान्तरं रचे। अनन्तरं दिल्लीशगृहात् रामप्रियस्य आनयनकाले दिल्लीशतनयापि राम-

विषयः। प्रियविरहमसहमाना तेन सह यादवाचलमाजगाम। अथ तत्र रामप्रियैक्यं गतायास्तस्या अर्चारूपेण अवस्थानादिकथनं। अत्रान्तरे वृत्तान्तमिममद्भुतं निशम्य कवीरनामकस्य कस्यचित् यवनसाधोः तत्र गमनपूर्व्वकं श्रुतमोक्षोपायस्य च पुरुषोत्तमक्षेत्रगमनानन्तरं कुक्कुररूपधरस्य भगवतः प्रसादभोजनात् मुक्तिप्राप्तिकथनञ्च। अधुना यादवाचलस्य 'यतिशेष' इति नामकरणकथनं।

४९–५९ अध्याये,—अथ कूरेशकृतवैष्णवस्थानविनाशविवरणकथनं। तिल्लगोविन्दराजप्रतिष्ठाविवरणं। अथ अन्धीभूतस्य कूरेशस्य रामानुजोपदेशात् भगवत्स्तवनेन पुनश्चक्षुःप्राप्तिकथनं। विष्णुचित्तसुतायाः गोदायाः रामानुजादभीष्टप्राप्तिकथनं। श्रीरङ्गपत्तने निवसतो रामानुजस्य चतुःसप्ततिसङ्ख्यकानां प्रधानशिष्याणां विवरणकथनं। रामानुजाष्टोत्तरजातनामस्तोत्रकथनं। रामानुजशिष्यस्य आन्ध्रपूर्णस्य माहात्म्यादिकथनं। तदनुज्ञया अनन्तार्य्यस्य वृषाचलावस्थितिकथनं। कूरेशस्य शेषदशाकीर्त्तनं, रङ्गेशकृपया परमपदप्राप्तिकथनञ्च। अथ रङ्गेश-वेङ्कटेश्वर-वरद-सुन्दर-वकुलाभरण-नाथमुनि-यामुनाचार्य्य-वररङ्गप्रभृतिप्रकाशितरामानुजवैभव-वर्णनं। शठकोपाचार्य्यस्य जन्मादिवृत्तान्तकीर्त्तनं। पूर्णाचार्य्यकृतरामानुजमाहात्म्य-वर्णनञ्च।

६०–६५ अध्याये,—कृष्णग्रामाधिपस्य बालस्वामिनः विवरणं। अथैकदा कावेरीतीरे वैष्णवानां महती गोष्ठी बभूव। तत्र मोक्षमार्गोपदेशप्रसङ्गेन रामानुजमाहात्म्यवर्णनं। नारायणपुरवासिनो 'मासभद्र' इति विश्रुतस्य वैष्णवस्य विवरणकथनं। यथा सङ्ख्यातीतेष्वपि भगवदवतारेषु नृसिंह-राम-कृष्णानां प्राधान्यं, तथा अष्टोत्तरशतेष्वपि दिव्यदेशेषु श्रीरङ्गनगः, वेङ्कटगिरिः, हस्तिगिरिः, यादवगिरिश्चेति चत्वारो मुख्याः बभूवुरिति वचनमाकर्ण्य नृसिंहादीनां प्राधान्ये कारणजिज्ञासूनां पुरतो रामानुजेन तन्निदानकथनं। एवं व्यास-पराशर-शुक-शौनकादीनां प्राधान्ये कारणनिरूपणं। तथा वेदानामर्थानाहृत्य शठकोपाचार्य्यः द्राविड़भाषया ग्रन्थांश्चकारेतिवृत्तान्तकीर्त्तनं।

६६–७५ अध्याये,—सर्व्वेभ्य आचार्य्येभ्यो रामानुजस्य प्राधान्यकीर्त्तनं। आचार्य्य-शब्दनिर्व्वचनादिकं। प्रपन्नगायत्रीकथनादिकं। रामानुजस्य १२० विंशत्युत्तरशत-वर्षजीवितकालनिरूपणं। अथ रामानुजः स्वजनान् चिरविरहविधुरान् कर्त्तुमनाः तानाहूय भगवत्कैङ्कर्य्यमेव मोक्षोपाय इति उपदिदेश। आदिदेश च तेषां कर्त्तव्याकर्त्तव्यनिर्णयपुरःसरं सम्यगनुष्ठानं। अथ ते तदनुज्ञया भूतनगरे तदर्चाप्रतिष्ठां विदधिरे। अथ रामानुजः रङ्गेशदास्यसाम्राज्ये पराशरमभिषिच्य माघशुक्लदशम्यां परमं पदं प्राप। अतः परं दाशरथिः पूर्णाचार्य्यः गोविन्दः कुरुक-

विषयः। श्वेति चत्वारः प्रधानकल्पा आसन्। गोविन्दस्य परलोककथनं। पराशरकृतमायावादिपराजयकथनं। माधवदासस्य वृत्तान्तकथनं। स हि सहस्रनामभाष्यं विष्णुपूजाक्रमं, अष्टश्लोकीं, श्रीस्तुतिं, रत्नकोषश्चेति ग्रन्थपञ्चकं कृतवान्। पूर्व्वाचार्य्याणां द्राविड़भाषया ग्रन्थरचनाकारणकथनं। तत्र अगस्त्यविश्वकर्म्मणोरन्योन्यं शापदानवृत्तान्तकीर्त्तनं। श्रीवैष्णवस्य द्राविड़ाम्नायपठनावश्यकताकथनं। सङ्क्षेपेण पूर्व्वाचार्य्याणां चरितकीर्त्तनमुखेन लक्ष्म्याः द्रविड़ेषु गोदारूपेण अवतारकथनं।

७६-९० अध्याये,—अथ कासारादीनां जन्मकथनं। तेषां देहलीनगरे भगवद्दर्शनवृत्तान्तकथनं। भक्तिसारस्य जन्मादिकथनं। फणिकृष्णस्य जन्मादिकथनं। भक्तिसारस्य द्रविड़भाषया ग्रन्थप्रणयनकथनं। तत्र भगवता भक्तिसाराय महदाद्यतत्त्वोपदेशदानकथनं। भक्तिसारात् रुद्रस्य पराजयकथनं। भक्तिवैभवातिशयवर्णनं। कुलशेखरस्य जन्मादिकथनं। तत्र तत्कृतश्रीरामप्रत्यक्षीकरणादिवृत्तान्तकीर्त्तनं। भट्टनाथस्य जन्मादिकथनं। पद्मराजस्य जन्मादिविवरणकथनमुखेन तत्सभायां विष्णुतत्त्वनिरूपणवृत्तान्तकीर्त्तनञ्च॥

No. 1732. आनन्दलहरीटीका।

Substance, country-made paper, 10 × 4½ inches. Folia, 78. Lines, 8 on a page. Extent, 1,463 s'lokas. Character, Nágara. Date, Sm. 1836. Place of deposit, Lálgolá, Zilá Murshidábád. Kálícharaṇa Upádhyáya. Appearance, fresh. Prose. Correct.

A'nandalaharí-ṭíká. A commentary on S'añkara A'chárya's hymn to S'iva. By Narasiñha. The great peculiarity of this commentary is, that it explains the text in two different ways; in one way proving that it is a hymn in praise of Bhavání, and in another way making Vishṇu the subject of its praise. Ordinarily the text is understood to have been written in honour of S'iva.

Beginning. वारंवारमुदारसस्मितमुखः शिक्योपरिस्थापितं
हारं हारमुदूखले परिगतो हैयङ्गवीनं हटात्।
आयान्तीं पुरतो विलोक्य जननीमादाय यष्टिं करे
धावं धावमिह प्रकाशितभयं पायात् समायार्भकः॥

कह्लारोत्पलकैरवाम्बुजदल++न्दसन्मञ्जरीः
कोदण्डं करपङ्कजेन दधतीं पुण्ड्रेक्षु++द्भवं ।
सौवर्णाङ्कुशपाशपाणिमरुणामारक्तवस्त्रावृता-
मातामाम्बुजसंस्थितां त्रिनयनां चन्द्रार्द्धचूड़ां भजे ॥
प्रणम्य शङ्कराचार्य्यचरणाम्बुरुहद्वयं ।
आनन्दलहरीस्तोत्रं विष्णुपक्षेऽपि लक्षयेत् ॥
तत्र भवानीपक्षे,—ननु हरिहरविरिञ्च्यादिदेववृन्दमपास्य किमिति कात्यायनी-
स्तुतेराचरणमिति मिथ्याशङ्कामपनिनीषुराह । शिवः शक्त्येति ।

End. जननीति सम्बोधनं वा । १०२ ।
अथास्मदीयमवलोक्य ततोऽपि सम्यगर्थान्तरं समधिगम्य न निन्द्यमेतत् ।
अत्यन्तदुर्गमतरे पथि सञ्चरन्तः श्लाघ्या भवन्ति कवयः पुरतः प्रयाताः ॥
भेदो न ते जननि चास्ति जनार्द्दनेन वैकुण्ठनाथपरतापि कृता च तेन ।
मातर्भवानि करवाणि ततोऽत्र काकुं माकुण्ठितोऽस्तु मयि ते करुणाकटाक्षः ॥

Colophon. इति श्रीनरसिंहविरचिता आनन्दलहरीटीका समाप्ता । श्रीरस्तु ।
संवत् १८३६ । फाल्गुणे ।

विषयः । शङ्कराचार्य्यकृतानन्दलहर्य्या भवानीपक्षे विष्णुपक्षे च व्याख्यानं ।

No. 1733. पदार्थादर्शः ।

Substance, country-made paper, 12½ × 4 inches. Folia, 142. Lines, 8 on a page. Extent, 5,781 s'lokas. Character, Nágara. Date, ? Place of deposit, Teghora, Post Lálgolá, Zilá Murshidábád. Devadatta Trevedí. Appearance, old. Prose. Correct.

Padárthádars'a. A commentary on the Sarádá-tilaka,—a Tantra. By Rághava Bhaṭṭa. The Tantra is in great repute in the North-Western Provinces, and appealed to as an authority of great weight, though it forms not one of the 64 original Tantras.

Beginning. श्रीकण्ठं निजताण्डवप्रबलताप्रोद्दाममोदोदयं
पश्यन्त्याः कुतुकाद्भुतप्रियतया सञ्जातभावं मुहुः ।
मन्दान्दोलितदुग्धसिन्धुलहरीलीलालसं लोचनं
प्राप्तालोकनमातनोतु +++ भूतिं भवान्याः शुभं ॥

संसेवनीयमृषिभिः सनकादिमुख्यैर्योगैरगम्यमविनश्वरमादिभूतं ।
संसारकृन्निगमसारविचारसारं सौरं महो मनसि मे मुदमादधातु ॥
भद्राय भवतां भूयां भारती भक्तिभाविता ।
स्मृतेरुज्जृम्भते यस्या वाग्विलासोऽतिदुर्लभः ॥
शारदातिलके तन्त्रे गुरूणामुपदेशतः ।
पदार्थादर्शटीकेयं राघवेण विरच्यते ॥
सम्प्रदायागतं किञ्चिद् भणितागमसम्मतं ।
यदुक्तमत्र तत् सन्तो विचारयितुमर्हथ ॥
अथेश्वरः सर्व्वा अपि श्रुतीः भवपाशबद्धानां स्वर्गाय मुक्तये च समुपदिशति स्म ।
अन्येषां स्मृतिशास्त्रादीनां तन्मूलकत्वेन तदर्थप्रतिपादकत्वेन च प्रामाण्यमिति सुप्रसिद्धतरं ॥ इत्यादि ।

End. मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्ति आयुष्मत्पुरुषकाणि चेति भगवत्पतञ्जलिवचनात् । महनीयां गिरं पूजनीयां गिरम् ।

Colophon. इति श्रीराघवभट्टविरचिता पदार्थादर्शटीका सम्पूर्णा । शुभम् ।

विषयः । लक्ष्मणदेशिकेन्द्रकृतशारदातिलकव्याख्यानं ।

No. 1734. तीर्थकौमुदी ।

Substance, country-made paper, 18 × 3½ inches. Folia, 148. Lines, 7 on a page. Extent, 4,244 s′lokas. Character, Bengali. Date, ? Place of deposit, Teghora, Post Lálgolá, Zilá Murshidábád. Devadatta Trivedí. Appearance, very old. Prose and verse. Correct.

Tírtha-kaumudí. A dissertation on sacred places of pilgrimage. By S′rísiddhántavágís′a Bhaṭṭáchárya. The work opens with a thesis on tírthas or sacred pools, how they attain their sanctity, and the reasons why they should be visited. Then follows a disquisition on the question, Who derives the benefit of visiting tírthas? Rules are then given regarding the duties to be observed when starting on a pilgrimage, what should be done, and what avoided in the way, the religious duties to be gone through at sacred pools, the importance of s′ráddha and tarpaṇa on such occasions, and what should be par-

ticularly avoided. Then come detailed notes on all the leading places of Hindu pilgrimage in India.

Beginning. गौरी द्गालोकनद्गीनलज्जं सञ्जातनानाविधभावजातं ।
वन्दे विरोधस्मृतिभूतभीत्या पञ्चाननं पञ्चशरप्रपन्नं ॥
सञ्चिन्तयामि सततं कमनीयमूर्त्तिं कान्ताः कथाः श्रुतिपथं मम ते विशन्तु ।
रम्यं +++ खलु नाम मदीयमौलौ मातर्भवानि करवाणि पदारविन्दे ॥
पुराणस्मृतितन्त्राणि विलोक्य बहुसङ्ग्रहान् ।
नत्वा गणेशं वागीशस्तनुते तीर्थकौमुदीं ॥
अथ तीर्थानि । गारुड़े । सूत उवाच । सर्व्वतीर्थानि वच्यामि गङ्गां तीर्थोत्त-
मोत्तमां । इत्यादि ।

End. अत्र त्यजन्ति ये प्राणान् जलाग्निस्थलगोचरे ।
तेऽपि स्वर्गमथाप्यादौ +++ चित्तमर्हति ॥
सम्मानं विविधं धनञ्च लभते यः कामरूपेश्वराद्
यः स्नान्ते +++ नितान्तममले नारायणं कारणं ।
यस्योर्व्वीकविता निसर्गमधुरा सत्तर्कगर्भा गिरो-
वागीशस्य मनोरमा कृतिरियं तस्यास्तु सत्प्रीतये ॥

Colophon. इति महामहोपाध्यायभट्टाचार्य्यश्रीसिद्धान्तवागीशविरचिता तीर्थकौमुदी समाप्ता

विषयः । तीर्थनिरूपणं । तीर्थफलभागिनिरूपणं । तीर्थेषु वर्ज्जनीयकथनं । गङ्गागर्भनिरू-
पणं । विशेषयात्राफलकीर्त्तनं । तीर्थयात्राविधिकथनं । यात्रादिने नान्दीश्राद्ध-
विधानं । तद्दिने पार्व्वणश्राद्धं कर्त्तव्यमिति व्यवस्थापकानां गणेश्वरमिश्रविद्यापत्यु-
पाध्यायवाचस्पतिमिश्राणां मतदूषणञ्च । तीर्थयात्रायां कर्त्तव्यानि । तत्र निषि-
द्धानि च । तीर्थस्नानविधिकथनं । तर्पणनिरूपणं । तत्र तिथिविशेषे ग्रहणादौ
च गङ्गादिस्नानविधानकथनं । प्रयोगादिकथनञ्च । अर्द्धोदयादियोगलक्षणं
नीलीरक्तादिवस्त्रपरित्यागकर्त्तव्यताविधानं । तीर्थश्राद्धविधानं । तीर्थे उपवास-
विधिकथनं । मुण्डनविधानकथनञ्च । तीर्थयात्रोत्तरं तत्र प्रवेशविधिकथनं
साधारणतः सकलतीर्थविधिकथनं । कामरूपतीर्थमाहात्म्यकथनं । कामरूप-
निर्णयः । तत्र यात्राप्रयोगकथनञ्च । कामरूपवायव्यभागतीर्थविधिः । एवं नैरृत-
तोत्तरादिभागस्थतीर्थविधानकीर्त्तनं । तत्र तत्र गयादितीर्थविधानकथनञ्च ।

No. 1735. प्रायश्चित्तेन्दुशेखरः ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 92. Lines, 8 on a page. Extent, 1,876 s'lokas. Character, Nágara. Date, Sm. 1838. Place of deposit, Lálgolá, Zilá Murshidábad. Kálicharana Upádhyáya. Appearance, fresh. Prose and verse. Correct.

Práyas'chittendū s'ekhara. An epitome of all the offences for which expiations have been ordained in the Smṛitis, and the nature and mode of performance of those expiations. By Nágojí Bhaṭṭa, son of S'iva Bhaṭṭa by Satí Deví. The author was a distinguished grammarian, and author of a great number of works on grammar and law, besides several commentaries. The offences noticed are all domestic and civil, and not religious arising from omission or flaws in the performance of Vedic rites. The work is one of a series of texts on the Smṛiti.

Beginning. नत्वा सतीं शिवं ढुण्ढिं भारतीं पितरौ तथा ।
नागोजीः कुरुते रम्यं प्रायश्चित्तेन्दुशेखरं ॥
तत्र प्रायश्चित्तलक्षणं । यद् यथाविध्यनुष्ठानादुपचितमशुभं नाशयत्येव तत् प्रायश्चित्तं ।

End. गङ्गास्नानविष्णुस्मरण-तन्नामजपादिकं सर्व्वपापप्रायश्चित्तमिति सर्व्वेष्टसिद्धिः ॥

Colophon. इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृतप्रायश्चित्तेन्दुशेखरः समाप्तः ।
संवत् १८३८ ।

विषयः । प्रायश्चित्तस्वरूपविचारः । संवत्सरं प्रायश्चित्ताकरणे व्यवस्थाकथनं । प्रायश्चित्तं यथोक्तमेव वाच्यं स्नेहलोभादिना अनुग्रहकरणे प्रत्यवाय इति निरूपणादिकं । कामतः प्रायश्चित्तादिभेदकथनं । जातिभ्रंशकरपापनिरूपणं । महापातकोपपातकादिनिरूपणं । सुरापानतुल्यपातित्यजनकक्रियानिरूपणं । एवं स्वर्णस्तेयादितुल्यपातकादिनिरूपणञ्च । ज्ञानतो ब्रह्महत्यादिकर्म्मविपाककीर्त्तनं । कृच्छ्रादिव्रतलक्षणं । दशविधनियमकीर्त्तनं । प्रायश्चित्तपूर्व्वाहकृत्यं । अनुतापादिविधानं । सर्व्वपापप्रायश्चित्तकथनं । अभ्यासे प्रायश्चित्तविधिकीर्त्तनं । गोवधप्रायश्चित्तकथनं । नीलीरञ्जितवसनधारणादौ प्रायश्चित्तं । रजस्वलादिगमने दिनभेदेन प्रायश्चित्तभेदनिरूपणं । गर्भाधानादिचूड़ाकरणान्तसंस्कारे दिवास्वप्ननग्नस्त्रीदर्शनादौ प्रायश्चित्तकथनं । निषिद्धकाष्ठेन दन्तधावने प्रायश्चित्तकथनं । गृहीतव्रतस्य प्रमादादिना भङ्गे प्रायश्चित्तकथनं । विप्रस्य शूद्रादिवृत्त्या धनार्ज्जने प्रायश्चित्तं । शूद्रस्य द्विजवृत्त्-

विषयः । वलम्बने प्रायश्चित्तं । देवागारशिलादिना खट्टकरणे प्रायश्चित्तं । निषिद्धदिने दन्तधावने प्रायश्चित्तं । विवाहात् पूर्व्वं कन्याया रजोदर्शने प्रायश्चित्तं । सुराघ्राणसुरापानादौ प्रायश्चित्तं । नित्यस्नानमकृत्वा भोजनादौ प्रायश्चित्तं । भार्य्यया सोदरादिना वा सार्द्धं भोजने प्रायश्चित्तं । पूर्व्वदिनभुक्तस्य वमने प्रायश्चित्तं । गोमांसादिभक्षणे प्रायश्चित्तं । पलाण्डुभक्षणादौ प्रायश्चित्तं । भोजनानन्तरं विट्स्पर्शादौ प्रायश्चित्तं । रजककर्म्मकारादीनामुच्छिष्टस्पर्शे प्रायश्चित्तं । उच्छिष्टभोजनादौ प्रायश्चित्तं । कुष्ठिकुनख्यादिस्पृष्टान्नभोजने प्रायश्चित्तं । यज्ञोपवीतच्छेदनादौ प्रायश्चित्तं । काष्ठवस्त्रादिना हीनशूद्रस्पर्शे प्रायश्चित्तं । चण्डालादिदर्शनप्रायश्चित्तं । चण्डालगृहप्रवेशे प्रायश्चित्तं । चण्डालादिभाण्डसंस्पृष्टाम्बुपानादौ प्रायश्चित्तं । मक्षिका-केशादिदूषितान्नभोजने प्रायश्चित्तं । विड़ाल-काकाखुगवाद्युच्छिष्टभोजने प्रायश्चित्तं । आपदि विप्रस्य शूद्रगृहभोजने प्रायश्चित्तं । विष्वनिवेदितभक्षणे प्रायश्चित्तं । शूद्रशवानुगमनादौ प्रायश्चित्तं । आत्मघातकपुत्रेण प्रायश्चित्तं कर्त्तव्यमिति कथनं । उच्छिष्टविप्रस्य अनुच्छिष्टशूद्रस्पर्शे प्रायश्चित्तं । उच्छिष्टस्य सूर्य्यादिदर्शने प्रायश्चित्तं । उच्छिष्ट-तैलाभ्यक्तादीनां मूत्रत्यागे प्रायश्चित्तं । रजस्वलानियमविधानं । जातिभ्रंशकरपापानुष्ठाने प्रायश्चित्तं । अपात्राय कन्यादानप्रायश्चित्तं । गोबधादिप्रायश्चित्तं । रोधादिप्रायश्चित्तकथनञ्च । गोबधापवादः । व्रात्यलक्षणं । तत्र प्रायश्चित्तविधानादिकं । स्तेयप्रायश्चित्तं । ऋणानपाकरणप्रायश्चित्तं । परिवेदनप्रायश्चित्तं । भृतकाध्यापनप्रायश्चित्तं । परदारकरणे प्रायश्चित्तं । मनुष्यादिबधप्रायश्चित्तं । स्त्र्यादिबधप्रायश्चित्तं । वृक्षच्छेदनप्रायश्चित्तं । कुक्कुरादिदंशने प्रायश्चित्तकथनं । व्रतभङ्गादिप्रायश्चित्तं मिथ्याभिशंसने प्रायश्चित्तकथनं । पुत्रविक्रयप्रायश्चित्तं । अयाज्ययाजनप्रायश्चित्तं । मातापितृपरित्यागे प्रायश्चित्तं । स्वाध्यायपरित्यागप्रायश्चित्तं । निन्दितान्नभोजनादौ प्रायश्चित्तं । उच्छिष्टाभक्ष्यभक्षणप्रायश्चित्तं । अशुचिद्रव्यस्पर्शे प्रायश्चित्तं । यवनाद्यन्नभोजनप्रायश्चित्तं । श्राद्धभोजनप्रायश्चित्तादिकथनं । जातमृताशौचान्नभोजनप्रायश्चित्तं । वशीकरणाभिचारादौ प्रायश्चित्तं । ब्रह्महत्यासुरापानादिमहापातकप्रायश्चित्तं । संसर्गप्रायश्चित्तकथनञ्च ।

No. 1736. शुद्धिविवेकः ।

Substance, country-made paper, 11½ × 5 inches. Folia, 35. Lines, 10 on a page. Extent, 786 s'lokas. Character, Nágara. Date, Sm. 1859. Place of deposit, Lálgolá, Zilá Murshidábád. Kálícharaṇa Upádhyáya. Appearance, fresh. Prose and verse. Correct.

S'uddhi-viveka. A treatise on impurity of the person arising from birth or death in one's family, or from causes confined to one's person. A Smṛiti compilation. By Rudradhara. The author wrote several other treatises under the generic nature of Viveka.

Beginning. हरतु दुरितजातं केशवस्यैकवाङ्घ्रिर्विपुलगलविलान्तः केशिनः सम्प्रविष्टः ।
अंसुपवनमिवास्य प्राशितुं सम्प्रवृत्तः कुवलयदलनीलः पञ्चशीर्षो भुजङ्गः ॥
चिरन्तनानेकनिबन्धसिद्धः सुसम्प्रदायानुगतः स्फुटार्थः ।
नत्वा हरिं रुद्रधरेण सम्यक् वितन्यते शुद्धिविवेक एषः ॥
सन्त्वेव रत्नाकरपारिजातमिताक्षराहारलतादयोऽन्ये ।
तथापि तत्रालसमानसानां भवेत् प्रमोदाय मम प्रयासः ॥
शुद्धिस्तावदखिलविहितकर्म्माधिकारापादको धर्म्मविशेषः । इत्यादि ।

End. अत्र च समस्ते एव प्रकरणे तत्तत्कार्य्यविशेषे एव अशौचाभावः, न सर्व्वकार्य्ये अशौचाभाव इत्यवधातव्यम् ।

Colophon. इति रुद्रधरकृतौ शुद्धिविवेके जननमरणयोः शुद्धिपरिच्छेदः । इति शुद्धिविवेकः सम्पूर्णः । संवत् १८५९ ।

विषयः । शुद्धिपदार्थनिरूपणं । अशौचस्वरूपनिरूपणं । सामान्यतश्चातुर्वर्ण्यस्य अशौचनिरूपणं । जननाशौचविधिः । यावज्जीवाशौचकथनं । बालाद्यशौचविधानं । स्त्र्यशौचविधिः । गर्भस्रावाद्यशौचविधिः । मृत्युविशेषाशौचविधानं । सद्यःशौचविधिः । सपिण्डाद्यशौचविधिः । निर्हाराद्यशौचविधिः । अशौचाभावकथनं । अनशौचिनः ।

No. 1737. मार्त्तण्डवल्लभा ।

Substance, country-made paper, 11 × 5 inches. Folia, 120. Lines, 8 on a page. Extent, 2,842 s'lokas. Character, Nágara. Date, Sм. 1847. Place of deposit, Lálgolá, Zilá Murshidábád, Paṇḍit Kálícharana Upádhyáya. Appearance, fresh. Prose. Correct.

Mártaṇḍa-vallabhá. A commentary on his astronomical treatise called Muhúrta-mártaṇḍa. By Náráyaṇa, son of Ananta Agnihotri, grandson of Hari, great-grandson of S'ríkṛishṇa, and great-great-grandson of Ananta of the Kaus'ika gotra, and an inhabitant of the town of Sárasanan, modern Sáran. The work was completed in the S'aka year 1484—A. D. 1549.

Beginning. मार्त्तण्डोऽवतु वाचं नः पादैर्जाग्रतमोहरः ।
हत्तबद्धतनुः सेव्योऽभीष्टदो विश्वलोचनः ॥
अर्थद्वयवाची । तत्र प्रथमं सूर्य्यपक्षे । मार्त्तण्डः श्रीसूर्य्यः नोऽस्माकं वाचमवतु रक्षतु । किं लक्षणो मार्त्तण्डः । हत्तबद्धतनुः । हत्ते मण्डले बद्धा तनुः येन स तथा । तथा च स्मृतौ इत्यादि ।

End. अथैतद्ग्रन्थमङ्गीकरणार्थं बुधप्रार्थना । पूर्व्ववाक्यार्थमिति । सुगमं ।
आसीत् सारसणीरनामनगरे श्रीकौशिकस्यान्वये-
ऽनन्तो राजसभेऽपि पूज्यचरणो माध्यन्दिनग्रामणीः ।
श्रीकृष्णस्तनयः श्रुतिस्मृतिविदामग्रेसरेज्यो हरि-
स्तत्पुत्रः श्रुतिवित् तदात्मजवरोऽनन्ताग्निहोत्री गुरुः ॥
तत्पुत्रस्तदनुग्रहात्तधिषणो नारायणो + पर-
ग्रामे शिष्यगणेच्छया निजकृतग्रन्थस्य टीकां स्फुटां ।
चक्रे + कृपया परोपकृतये शोध्यं दुरुक्तं बुधै-
+ दृष्टस्य विलोक्य धार्ष्ट्यमपि ते कुप्यन्ति नो सज्जनाः ॥
सुखनिधिपुरुषार्थव्यासमाभिः समाभिः
१४८४ परिमितशककाले जातमार्त्तण्डटीकां ।
लिखति पठति विप्रः सोऽत्र भूत्वा धरित्र्यां
सुखनिधिपुरुषार्थव्यासमानाश्समावान् ॥

Colophon. इति श्रीमदनन्तात्मजचातुर्मास्ययाजिपुत्रनारायणविरचिते मुहूर्त्तमार्त्तण्डे स्वकृत-टीका मार्त्तण्डवल्लभा समाप्ता । संवत् १८४७ ।

विषयः । निजकृतमुहूर्त्तमार्त्तण्डस्य व्याख्यानं ।

No. 1738. श्राद्धकाशिका ।

Substance, country-made paper, 11 × 4½ inches. Folia, 80. Lines, 7 on a page. Extent, 1,520 s'lokas. Character, Nágara. Date, Sm. 1838. Place of deposit, Lálgolá, Zilá Murshidábád, Paṇḍit Kálícharaṇa Upádhyáya. Appearance, fresh. Prose and verse. Correct.

S'ráddha-kás'iká. A dissertation on the rite of S'ráddha according to the rules of Kátyáyana. By Kṛishṇa Mis'ra, son of Vishṇu Mis'ra, grandson of Atisukha, and great-grandson of Nityánanda. The several ancestors named were great Smṛiti scholars and authors.

Beginning. यस्य प्रसादपयसा क्रतुपादपास्तं कात्यायनं मुनिवरं शिरसाऽभिवन्दे।
सिक्ताः फलन्ति यजुषामिह याजकानां स्वर्गोद्भवानि विविधानि फलान्यजस्रं॥
कर्कोपाध्य++गभीरवचनैः सूत्रं यतोऽस्माद्भू-
र्दुर्बोधश्च ततो हलायुध इति व्याख्यां तथाप्यस्फुटां।
भूयोऽपि प्रतिषेधकारिवचनैः स्मार्त्तैर्मया काशिका
सूत्रस्योपरिसंशयौघतिमिरध्वंसाय संतन्यते॥
सूत्रार्थव्यञ्जकाद्वाक्यैर्विशेषोक्तिप्रकाशनात्।
अस्यान्वार्थमिदं नाम ग्रन्थस्य श्राद्धकाशिका॥
नित्यानन्द इतीह याजकवरो जातस्तदीयः सुतः
स्मार्त्ताग्नौ विहितक्रियोऽतिसुख इत्याख्यो जगत्यद्भुतः।
तत्पुत्रोऽप्यभवत् स्मृतौ सुचतुरः शास्त्रेष्वधीतिः श्रुतौ
विष्णुर्मिश्र इमं निबन्धमकरोत् कृष्णः कृती तत्सुतः॥
अत्र पूर्व्वां पौर्णमासीमुत्तरामुपवसेदित्यादिना श्रौतकर्म्माण्युपदिश्य। अथातो गृह्यस्थालीपाकानामित्यादिना स्मार्त्तान्याख्याय अवशिष्टं श्राद्धकर्म्म कर्त्तव्यमिति सूत्रमारभते। अपरपक्षे श्राद्धं कुर्व्वीत।

End. प्रत्याब्दिके निवृत्ते तु पश्चान्नित्यं समाचरेत्।
अनयोर्भिन्नतन्त्रत्वात् स्थालीपाकाग्निहोत्रवदिति॥

Colophon. इति श्रीकृष्णमिश्रविरचितायां श्राद्धकाशिकायां सूत्रवृत्तौ एकोद्दिष्टश्राद्धं समाप्तं। संवत् १८३८।

विषयः। कात्यायनप्रणीतगृह्यसूत्रीयश्राद्धप्रकरणस्य व्याख्यानं।

No. 1739. हनूमन्नाटकं, वा महानाटकं।

Substance, country-made paper, 11 × 4½ inches. Folia, 46. Lines, 12 on a page. Extent, 1,775 s'lokas. Character, Nágara. Date, Sm. 1844. Place of deposit, Lálgolá, Zilá Murshidábád, Paṇḍit Kálícharaṇa Upádhyáya. Appearance, fresh. Prose. Incorrect.

Hanumannáṭaka alias *Mahánáṭaka.* A drama on the exploits of Ráma. It is said that this work was originally composed by Hanumán, the monkey general of Ráma, and inscribed on slabs of stone; but Válmíka, happening to read it, thought it too exquisite for human perusal, and, not without some apprehension lest it should supersede his own epos on the subject, caused the stones to be thrown into the sea. Thus the

work was lost for a long time. The stones, however, were recovered during the reign of Bhoja Rájá of Dhárá, and decyphered and restored by one of his court paṇḍits named Damodara Mis'ra. Its original name was not found out, and so it was called after its author's name. On account of its great excellence it was also called *Mahá-náṭaka*, 'the Great Drama'. According to popular tradition, Kálidása of Bhoja's court was the restorer; but this is contradicted by the commentator. Some Bengali paṇḍits believe the restorer to have been one Madhusúdana Mis'ra; two MSS., however, contradict that opinion.

Beginning. कल्याणानां निधानं कलिमलमथनं पावनं पावनानां
पाथेयं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।
विश्रामस्थानमेकं कविवरवचसां जीवनं जीवनानां
वीजं धर्म्मद्रुमस्य प्रभवतु भवतां भूतये रामनाम ॥
पांतु श्रीस्तनपत्त्रभङ्गमकरीमुद्राङ्किताेरःस्थलाे
देवः सर्व्वजगत्पतिर्मधुवधूवक्त्राब्जचन्द्रोदयः ।
क्रीड़ाक्रोड़तनोर्नवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भू-
र्भाति स्म प्रलयाब्धिपल्वलतलोत्खातैकमुस्ताकृतिः ॥
यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशास्त्रनिरताः कर्म्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥
आसीदुद्भटभूपतिप्रतिभटप्रोन्माथिविक्रान्तिको
भूपः पङ्क्तिरथो विभावसुकुलप्रख्यातकेतुर्बली ।
उर्व्यां वर्व्वरभूरिभारहृतये भूरिश्रवाः पुत्रतां
यस्य स्वांशमथो विधाय महितः पूर्णश्चतुर्द्धा विभुः ॥ इत्यादि ।

End. चतुर्द्दशभिरेवाङ्कैर्भुवनानि चतुर्द्दश ।
श्रीमहानाटकं धत्ते केवलं वर्त्म निर्म्मलं ॥
रचितमनिलपुत्रेणाथ वाल्मीकिनाब्धौ निहितमम्टतबुद्ध्या प्राङ्महानाटकं यत् ।
सुमतिन्टपतिभोजेनोद्धृतं तत् क्रमेण ग्रथितमवतु विश्वं मिश्रदामोदरेण ॥

Colophon. इति श्रीमद्धनूमद्विरचिते महानाटके श्रीरामविजयो नाम चतुर्द्दशोऽङ्कः ।
संवत् १८४४ ।

विषयः । रामचरित्रवर्णनं । (अस्मद्देशे तु मधुसूदनमिश्रसङ्गृहीतं नाटकमिदं परं प्रच-

रति। अनयोः प्रतिपाद्यांशे एकत्वेऽपि पाठान्तराणि सुबहूनि उपलभ्यन्ते, उपलभ्यन्ते च विभिन्नप्रकृतयो बहवः श्लोकाः। इति सुधीभिरवधेयम्॥)

No. 1740. हनूमन्नाटकदीपिका।

Substance, country-made paper, 11 × 4½ inches. Folia, 91. Lines, 6 on a page. Extent, 2,700 s'lokas. Character, Nágara. Date, Sm. 1844. Place of deposit, Lálgolá, Zila Murshidábád, Paṇḍit Kálicharaṇa Upádhyáya. Appearance, fresh. Verse. Incorrect.

Hanumannáṭaka-dípiká. A commentary on the Hanumannáṭaka, the work described under the last preceding No. By Mohanadása Mis'ra.

Beginning. हृदये यत्प्रेरणया समुद्यतोऽहं विमूढतरबुद्धिः।
तत्पदकमलं वन्दे गोकुलनाथस्य वेदादेः॥
हनूमन्नाटकसागरशब्दार्थागाधतां ++धलं।
नेतुं कृतसाहसतां मम सुधियः ++ भवन्तु॥
तावत् श्रीरामचन्द्रगुणचक्रबालवर्णनेच्छुः कविः स्वाभीष्टदेवतानामान्तरिताशिःपूर्व्वां नान्दीमवतारयति,—कल्याणानामिति द्वादशपदैः। तदुक्तं नाटकावतारे,—
अष्टाभिर्दशभिर्वापि नान्दी द्वादशभिः पदैः।
आशीर्नमस्क्रिया वस्तुनिर्द्देशो वापि तन्मुखमिति॥

End. अत्रेयं कथा पूर्व्वमेवेदं टङ्कैर्गिरिशिलासुलिखितं, तत्तु वाल्मीकिना दृष्टं। तदैतस्य अतिमधुरत्वमाकलय्य ++प्रचारभावशङ्कया हनूम++++ त्वं समुद्रे निधेहि। तथेति तेनाब्धौ प्रापितं। ++भग्नेन भोजेन बल++रुद्धृतमिति॥
माथुरकुलसम्भूतिः सिद्धचतुर्व्वेदिविख्यातः।
तत्पुत्रेण मयासौ मोहनदासनाम्ना विहितः॥
* * * * * * * * * * *

Colophon. इति श्रीमिश्रमोहनदासविरचितायां श्रीहनूमन्नाटकदीपिकायां चतुर्द्दशोऽङ्कः। शुभमस्तु। संवत् १८४४।

विषयः। दामोदरमिश्रसङ्गृहीतस्य महानाटकापराभिधानस्य हनूमन्नाटकस्य व्याख्यानं।

No. 1741. स्कन्दपुराणीयशङ्करसंहिताया दक्षकाण्डं ।

Substance, country-made paper, 14 × 7 inches. Folia, 112. Lines, 8 on a page. Extent, 3,024 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilá Murshidábád. Rájá Rámachánd Siñha. Appearance, fresh. Verse. Correct.

S'aṅkara Sañhitá. An episode of the Skanda Purāṇa, giving an account of the history of S'aṅkara. The codex is limited to that portion of the work which refers to the dispute between S'aṅkara and his father-in-law Daksha, and its consequences. No complete codex of the S'aṅkara Sañhitá has yet been met with, nor is it referred to in the Index to the Skanda Purāṇa given in the Nárada Purāṇa.

Beginning. श्रीगणेशाय नमः । ऋषय ऊचुः ।
दक्षाध्वरस्त्वया प्रोक्तः पुरा सूत तपोधन ।
जयन्तायेन्द्रपुत्राय समासेन बृहस्पतिः ॥
प्रोक्तवानिति तं भूयो विस्तराद्वक्तुमर्हसि ।
तद्देतेषां वचः कर्णे कृत्वा प्राह ऋषीश्वराः ॥
शृण्वन्तु ब्राह्मणाः सर्व्वे भवन्तो ब्रह्मवित्तमाः ।
सत्यलोके पुरा ब्रह्मा सर्व्वैर्द्देवैस्तपोधनैः ॥
ऋषिभिर्द्दशभिः पुत्रैः प्रजापतिभि+++ ।
दक्षोऽयं प्रथमस्तस्य पुत्रोऽयं ब्राह्मणोत्तमाः ॥
प्रणम्य पितरं मूर्द्ध्ना पप्रच्छ जगतां प्रभुं ।
भोः पितर्ज्ञातसर्व्वार्थं सर्व्ववेदार्थकोविद ॥
को वा मध्ये त्रिमूर्त्तीनां वरिष्ठो जगतां प्रभुः ।
परिपूर्णः परं ज्योतिः सर्व्वव्यापी सनातनः ॥
कर्त्ता सर्व्वस्य जगतः पालको हारकस्तथा ।
सर्व्वजीवेषु सर्व्वत्र साक्षिरूपेण संस्थितः ॥
इति तस्य वचः श्रुत्वा ब्रह्मा ध्यात्वा ++ हृदि ।
आनन्दाश्रुपरीताक्षो हर्षगद्गदवाक् क्षणं ॥ इत्यादि ।

End. विराजते महादेव्या नित्यं मुदितमानसः ।
अण्डस्यास्य वहिर्भागे रुद्रास्तिष्ठन्ति रक्षकाः ॥
यल्लक्षणं यत्प्रमाणमिदमण्डं मयोदितं ।
तल्लक्षणप्रमाणानि बहून्यण्डानि भूसुराः ॥

Colophon. इत्यादिमहापुराणे स्कान्दे शङ्करसंहितायां दक्षकाण्डे चत्वारिंशोऽध्यायः। दक्षकाण्डं समाप्तं।

विषयः। १–४ अध्याये,—ब्रह्मणा सह दक्षस्य संवादेन जगत्कारणं शम्भुरेवेति कथनं। तस्य सर्व्वव्यापित्वादिनिरूपणं। जगतो ब्रह्मात्मकत्वकथनं। शिवस्य पतित्वकथनपूर्व्वकं ब्रह्मादीनां सर्व्वेषां जीवानां पशुत्वकथनं। दक्षस्य मानससरसि शिवाराधनार्थं गमनादिकथनं। शिवाल्लब्धवरेण दक्षेण पुरीनिर्म्माणादिवृत्तान्तकथनं। दक्षस्योपदेशेन तत्पुत्राणां स्रष्टृत्वमाप्तुमिच्छया मानससरोवरे तपस्यतां तत्र नारदसमागमेन विवेकोदयात् मोक्षाभिलाषादिविवरणकथनं। तच्छ्रुत्वा दक्षेण पुनः शतपुत्रसृष्टिकरणादिवृत्तान्तकीर्त्तनं। अथ भूयोऽपि नारदोपदेशेन तेषु मुमुक्षया तपश्चरत्सु क्रुद्धेन दक्षेण पुत्रसृष्टिं विहाय त्रयोविंशतिकन्यासृष्टिविवरणकथनं। वसिष्ठात्रिप्रमुखेभ्यः तासां सम्प्रदानकथनं। पुनः सप्तविंशतिकन्यकासर्ज्जनपूर्व्वकं चन्द्रमसे सम्प्रदानकथनं। अथ कृत्तिकायां नितरामनुरक्ततया ‘क्षयरोगी भवेति’ दक्षशापग्रस्तस्य चन्द्रस्य शिवाराधनादिवृत्तान्तकथनञ्च।

५–९ अध्याये,—शिवाशिवयोः संवादेन जगत्कारणादिकथनं। देवानां प्रार्थनया शिवस्योपदेशेन च देव्याः कन्यारूपायाः पद्मवने अवस्थानकथनं। दक्षेण कन्यात्वेन तद्ग्रहणादिविवरणकथनञ्च। पशुपतिं पतित्वेन प्राप्तुं दक्षगृहे स्थित्वा तपश्चरन्त्याः गौर्य्याः पुरतः वृद्धब्राह्मणरूपेण शिवस्य गमनरहस्यवर्णनादिकं। शिवाशिवयोः विवाहोत्सववर्णनं। अकस्मादन्तर्हिते अन्धकरिपौ देव्याः पुनस्तपस्यादिकथनं। शिवसमागमवर्णनञ्च। एकदा दुहितृजामातरौ द्रष्टुकामेन दक्षेण कैलासगिरिं समुपेत्य अन्तर्गृहप्रवेशकाले द्वारस्थैर्वार्य्यमाणेन शिवनिन्दनादिवृत्तान्तकथनं। ब्रह्मणो यज्ञानुष्ठानविवरणकथनं। तत्र नन्दिना सार्द्धं दक्षस्य विवादादिवर्णनञ्च।

१०–१४ अध्याये,—दक्षकृतयज्ञवर्णनं। तत्र शिवभक्तानामनागमनमाकलय्य दक्षस्य चेष्टितादिकथनं। शिवनिन्दाकारिणा दक्षेण सार्द्धं दधीचेः संवादकथनं। तत्र शिवस्य परब्रह्मत्वादिकीर्त्तनं। रुद्रनामनिर्व्वचनविवरणकथनं। दक्षेण शिवचारित्रोद्देशपुरःसरं तत्र तत्र दोषारोपणादिकं। महादेवः कथं दिगम्बर इति कारणं। पुरा किल दारुकवने तपस्यतां तपोधनानां मोहनाय मोहिनीवेशधारिणा श्रीधरेण सादरमभ्यर्थितो महादेवो भस्मकपालादिधारणेन विचित्रं योगिवेशमास्थाय तत्र प्रविवेश। अथ भिक्षां दातुं तत्सान्निध्यमुपागतास्तपोधनकामिन्यः कामवाणस्य अप्रतिहतप्रभावतया तत्संसर्गात् सञ्जातगर्भाः पुत्रानजीजनन्। तदा तत्प्रवृत्तिमुपलभ्य जातक्रोधैस्तपस्विभिः मृत्युञ्जयं हन्तुं महानेकः शार्दूलः सृष्टजे

विषयः। स चागत एव भगवता निपातितश्चर्म्ममात्रेण तत्परिधेयतामधिजगाम। अथ ते भूयोऽपि परशुम्रगादीन् समुत्पाद्य तदन्तिकं प्रेरयामासुः। भगवानपि भूषणाय तान् स्वकरे दधारेति विवरणकथनञ्च।

१५–२० अध्याये,—विधातृलब्धवरेण गजासुरेण विप्रकृतानां देवानां दुरवस्थावर्णनं। विरूपाक्षेण तं निपात्य तच्चर्म्मधारणादिवृत्तान्तकथनं। विष्णुना वराहरूपेण हिरण्याक्षं विनाश्य तद्रुधिरधारया मत्यर्थं दृप्तेन चराचरमिदं दन्ताघातेन बबाधे। अथ ब्रह्मादिभिः सम्प्रार्थितो महादेवः तां दंष्ट्रामुत्पाट्य स्वकरे धारयामासेतिवृत्तान्तकथनं। शिवेन समुद्रमन्थनकाले मन्दराघातेन चञ्चलस्य कूर्म्मरूपस्य पृष्ठास्थिग्रहणादिविवरणकथनं। तत्र विषाग्निदग्धस्य विष्णोः कृष्णत्वकथनं। शिवकृतपानकथनं। देवगणकृतनीलकण्ठस्तोत्रकथनं। शिवस्य भिक्षावृत्त्यवलम्बनकारणकथनं। तत्र 'अहमेव जगत्कर्त्तेति' विवदमानयोः पद्मनाभ-पद्मजन्मनोः पुरतः शिवस्य आविर्भावादिकथनं। कालभैरवस्य उत्पत्तिकथनं। तत्कृतब्रह्मशिरश्छेदनं। विष्ण्वादीनां रुधिरग्रहणादिवृत्तान्तकथनञ्च।

२१–२५ अध्याये,—वृषरूपधारिणा हरिणा हरवाहनत्वप्राप्तिविवरणकथनं। शिवस्य कपालभस्मधारणादिविवरणकथनं। सागरगर्भनिक्षिप्तेन हररोषानलेन जालन्धरस्य उत्पत्त्यादिकथनं। तदुपद्रुतानां केशवादीनां प्रार्थनया महादेवेन तद्वधवृत्तान्तकथनं। वृन्दाभिधानां जलन्धरकामिनीं कामयमानस्य विष्णोः केनाप्युपायेन अकृतार्थस्य जलन्धरीयमृतशरीरं प्रविश्य तया सह सम्भोगादिवर्णनं। वृन्दावीजेन ब्रह्मवाक्यतः श्मशानोषरभूमिषु तुलस्या आधिक्यादिविवरणकथनञ्च। पार्व्वत्याः करतलजातस्वेदसलिलेन गङ्गाया उत्पत्त्यादिविवरणकथनञ्च।

२६–३५ अध्याये.—शुक्राचार्य्योपदिष्टस्य मृतसेनस्य आदेशेन विभूतिनामिकायाः असुरकामिन्याः मागधाख्ययोगिवरमोहनाय मेरुप्रदेशगमनादिविवरणकथनं। करिणीरूपया तया सार्द्धं करिरूपधारिणो मागधस्य विहारादिवर्णनं। तत्र गजमुखस्य दैत्यस्य जन्मादिकथनं। पार्व्वतीपरमेश्वरयोः अक्षक्रीड़ायां साक्षिरूपेण विष्णोरवस्थानविवरणकथनं। पार्व्वत्याः शापेन विष्णोरजगररूपेण वटद्वीपे अवस्थानकथनं। गणेशेन सह गजमुखमित्रस्य मृतसेनस्य युद्धवर्णनं। गणेशवाणविद्धस्य गजमुखस्य मूषिकरूपग्रहणकथनं। गणेशेन वाहनत्वेन तदारोहणादिकीर्त्तनं। शुक्राचार्य्यमृतसेनयोः पक्षिरूपेण ततः पलायनादिविवरणं। गणेशदर्शनेन अजगररूपस्य हरेः स्वरूपप्राप्तिकथनञ्च।

३५–४० अध्याये,—शिवमाहात्म्यश्रवणेनापि यदा दक्षस्य सुमतिर्न जाता, तदा दधीचेः ततः प्रस्थानकथनं। नारदमुखात् पितृगृहे यज्ञानुष्ठानं श्रुत्वा शिवस्या-

विषयः । देशेन दाक्षायण्यास्तत्र गमनादिवर्णनं। तत्र दक्षकृतशिवनिन्दां निशम्य विमाना-रोहणेन देव्या पुनः कैलासागमनपूर्व्वकं शिवसमीपे तद्वृत्तान्तकीर्त्तनं। शिवाशिवयोः क्रोधेन भद्रकालीवीरभद्रयोराविर्भावकथनं। शिवाज्ञया डाकिनी-शाकिनी-हाकिनीप्रभृतिभिः सार्द्धं तयोः दक्षालयगमनादिविवरणकथनं। दक्षस्य शिर-श्छेदनादिकथनं। वीरभद्रकृतब्रह्मेन्द्रादिदुरवस्थावर्णनं। तस्य विष्णुना सह समरसंरम्भवर्णनं। विष्णुकृततत्स्तोत्रकीर्त्तनं। अथ तत्र शिवाशिवयोरागमनेन देवानां जीवनप्राप्तिः, दक्षस्य पुनरुज्जीवनकथनञ्च। दक्षसमीपे ब्रह्मणा विस्तरतः शिवमाहात्म्यकथनं। पृथिव्याः संस्थापनादिकथनं। भूगोलकथनञ्च।

No. 1742. भविष्यपुराणं।

Substance, country paper, 14 × 5 inches. Folia, 148. Lines, 8—9 on a page. Extent, 3,497 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilá Murshidábád, Rájá Rámachánda Siñha. Appearance, fresh. Verse. Correct.

Bhavishya Puráṇa. One of the 18 great Puráṇas. The codex comprises the third book or *Madhya Tantra.* The following is Professor Wilson's account of the work.

"'The Puráṇa in which Brahmá, having described the greatness of the sun, explained to Manu the existence of the world, and the characters of all created things, in the course of the Aghora Kalpa, that is called the Bhavishya; the stories being, for the most part, the events of a future period. It contains fourteen thousand five hundred stanzas.' This Puráṇa, as the name implies, should be a book of prophecies, foretelling what will be (bhavishyati), as the Matsya Puráṇa intimates. Whether such a work exists, is doubtful. The copies, which appear to be entire, and of which there are three in the library of the East India Company, agreeing, in their contents, with two in my possession, contain about seven thousand stanzas. There is another work, entitled the 'Bhavishyottara,' as if it was a continuation or supplement of the former, containing, also, about seven thousand verses: but the subjects of both these works are but to a very imperfect degree analogous to those to which the Matsya alludes.

"The Bhavishya Puráṇa, as I have it, is a work in a hundred and twenty-six short chapters, repeated by Sumanta to S'atáníka, a king of the Páńdu family. He notices, however, its having originated with Svayambhu or Brahmá, and describes it as consisting of five parts; four dedicated, it should seem, to as many deities, as they are termed, Bráhma, Vaishṇava, S'aiva, and Tváshtrá; whilst the fifth is the Pratisarga or repeated creation. Possibly, the first part only may have come into my hands; although it does not so appear by the manuscript."

The codex under notice comprises the *Madhya Tantra* or the 3rd, literally the middle, book. It extends to 3,500 verses, divided into 3 parts; the first of which contains 25 chapters, the second 17, and the third 11. The first, after the usual preliminaries, describes some of the higher regions. The duties and characteristics of householders, the qualifications of teachers, and the teaching of the Vedas take up several chapters. Consecrations of tanks and religious gifts are also dwelt upon at length. The second part refers to religious duties, the times meet for performing them, and fasts and feasts on particular lunar days. The third dilates on dedications of alms-houses, tanks, wells, trees, &c., in the usual Puráṇic style. Nowhere is anything said of future events.

Beginning. ॐ नमः शिवाय। स्वच्छं चन्द्रावदातं करिकरमकरक्षोभसञ्जातफेणं
ब्रह्मोद्भूतिप्रसक्तैर्व्रतनियमपरैः सेवितं विप्रमुख्यैः।
ॐकारालङ्कृतेन त्रिभुवनगुरुणा ब्रह्मणा दृष्टपूतं
सम्भोगाभोगरम्यं जलमशुभहरं पौष्करं वः पुनातु॥
जयति भुवनदीपो भास्करो लोककर्त्ता जयति च प्रतिदेहं शार्ङ्गधन्वा मुरारिः।
जयति च शशिमौलीरुद्रनामाभिधेयो जयति सकलमौलिर्भानुमांश्चित्रभानुः॥
नमस्कृत्याप्रमेयाय भक्ताय ब्रह्मरूपिणे।
पुराणं सम्प्रवक्ष्यामि यदुक्तं ब्रह्मयोनिना॥
पुराणसंहितां पुण्यां पप्रच्छ रोमहर्षणं।
ऋषय ऊचुः। वक्तुमर्हसि चास्माकं पुराणार्थं विशारद।
मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः॥
प्रणम्य मनसा प्राह गुरुं सत्यवतीसुतं।
सूत उवाच। नमस्कृत्य जगद्योनिं ब्रह्मरूपधरं शिवं।
वक्ष्ये पौराणिकीं दिव्यां कथां पापप्रणाशिनीं॥

End. त्रिसहस्रभागशेषमादित्याय सहस्रकं ।
त्र्यम्बकाय तथा दद्यात्तथा धनञ्जयाय च ॥
षट्पादिकाष्टसाहस्रं नवश्लोकशतोद्भवं ।
इति मध्यमतन्त्रेण सम्पूर्णं स्याद्भविष्यकं ॥

Colophon. इति श्रीभविष्यपुराणे मध्यमतन्त्रे तृतीयभागे एकादशोऽध्यायः ।
श्रीराधाकृष्णाभ्यां नमः ।

विषयः । एतत्तन्त्रे प्रथमविभागे १, २ अध्याये,—सूतेन सह ऋषीणां संवादेन उत्तरविभाग-प्रतिज्ञादिकथनं । गार्हस्थ्याश्रमप्रशंसाकीर्त्तनं । धर्म्ममाहात्म्यकथनं । प्रवृत्तिनिवृत्ति-भेदात् द्विविधकर्म्मनिरूपणं । निवृत्तिप्रशंसा । शमदमादिषोडशविधगुणनिरूपणं । ब्राह्मणादीनां गुणनिरूपणं । रुद्रात् जगत्सृष्टिप्रक्रियाकथनं । तत्र विशेषेण सेश्वरसाङ्ख्यमतोपपादनञ्च । रुद्राद् ब्रह्मविष्ण्वोरुत्पत्तिकथनादिकं । युगमन्वन्तर-कालादिनिरूपणं ।

३, ४ अध्याये,—महर्लोकतपोलोकादीनां संस्थानादिनिरूपणं । तत्र तत्र अधि-वासिकथनञ्च । ब्रह्मलोकादिवर्णनं । रुद्रलोकवर्णनं । सप्तपातालवर्णनं । जम्बू-प्लक्षादिसप्तद्वीपवर्णनं । जम्बूद्वीपसंस्थानादिकथनं । तत्र वर्षपर्व्वतादिस्थाननि-र्द्देशः । ज्योतिश्चक्रनिरूपणं । तत्र सूर्य्यसोमादीनां शीघ्रगामित्वादिनिरूपणं । तेषामुच्चनीचत्वादिकथनञ्च ।

५ अध्याये,—ब्राह्मणप्रशंसाकथनं । ब्राह्मणमुखेन देवपितृलोकप्रभृतीनां भोक्तृत्व-कथनं । ब्राह्मणं दृष्ट्वा अनभिवादनादौ प्रत्यवायकथनं । मनुष्येषु त्रिविधाधम-लक्षणकथनं । द्विविधविषमलक्षणं । चतुर्व्विधपशुलक्षणं । त्रिविधपिशुनलक्षणं । त्रिविधपापिष्ठलक्षणं । सप्तविधनष्टलक्षणं । पञ्चविधलक्षणं । द्विविधदृष्टलक्षणं । षड्विधदुष्टलक्षणं । द्विविधपुष्टलक्षणं । अष्टविधक्लिष्टलक्षणं । द्विविधानन्दलक्षणं । द्विविधकाणलक्षणं । सरण्डलक्षणं । त्रिकुष्ठलक्षणं । चण्ड—चपल—मलीमस—चतु-रादीनां लक्षणं । दण्ड—पण्ड—खल—नीच—वाचाल—कदर्य्यप्रभृतीनां लक्षणकथन-मेषामवान्तरभेदनिरूपणञ्च ।

६, ७ अध्याये,—गुरुनिरूपणं । द्वादश्यमावास्यादिषु दानविधानं । अपरपक्षे तर्पणविधिः । तत्र पितृस्तोत्रकथनं । ज्येष्ठस्य भ्रातुः पितृतुल्यत्वकथनं । पुराण-श्रवणफलकथनं । तत्र क्रमकथनं । धर्म्मशास्त्रागम—तन्त्र—जामल—डामर—पारा-यणादीनामधिष्ठातृदेवताकथनं । मधुक्षीरयवक्षीरादिपरिभाषाकथनं । रुद्रस्याग्रे वासुदेवगुणकीर्त्तने फलकथनं । दुर्गाग्रे तत्करणे दोषकथनं । पुस्तकादिहरणे दोषकीर्त्तनं । पुराणादिलेखननियमादिकथनं । अब्राह्मणेन लिखितस्य पुस्तकस्य

विषयः। निष्फलत्वकथनं। लिपिकरणे दिङ्निरूपणं। निषिद्धदिनकथनं। लिपिकरण वेतनग्रहणादौ प्रत्यवायकथन। पुस्तकपरिमाणादिनिरूपणं। ताड़ितागुरुभुर्ज्ज-पत्रादिविधानं। पुराणपाठे स्वरादिविधिकीर्त्तनं। शूद्रस्य धर्म्मशास्त्रादिवाचन-प्रतिषेधः। पुराणवाचकस्य व्यासोपाधित्वकथनं।

८–१२ अध्याये,—अनध्यायकालनिरूपणं। छात्रलक्षणं। अध्यापनाप्रकारकथनं। म्लेच्छोक्तशास्त्रादिपरिहारावश्यकताकथनं। कलौ निगम–ज्योतिष–वेदादीनां सङ्ग्रहे दोषकथनं। अन्तर्वेदिवहिर्वेदिकर्म्मनिरूपणं। देवगृहनिर्म्माणादिविधि-कथनं। पुष्करिणीदीर्घिकादिपरिमाणकथनं। प्रासादपुष्करिण्यादिप्रतिष्ठाया अकरणे दोषकीर्त्तनं। पतितदेवगृहादिसंस्करणे फलकथनं। जलाशयदानादि-माहात्म्यकीर्त्तनं। शिवलिङ्गचालनादिनिषेधकथनं। पुष्करिणीकरणयोग्यस्थान-निरूपणादिकं। जलाशयप्रतिष्ठायां यूपादिनिरूपणं। भूमिशोधनादिविधिकीर्त्तनं। मुद्ग-माष-धान्य-तिल-श्यामाक-मसूर-कलायरूपसप्तव्रीहिकथनं। जलाशयगृहाद्या-रम्भे वास्तुवलिदानादिविधिकथनं। वृक्षरोपणादिविधिकथनं। नदीतीरे-श्मशाने-गृहस्य दक्षिणस्यां दिशि च तुलसीवृक्षरोपणे दोषकीर्त्तनं। अश्वत्थाशोकादिवृक्ष-रोपणफलकथनं। वृक्षच्छेदने दोषकथनं। उद्भिज्जविद्याकथनं। तत्र वृक्षाणां दोहदादिनिरूपणञ्च।

१३–२० अध्याये,—कूपादिप्रतिष्ठाविधिः। प्रतिमालक्षणकथनं। तत्र अङ्गप्रत्यङ्गा-दिपरिमाणकथनपूर्व्वकं निर्म्माणप्रकारकीर्त्तनं। कुण्डनिर्म्माणप्रकारकशनं। तत्र होमविशेषे होमसङ्ख्यानिरूणं। कुण्डसंस्कारविधिकथनं। होमविधिकथनं। वह्नि-जिह्वाकथनं। होमावसाने पूजाविधानं। तत्र षोड़शोपचारमन्त्रकथनं। होमभेदे वह्नेर्नामभेदकीर्त्तनं। होमद्रव्यपरिमाणकथनं। छिन्नभिन्नविल्वपत्रेण होमकरणे दोषकथनञ्च।,

२१–२ अध्याये,—प्रतिष्ठायां वृक्षादिनिरूपणं। स्रुक्स्रुवादिनिर्म्माणप्रकारकथनं। होमसङ्ख्याकरणे गङ्गामृत्तिकागुटिकादिविधानं। तत्र आसनादिनिरूपणं। देव-ताभेदे मण्डलनिर्म्माणप्रकारकीर्त्तनं। वेदिनिर्म्माणप्रकारकथनं। मण्डपनिर्म्माण-प्रकारकथनं। तत्र द्वारादिकरणविधिकथनं। पद्मादिनिर्म्माणप्रकारकथनं। क्रौञ्च-प्राणनिर्म्माणप्रकारकीर्त्तनं। प्रासादे मयूर-वृषभ-सिंहादिमूर्त्तिनिर्म्माणे फलश्रुति-कथनं। सर्व्वतो भद्रमण्डलादिनिर्म्माणप्रकारकथनं। राजद्रव्यप्रमाणकीर्त्तनं। यज्ञादौ स्वर्णदक्षिणादिमानकथनं। दक्षिणादानस्य आवश्यकत्वकथनं। पुराणपा-ठादौ दक्षिणानिरूपणञ्च।

मध्यतन्त्रे द्वितीयभागे १–४ अध्याये,—शालग्रामदानादौ दक्षिणाकथनं। पूर्ण-

विषयः । पात्रपरिमाणादिकथनं । कुण्डलादिनिर्म्माणवेतनादिनिरूपणं । पुष्करिण्यादिखनने परिमाण–वेतनादिनिरूपणं। एवं वस्त्रनिर्म्माणादौ वेतनकथनं। नरवाहनादौ वेतनादिनिरूपणं । शान्तिकलसादिनिरूपणं। तत्र पञ्चपल्लवादिदानावश्यकतादिकथनं। कलसस्थापनादिविधिकीर्त्तनं। चान्द्रसौरादिचतुर्व्विधमानलक्षणकथनं। तत्र कर्म्मविशेषेषु मासविशेषनियमनं। मलमासे प्रेतक्रियाविधानकथनं। तत्र सपिण्डनादिविधिकीर्त्तनञ्च। शुक्रस्य अस्तोदयादौ कालाशुद्ध्यादिकथनं। द्विराषाढ़ादिनिरूपणञ्च ।

५–१० अध्याये,—पूर्व्वाह्णे दैवकार्य्यकर्त्तव्यता। मध्याह्नादौ एकोद्दिष्टादिकर्त्तव्यताविधानञ्च। खर्व्वा-दर्पा-हिंस्रभेदात् त्रिविधतिथिलक्षणादिकीर्त्तनं। शुक्लकृष्णयोः तिथिव्यवस्थाकथनं । युग्मादितिथिव्यवस्थाकथनं । तिथ्युपवासव्यवस्थानिरूपणं। अम्बुघटश्राद्धविधिः। अपूर्णाष्टचत्वारिंशद्वयस्कस्य भार्य्यापुत्ररहितस्य च यज्ञानुष्ठानादौ नाधिकार इति कथनं। कार्त्तिकमासादौ स्नानदानादौ फलश्रुतिकीर्त्तनं। अशून्यशयनव्रतविधानं। श्रावणपञ्चम्यां मनसापूजाविधानं। भाद्रमासे षष्ठीपूजाविधिकथनं। जन्माष्टमीव्यवस्थादिनिरूपणं। दशहराकथनं। एकादश्युपवासनिरूपणादिकं। विष्णुशृङ्खलादिनिरूपणं। शक्रोत्थानविधिकथनं। रटन्तीचतुर्द्दशी। शिवचतुर्द्दशी। चैत्रादिपूर्णिमादौ स्नानदानादिफलकीर्त्तनञ्च।

११–१७ अध्याये,—काश्यप-गौतम-मौद्गल्य-शाण्डिल्यप्रभृतीनां गोत्राणां प्रवरकीर्त्तनं। वास्तुयागविधानकथनं। तत्र मण्डलनिर्म्माणादिकथनं। वास्तुयागोक्तसर्व्वेषां देवानां ध्यानादिकथनं। तत्र पूजाविधिकथनं। अर्घ्यदानविधानं। गृह्याग्निविधिकीर्त्तनं। होमविधानकथनं। वह्निजिह्वानां ध्यानकथनं। देवादिप्रतिष्ठायाः पूर्व्वदिने अधिवासनविधिकथनं। होतृ-आचार्य्यादिवरणविधिकीर्त्तनं। सर्व्वत्र यज्ञादौ सङ्कल्पस्य आवश्यकतानिरूपणं। सङ्कल्पविधिकथनं। प्रतिष्ठादौ मासतिथिनक्षत्रवारादिनिरूपणं। मण्डपवेद्यादिनिर्म्माणप्रकारकथनं। जलाशयप्रतिष्ठादौ वृद्धिश्राद्धकर्त्तव्यताकीर्त्तनं। जलाशयप्रतिष्ठाविधानकथनञ्च ।

मध्यतन्त्रे तृतीये विभागे १–११ अध्याये,—आरामादिप्रतिष्ठाविधिकीर्त्तनं। गोप्रचारविधानकथनं। अनाथमण्डपदानविधिकथनं। प्रपादानविधिकथनं। क्षुद्रारामप्रतिष्ठाविधिकथनं। अश्वत्थवृक्षप्रतिष्ठाविधिकथनं। पुष्करिणीप्रतिष्ठाप्रयोगकथनं। वटस्नानविधिकथनं। विल्वप्रतिष्ठाविधिकथनं। शिलादारुमयादिमण्डपप्रतिष्ठाविधिः। पुष्पारामप्रतिष्ठाविधिकथनं। तुलसीप्रतिष्ठाविधिकथनं। सेतुप्रतिष्ठाविधिकथनं। भूमिदानविधिकथनं। सामान्यतः अधिवासनविधिकथनं। दुर्न्निमित्तनिरूपणं। तच्छान्त्युपायकथनञ्च। इति भविष्यपुराणे उत्तरविभागस्य विवरणम् ।

No. 1743. काल्यूर्द्धाम्नायतन्त्रम् ।

Substance, country-made yellow paper, 13½ × 3 inches. Folia, 40 Lines, 4—5 on a page. Extent, 488 s'lokas. Character, Bengali. Date, ? Place of deposit, Nasípura, Zilá Murshidábád, Rájá Rámáchanda Siñha. Appearance, old, first part destroyed by worms. Verse. Correct.

Kályurddhámnáya Tantra. One of the Tantras, attributed to S'iva. It is devoted principally to S'ákta rituals and dissertations on mantras and mystic doctrines. It is commonly known under the name of *U'rddhumnáya, Tantra* and two extracts from it have been noticed under No. 356.

Beginning. श्रीगुरवे नमः। सर्व्वानन्दमयीं विद्यां सर्व्वाम्नायनमस्कृतां।
सर्व्वसिद्धिप्रदां देवीं नमाम्यच्चिस्वरूपिणीं ॥
श्रीदेव्युवाच। देवदेव महादेव परमेश पुरातन।
प्रसीद गुह्यं मे ज्ञानं कथयस्व प्रियम्बद ॥
नाथ सर्व्वेषु तन्त्रेषु गुह्यं यदूर्द्धवक्त्रतः।
तत् प्रकाशय सम्यक् मे यद्यहं तव वल्लभा ॥
श्रीशिव उवाच। कथ्यन्ते कथयिष्यामि गुह्यं यच्चस्वलालिके।
स्त्रीस्वभावान्न जानासि तत्त्वज्ञानं सुखप्रदं ॥ इत्यादि।

End. मनःकल्पितमूर्त्तिर्ह्रीं तेजोरूपा परापरा।
परमात्मैव रामोऽयं महाविष्णुर्महाशिवः ॥
निरञ्जनस्वरूपोऽयं कृष्णरूपा च तारिणी।
ह्यात्मप्रकाशिनी नित्या नित्यानन्दस्वरूपिणी ॥

Colophon. इति काल्यूर्द्धाम्नाये पञ्चमः पटलः।

विषयः। १ प्रथमपटले,—शिवाशिवयोः संवादेन ऊर्द्धाम्नायप्रस्तावनाकथनं। देवता-गुरुमन्त्राणामेकभावेन भावनाया आवश्यकत्वकीर्त्तनं। शरीरनिरूपणं। विश्वस्य पञ्चात्मकत्वकथनं। निर्गुणात् निर्व्विकारात् परमात्मनः कथं जगत्सृष्टिरिति समाधानं। प्रकृतितो महातत्त्वादीनामुत्पत्तिकथनं। परा-पश्यन्ती-वैखरीभेदेन त्रिविधशक्तिनिरूपणादिकं। कर्म्मेन्द्रियादीनामधिष्ठातृनिरूपणं। क्रियाशक्ति-ज्ञानशक्तिप्रभृतिनिरूपणञ्च।

२ये पटले,—पञ्चीकरणप्रक्रियाकथनं। शरीरस्य प्रणवाकारत्वकथनं। तत्र स्थूलसूक्ष्मादीनां ब्रह्मविष्ण्वाद्यात्मकत्वकथनं। दक्षिणाचिगतस्य कालस्य राम-कृष्णनारायणाद्यात्मकत्वनिरूपणं। अजपाया द्वैविध्यकथनपूर्व्वकं तत्स्वरूपकी-

र्णनं। पृथिव्यादीनां गुणनिरूपणं। पितृतोऽस्थिमज्जादीनां मातृतो मांसचर्म्मादीनामपि उत्पत्तिकथनं। नाड़ीसन्धिप्रभृतीनां सङ्ख्यादिकथनं। शरीरस्य अवयवविशेषे सप्तविंशतिनक्षत्राणामवस्थानिर्द्देशः, एवं पञ्चदशतिथीनामवस्थितिनिरूपणं। शरीरस्थराशिचक्रनिरूपणं। षट्चक्रनिरूपणं। देहे चतुर्द्दशलोकावस्थानस्थानादिनिरूपणञ्च॥

२ये पटले,—जीवस्थाननिरूपणमुखेन काल्या नन्दगृहे कृष्णत्वं सुन्दर्य्या राधिकात्वमित्यादियूथैश्वर्य्यादिनिरूपणं। पञ्चाशां वृन्दावनत्वकथनं। तत्र कृष्णादीनामवस्थानादिनिरूपणं। तत्त्वज्ञाननिरूपणं। तत्त्वज्ञानसाधनप्रक्रियाकथनं। छायासिद्धिप्रकारकथनं। योगसाधनप्रकारकीर्त्तनञ्च।

४, ५मे पटले,—वीजोद्धारादिकथनं। दैहिकस्थानभेदेन जलस्य गङ्गोदकपरामृत-देहरचकादिनामभेदकथनं। कालीनामनिर्व्वचनं। योगिनां मानसीपूजाप्रकारनिरूपणं। वीराणामन्तर्यजनप्रकारकथनं। ज्ञानात्मकचक्रसंस्थानादिनिरूपणं। सगुणनिर्गुणभेदेन विविधशाम्भचक्रनिरूपणञ्च।

No. 1744. स्कन्दपुराणीयसह्याद्रिखण्डे वदरीमाहात्म्यविभागः।

Substance, country-made paper, 14 × 7 inches. Folia, 102. Lines, 8 on a page. Extent, 2,091 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasipura, Zilá Murshidábad, Rájá Rámáchánd Siñha. Appearance, fresh. Verse. Incorrect.

Badariká-máhátmya.—A dissertation on the sacred pools and temples of a place of great sanctity called Badarikás'rama, or 'the hermitage of plum trees.' The place is situated on the west bank of the Alakanandá river in the province of S'rínagar; its modern name being Badrináth, the famous place of pilgrimage on the Himálaya; its presiding divinity is Mahádeva. The work professes to be a part of the 7th book of the Skanda Purána. It comprises 23 chapters, several of which are devoted to stories in praise of S'iva and Párvatí; nowhere, however, is Vaishnavism reviled in it. Like most other Máhátmyas, it is of modern date. The Index given in the Nárada Purána does not name a Sahyádri-khanda for the Skanda Purána, but there is a brief note in the Vaishnava-khanda on the Badarikás'rama.

Beginning. श्रीगणेशाय नमः। धर्म्मदृढ़बद्धमूलो वेदस्कन्धः पुराणशाखाढ्यः।
क्रतुकुसुमो मोक्षफलो मधुसूदनपादपो जयति॥

नैमिषे च महाक्षेत्रे स्थिता वै शौनकादयः।
निर्देशाद् ब्रह्मणस्तत्र सूतं प्रोचुः सहर्षिताः॥
शौनक उवाच। सूत सूत महाभाग सर्व्वधर्म्मभृतांवर।
सर्व्वशास्त्रार्थतत्त्वज्ञ पुराणे परिनिष्ठितः॥
व्यासः सत्यवतीसूनुः भगवान् विष्णुरव्ययः।
तच्छिष्यः तत् पुराणं हि संविवेद न कश्चन॥
प्राप्ते कलियुगे घोरे सर्व्वधर्म्मबहिष्कृते
जना++तकर्म्माणः सर्व्वधर्म्मविवर्ज्जिताः॥
क्षुद्रायुषः क्षुद्रप्राणाः ++वार्य्यतपःक्रियाः।
अधर्म्मनिरताः सर्व्वे वेदशास्त्रविवर्ज्जिताः॥
तीर्थाटनतपोदानहरिभक्तिविवर्ज्जिताः।
परनिन्दारताः सर्व्वे परद्रोहपरायणाः॥
ज्ञानवैराग्यरहिता जपस्वाध्यायवर्ज्जिताः। इत्यादि।

End. पुरा सप्तर्षिभिः स्नानं कृतं प्रत्यक् शिवालये।
तस्मुखे चर्च्चिकाग्रे तु पुरतो लिङ्गरूपिणः॥
यावत् सङ्ख्याकराः सर्व्वे यावन्तोऽपि महर्षयः।
यावन्तः प्रमथाः सिद्धास्तल्लिङ्गानि शिवालये॥
ईदृक् शिवालयस्यैतन्माहात्म्यं ये पठन्ति हि।
नित्यं स्मरन्ति शृण्वन्ति तेषां शृणु फलं सखे॥
सर्व्वेषामपि तीर्थानां फलं तोयावगाहनात्।
समस्तानां व्रतानाञ्च·यत् फलं परिपूर्णता॥

Colophon. इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे बदरीमाहात्म्यविभागे शिवालयमाहात्म्यं चयोविंशतितमोऽध्यायः।

विषयः। १ प्रथमे अध्याये,—सूतेन सह शौनकादीनां संवादेन कलौ जीवानां तरणोपयोगितीर्थादिनिरूपणं। शिवस्कन्दयोः संवादेन नदीषु गङ्गा-गोदावरी-रेवा-यमुना-क्षिप्रा-सरस्वती-गौतमी-कौशिकी-कावेरी-ताम्रपर्णी-चन्द्रभागा-गण्डकी-नर्मदाप्रभृतीनां कलौ भुक्तिमुक्तिदातृत्वकथनं। पुरीषु च अयोध्या-द्वारका-काशी-मथुराऽवन्तिका-कुरुक्षेत्र-पुष्करप्रभृतीनां मोक्षसाधकत्वकथनं। बदरिकाश्रमस्य विशेषतो माहात्म्यकीर्त्तनञ्च।

२—४ अध्याये,—बदरिकाया अनादित्वकथनं। गिरिजया सह गिरिशस्य तत्र नित्यावस्थितिकथनं। केदारलिङ्गमाहात्म्यकीर्त्तनं। सर्व्वभवत्वजनितपापक्षयार्थं

विषयः। वह्नेः बदरिकाश्रमगमनवृत्तान्तकीर्त्तनं। अग्नितीर्थमाहात्म्यकथनं। तत्र पञ्चशिलाविवरणकथनञ्च। नारदकृतविष्णुस्तोत्रकीर्त्तनं। विष्णुप्रीत्यर्थं मार्कण्डेयस्य तपस्यादिवर्णनं। गरुड़स्य तपस्यावर्णनं। नृसिंहमाहात्म्यकथनं। ऋषिगणकृतनृसिंहस्तोत्रकीर्त्तनं।

५–९ अध्याये,—विशालाभिधानायां पूर्य्यां भगवन्तमपश्यतां क्षीरोदसागरगमनपूर्व्वकं ब्रह्मपुरस्कृतानामृषीणां नारायणेन संवादकथनं। कलौ भगवतो बदरीतीर्थे एव सर्वस्थितिर्नान्यत्रेति कथनं। विष्णुनैवेद्यभोजनमाहात्म्यकथनं। विष्णुपादोदकमाहात्म्यकथनं। कपालमोचनतीर्थमाहात्म्यकीर्त्तनं। तत्र पितृतीर्थे पिण्डदाने गयातोऽपि फलाधिक्यनिरूपणं। ब्रह्मतीर्थमाहात्म्यकथनं। तत्रैकदा शयानस्य ब्रह्मणो मुखाम्बुजात् मधुकैटभाभ्यां वेदापहरणवृत्तान्तकीर्त्तनं। ब्रह्मणा संस्तुतेन विष्णुना मधुकैटभनाशनकथनं। सरस्वतीतीर्थमाहात्म्यकथनं। ऐन्द्रतीर्थमाहात्म्यकथनं। मानसतीर्थमाहात्म्यं। तन्नामनिर्व्वचनञ्च। वसुधारातीर्थमाहात्म्यकथनं।

१०–१५ अध्याये,—पञ्चधारातीर्थमाहात्म्यकथनं। तत्र ग्रहनक्षत्राणामाधिपत्यलाभार्थं चन्द्रस्य कठोरतपस्यावर्णनं। सोमकुण्डतीर्थमाहात्म्यकीर्त्तनं। द्वादशादित्यतीर्थमाहात्म्यकीर्त्तनं। सत्यपदतीर्थमाहात्म्यकीर्त्तनं। ऊर्व्वशीतीर्थमाहात्म्यकथनं। तत्र धर्मकुमारयोः नरनारायणयोः तपस्याकथनं, ऊर्व्वश्याः सम्भवकथनञ्च। बदर्य्याश्रमे विष्णुना सुमेरुस्थापनवृत्तान्तकथनं। तत्र नररूपेण नारायणस्य अवस्थानकथनं। लोकपालतीर्थमाहात्म्यकीर्त्तनं। दण्डतीर्थमाहात्म्यकीर्त्तनं। गङ्गायाः स्थानविशेषे महिमाधिक्यप्रकाशकथनञ्च।

१६–२० अध्याये,—प्रसङ्गेन शिवालयतीर्थमाहात्म्यकथनं। तत्र युगविशेषे तत्परिमाणादिनिरूपणं। तत्तीर्थवर्णनं। श्रद्धामाहात्म्यकीर्त्तनं। एकदा कैलासे शिवाशिवयोरक्षक्रीड़ारहस्यवर्णनं। द्यूते पराजितायाः देव्याः शिवदास्यानुष्ठानवृत्तान्तकथनं। पार्व्वत्या सह पशुपतेः वियोगवृत्तान्तकीर्त्तनं। देव्याः विन्ध्यपर्व्वते अवस्थानकथनं। घुष्णेश्वरलिङ्गमाहात्म्यकीर्त्तनं। देवीकृताष्टतीर्थविवरणकथनं। षट्चक्रादिभेदपुरःसरं देव्याः योगानुष्ठानप्रकारकथनं।

२१–२२ अध्याये,—देवगणकृतशिवाष्टोत्तरशतनामस्तोत्रकीर्त्तनं। पार्व्वत्यानयनार्थं कालिन्द्या सह गङ्गायाः सह्याद्रिगमनवृत्तान्तकथनं। गङ्गाकृतगौरीस्तोत्रकीर्त्तनं। पार्व्वतीकृतगङ्गास्तोत्रकथनञ्च। स्त्रीणां पतिरेव देवता, नान्य इति निरूपणं। पातिव्रत्यधर्म्मकथनं। गौर्य्याः आश्रमे समुपस्थितस्य इलनामकस्य राज्ञः स्त्रीत्वप्राप्तिविवरणकथनं। तद्गर्भे पुरूरवसो जन्मवृत्तान्तकथनं। इलायाः पुनः

विषयः । पुंस्त्वप्राप्तिकथनं । सोमकुण्ड-रुद्रकुण्डादीनां माहात्म्यकथनं । शङ्खोद्धारतीर्थमाहात्म्यकथनं । शिवस्य कुटवाटनामप्राप्तिकथनं । अन्नदानगोदानादिफलनिरूपणं । चिह्नीकुण्डविवरणमाहात्म्यादिकथनं । ऐलानदीवर्णनं । ऐलकृतविनायकस्तोत्रकीर्त्तनं । श्रीवत्सेशलिङ्गमाहात्म्यकथनं । सभार्य्यस्य इलस्य गौरीवनप्रवेशवृत्तान्तकथनं । गम्भेशमाहात्म्यकथनं । वियुक्तयोः शिवाशिवयोः पुनः संयोगकथनं । महाकालतीर्थमाहात्म्यकीर्त्तनं । पौरूरवसतीर्थमाहात्म्यकथनं ।

No. 1745. स्कन्दपुराणीयरेवाखण्डः ।

Substance, country-made paper, $12\frac{1}{4} \times 5$ inches. Folia, 324. Lines, 9 on a page. Extent, 9,447 s'lokas. Character, Nágara. Date, Sm. 1867. Place of deposit, Nasípura, Zilá Murshidábad. Rájá Rámachánda Siñha. Appearance, fresh. Verse. Correct.

Revá Khaṇḍa of the *Skanda Puráṇa.*—A part of the Avanti Khaṇḍa of the Skanda Puráṇa—(see *ante*, p. 220.) In it S'iva recounts to Skanda *alias* Kártika, the religious merits of the sacred pools and temples along the banks of the Narmadá River, which is otherwise called Revá. The sacred places of Puri are also included in it. There are a great many stories recited to illustrate the origin and religious merits of the different places noticed ; but they are all of a legendary character, designed to throw a halo of antiquity on temples and localities which are obviously of mediæval origin.

Beginning. श्रीगणेशाय नमः । श्रीनर्मदायै नमः । ॐ नमो हरिहरहिरण्यगर्भेभ्यो नमो
व्यासवाल्मीकिशुकपराशरेभ्यो गुरुगोब्राह्मणेभ्यो नमः ।
मज्जन्मातङ्गगण्डच्युतमदमदिरामोदमत्तालिमालं
स्नानैः सिद्धाङ्गनानां कुचयुगविगलत्कुङ्कुमासङ्गपिङ्गं ।
सायम्प्रातर्मुनीनां कुशकुसुमचयच्छन्नतीरस्थनीरं
पायाद्वो नर्मदाम्भः करिमकरकराक्रान्तरंहस्तरङ्गम् ॥
मार्कण्डेय उवाच । हिमवच्छिखरे रम्ये सिद्धगन्धर्व्वसेविते ।
यक्षविद्याधराकीर्णे नानागणसमन्विते ॥
ब्रह्मविष्णुसुराः सर्व्वे स्कन्दनन्दिगणेश्वराः ।
चन्द्रादित्यौ ग्रहैः सार्द्धं नक्षत्रध्रुवमण्डलं ॥

वायुश्च वरुणश्चैव कुवेरोऽथ यमस्तथा ।
इन्द्राद्या देवताः सर्व्वा गणगन्धर्व्व एव च ॥
ब्राह्म्याद्या मातरश्चैव ऋषयश्च तपोधनाः ।
मूर्त्तिमन्ति च तीर्थानि चण्डभृङ्गिमहाबलाः ॥
दानवासुरदैत्याश्च पिशाचा भूतराक्षसाः ।
सूर्य्यकोटिसमप्रख्यं मणिमाणिक्यशोभितं ॥ इत्यादि ।

End. तीर्थे तीर्थे च कथितं यत् पूर्व्वं पाण्डुनन्दन ।
श्रुत्वा माहात्म्यफलदं तद्दानेनैव पाण्डव ॥
एतस्मात् कारणाद् दानं श्रुत्वा दानं हि कारयेत् ।
तच्छ्रुत्वा राजशार्द्दूल मार्कण्डेयस्य भाषितं ॥
अर्घ्यं दत्वा यथा न्यायं पूजयित्वा ऋषींस्तदा ।
अश्वैर्गजैश्च ++लैश्च ऋषिभिः सह धर्मराट् ॥
तीर्थयात्रां चकाराशु नर्मदायां युधिष्ठिरः ।
उत्तरे दक्षिणे तीरे नर्मदाया महामनाः ॥

Colophon. इति श्रीस्कन्दपुराणे रेवाखण्डे युधिष्ठिरमार्कण्डेयसंवादे रेवाचरितं समाप्तं ।
शुभमस्तु संवत् १८६७ । आषाढ़वदि ।
(अत्र अध्यायसङ्ख्यानिर्द्देशो नास्ति ।)

विषयः । शिवेन सह स्कन्दस्य संवादकथनं । तत्र स्कन्देन शिवस्तोत्रकीर्त्तनं । सन्तुष्टेन च तेन स्कन्दाय वरदानावसरे उत्तरस्यां दिशि स्थितानां हैमहर्म्याणां वृत्तान्तकथनं । तत्र गङ्गासागरवाराणसीकुरुक्षेत्रादिस्थानेषु त्यक्तजीवितानां जीवानामवस्थानकथनञ्च । एवं पूर्व्वस्यां दिशि स्थितेषु हैमहर्म्येषु नर्मदारेवादिमृतानां जन्तूनामवस्थितिकथनं । मार्कण्डेयाश्रमवर्णनं । तं द्रष्टुं कृततीर्थप्रयाणस्य सपरिवारस्य युधिष्ठिरस्य तत्र आगमनादिविवरणकथनं । मार्कण्डेयेन स्कन्दपुराणकीर्त्तनं । तत्र "अष्टलक्षाणि सार्द्धानि शिवलोके समासते । तदर्द्धं वैष्णवे लोके अर्द्धार्द्धं ब्रह्मणः पुरेः । चतुरशीतिसहस्राणि मर्त्यलोके च गीयते" ॥ इति स्कन्दपुराणपरिमाणकीर्त्तनं ।

देवानामभ्यर्थनया शिवस्य अनुज्ञया नर्मदायाः पृथिव्यामवतरणकथनं । तत्र तद्वेगधारणे असमर्थेषु सर्व्वेषु पर्व्वतेषु ऋक्षवता गिरिणा धारणवृत्तान्तकथनञ्च । नर्मदायाः पुनः स्वर्गलोकगमनकथनं । शिवप्रसाददृप्तेन हिरण्यकशिपुना विप्रकृतानां क्रतुभुजां दुर्द्दशादिवर्णनं । नर्मदायाः पृथिव्यामवतारणार्थं पुरूरवसस्तपस्यादिविवरणकथनं । विन्ध्यगिरिकुमारस्य पर्य्यङ्कस्य शिरसि नर्मदावतरणवृत्तान्तकथनं ।

विषयः। सङ्क्षेपेण गङ्गावतरणविवरणकथनं। नर्म्मदामाहात्म्यकथनं। सूर्य्यग्रहणकाले तर्पयता हिरण्यतेजोऽभिधानेन सोमवंशजेन राज्ञा सह पितॄणां संवादकथनादिकं। एकदा उदयाचलशिरसि नर्म्मदाया अवतरणकथनं। नर्म्मदायाश्चतुर्थावतारकथनं। तत्र इक्ष्वाकुवंशजस्य पुरुकुत्सोरुपाख्यानकीर्त्तनञ्च।

सिद्धलिङ्ग-वैश्रवण-सप्तसारस्वतयमतीर्थादिमाहात्म्यकथनं। व्यासतीर्थमाहात्म्यकथनं। व्यासाष्टकस्तोत्रकथनं। महापुण्यतीर्थ-हरिक्षेत्रस्थानेश्वरतीर्थमाहात्म्यादिकथनं। त्रिपुरीतीर्थमाहात्म्यकथनं। अत्र चक्रवर्त्तिनामकस्य नरपतेरुपाख्यानकथनं। सत्यसेनस्य प्रजापालस्य पत्न्याः शृङ्गारवल्लरीनामिकाया मर्कटाननत्वकथनपूर्व्वकं तद्विवरणकथनं। जातिस्मरया तया भर्त्तुः पुरतः पूर्व्वजन्मकथाकीर्त्तनं। भृगुकृतशङ्करस्तोत्रकथनं। भृगुक्षेत्रमाहात्म्यकथनं। तत्र दुर्व्वासःशापार्द्दितस्य मोहनाभिधानस्य गन्धर्व्वस्य उपाख्यानकीर्त्तनञ्च।

सोमनाथमाहात्म्यकथनं। एवं ब्रह्मकुण्ड-महाकाल-मातृतीर्थ-ब्रह्मेश्वर-स्वर्गद्वार-सिद्धेश्वरप्रभृतीनां तीर्थानां माहात्म्यकथनं। गाङ्गलेश्वरलिङ्गमाहात्म्यकथनप्रसङ्गेन लक्षगोघातकस्य कन्यापुरपतेः हरिकेशस्य उपाख्यानकीर्त्तनं। बालुकेश्वरतीर्थमाहात्म्यकथनं। तत्र शङ्कुकर्णनामकस्य यक्षराजस्य उपाख्यानकथनं। पूर्णमनोरथनामकतीर्थमाहात्म्यकथनमुखेन विराटनगराधिपस्य हरिवर्म्मण उपाख्यानकथनं। नाभागस्य भूपतेरुपाख्यानकथनं। तेन सार्द्धं आपस्तम्बस्य संवादेन गोमाहात्म्यकथनञ्च। मत्स्येश्वरतीर्थमाहात्म्यकथनं। तत्र निषादाधिपतेरुपाख्यानकथनञ्च। मातङ्गाख्यानकथनं। तत्र कलहंसाभिधेयेन देवर्षिणा सह शक्रस्य संवादकथनादिकञ्च।

योगतीर्थमाहात्म्यादिकथनं। एवं भुवतीर्थ-नक्षत्रतीर्थ-वाराहतीर्थादीनां माहात्म्यादिकथनं। रेवाया उत्तरस्यां दिशि स्थितानां तीर्थानां वर्णनं। जमदग्नेराश्रमे मुनीनां समागमवृत्तान्तकथनं। तपसा प्रसन्नेन आशुतोषेण जमदग्नये कामधेनुदानविवरणकीर्त्तनं। कार्त्तवीर्य्योपाख्यानकथनं। निषादोपाख्यानकीर्त्तनं। नागेश्वरमाहात्म्यादिकथनं। तत्र गरुड़कृतनागभक्षणवृत्तान्तकथनं। लक्षमेधलिङ्गमाहात्म्यकथनं। तत्र सूर्य्यवंश्यस्य जनाभिधानस्य राजर्षेः लक्षमेधयज्ञानुष्ठानवृत्तान्तकथनं। शिवमुपवीणयितुं कैलासगिरिमुपगताय सप्तसारस्वताभिधानाय गन्धर्व्वराजाय नन्दिना शापदानवृत्तान्तकीर्त्तनं। तस्य जातिस्मररूपेण चण्डालयोनौ जन्मग्रहणादिकथनं। सप्तसारस्वतलिङ्गमाहात्म्यकथनञ्च। प्रलयवर्णनं। तत्र शिवलिङ्गे सर्व्वेषां जगतां प्रवेशकथनादिकं। अशोकजननतीर्थमाहात्म्यकथनं। तत्र सारङ्गस्य हरिणा सह संवादकीर्त्तनञ्च।

विषय। शाण्डिल्येश्वरलिङ्गमाहात्म्यकथनमुखेन कार्त्तवीर्य्यपतेराख्यानकीर्त्तनं। मूषिकतीर्थविवरणकथनं। मधुपानमत्तानामुर्व्वश्यादीनामप्सरसां शिवं सम्भावयितुं समागतानां गौरीशापेन मनुष्यलोके जन्मादिकथनं। पञ्चब्रह्मेश्वरलिङ्गमाहात्म्यकथनं। तत्र मल्लकेतुनामकस्य महासुरस्य आख्यानकथनञ्च। त्वष्टृ-पूषाभिधानयोः ब्रह्मराक्षसयोः विनाशनेन जातब्रह्महत्यापातकस्य वासवस्य शिवोपदेशात् काश्यामश्वमेधानुष्ठानविवरणकथनं। रेवाकुब्जिकासमागममाहात्म्यकथनं। तत्र रन्तिदेवस्य उपाख्यानकथनं। विल्वामलकस्य उत्पत्तिकथनञ्च। बुभुक्षया कातराणां शिशूनां वदनं निरीक्ष्य सशोकायाः निजपत्न्याः करुणविलपितेन व्यथितहृदयेन शिलोञ्छवृत्तिना हरिकेशनामकेन ब्राह्मणेन अम्बरीषस्य समीपगमनवृत्तान्तकीर्त्तनं। कुब्जिकाया उद्भवकथनप्रसङ्गेन चित्राङ्गदस्य गन्धर्व्वस्य दशलक्षसङ्ख्याभिः कामिनीभिः रममाणस्य विवरणकथनं। सुकर्म्मसुतायाः सुकामाया उपाख्यानकथनञ्च।

सूर्य्यपुत्रस्य मनोः राज्यशासनसमये अनावृष्टिविवरणकथनं। माहेश्वरतीर्थवर्णनं। मण्डपेश्वरमाहात्म्यकथनं। रामतीर्थस्य उत्पत्तिकथनं। नर्म्मदागाभीसम्भेदविवरणकथनं। अग्निसुताया आख्यानकथनञ्च। गौरीखण्डतीर्थस्य उत्पत्तिकथनं। करमर्द्देश्वरमाहात्म्यकथनप्रसङ्गेन कुशध्वजस्य राज्ञः मैत्रेयाश्रमगमनविवरणकथनं। मान्धातृचरित्रकीर्त्तनं। युवनाश्वस्य वामकुक्षितस्तस्य जन्मादिकथनञ्च। महादेवस्य त्रिपुरविजयविवरणकथनं। देवगणकृतशिवस्तोत्रकथनं। अमरेश्वरमाहात्म्यकथनञ्च।

हिरण्यबाहोः यज्ञे दक्षगौतमप्रभृतीनां ब्रह्मराक्षसभावप्राप्तिविवरणकथनं। पञ्चलिङ्गमाहात्म्यकथनं। भार्य्यया सह सुपर्णनामकस्य ब्राह्मणस्य स्वर्गारोहणवृत्तान्तकथनं। व्यतीपातेश्वर-सावित्रीकुण्डादीनां माहात्म्यकथनं। दक्षस्य कुमुदा नामैका दुहिता आसीत्। सोमाय प्रदत्तायास्तस्या गर्भे पुत्रजननवृत्तान्तकथनं। तं हिमांशुनामकं शुभ्रांशुकुमारं समाश्लिष्य पातुमुद्यतानामसुराणां महादेवाद्विनाशकथनं। सोमनाथस्य आविर्भावादिकीर्त्तनञ्च। पातालेश्वरमाहात्म्यकथनं। अयोध्याधिपतेरैन्द्रद्युम्नेः यज्ञानुष्ठानवृत्तान्तकथनं। तत्र एकादशरुद्र-द्वादशादित्य-अष्टवसु-विश्वेदेव-साध्यादीनां नाम कथनं। नीलगङ्गाया अवतारविवरणकीर्त्तनञ्च। पुराणलक्षणादिकथनं। कलिकालवर्णनं। तत्र म्लेच्छो राजा भविष्यतीति कथनं। नराणामवस्थादिकथनं। वैडूर्य्यपर्व्वतवर्णनं। तत्र मान्धातुः यज्ञकरणवृत्तान्तकीर्त्तनञ्च। अयोध्याधिपतेः वसुदानस्य राज्यकाले धर्म्मविप्लवकारिणां केतुमालि-सुमालि-सुमुखादीनां प्रभावादिकीर्त्तनं। तत्र कपिलायाः नद्या अवतारकथनं। दाक्षायणीपुत्रस्य मथुराधिपतेः विश्ववसो राज्ञ उपाख्यानकथनं। मार्कण्डेयस्य

विषयः । कल्पान्तदर्शनवृत्तान्तकीर्त्तनं। गौतमेश्वर-मार्कण्डेयेश्वर-वसिष्ठेश्वर-मातङ्गेश्वरादीनां माहात्म्यकथनं। चक्रस्वामिविवरणकथनं। पुण्ड्रवर्द्धनदेशाधिपतेः वभ्रोराख्यानकथनं। विमलेश्वरमाहात्म्यादिवर्णनं। स्रुवयागविधिकीर्त्तनं। कावेरीमाहात्म्यकथनं। शाण्डिल्यकामिनीं कामिनीं पश्यतश्चण्डसेनस्य नरपतेराख्यानकीर्त्तनं। चण्डेश्वरलिङ्गमाहात्म्यकथनञ्च।

भद्ररुद्रेश्वरलिङ्गमाहात्म्यकथनप्रसङ्गेन भद्ररुद्राभिधानयोः गन्धर्व्वयोरुपाख्यानकथनं। निमिनामकन्दपतेः पत्नियोर्नो जन्मादिकथनं। निमिपत्न्याः चन्द्रमत्याः शापेन च्यवनस्य चक्षुर्हीनत्वादिविवरणकीर्त्तनञ्च। एरण्डीसङ्गममाहात्म्यादिकथनं। पितृतीर्थस्य उद्भवादिकथनं। शल्यामाहात्म्यकथनमुखेन भरतकृतहयमेधयज्ञानुष्ठानकथनं। भृगुपत्न्यादिना प्राणत्यागमाहात्म्यकथनं। युगानां सन्ध्यातदङ्गादिनिरूपणं। कलिस्वभावकथनं। ॐकारमाहात्म्यादिकथनं। अयोध्याधिपतेः धुन्धुमारस्य आख्यानकथनं। मुचुकुन्दकुवलयाश्वस्वर्गारोहणवृत्तान्तकथनञ्च।

विस्तरतो नरकवर्णनं। यमोक्तकर्म्मगतिवैचित्र्यकीर्त्तनं। गोदानमाहात्म्यकथनमुखेन हरिश्चन्द्रोपाख्यानकथनं। मातङ्गाश्रममाहात्म्यकथनं। तत्र मातङ्गस्य देवर्षे-रुपाख्यानकथनञ्च। नर्म्मदामाहात्म्यकथनं। तत्र व्याधस्य उपाख्यानकथनञ्च। ब्रह्माण्डसंस्थानकथनं। तत्र विशेषेण शिवलोकवर्णनं। शैवदानधर्म्मकथनं। शिवमाहात्म्यकथनञ्च। वैष्णवदानधर्म्मकीर्त्तनं। तत्र जावालिपुत्रेण वानरविग्रहेण कदम्बेन सह युवनाश्वस्य संवादकथनञ्च।

रन्तिदेवस्य आख्यानकथनं। वृत्रबधकाले देवैः सार्द्धं दधीचिमुनेः संवादादिकथनं। अष्टोत्तरशततीर्थस्थितानां मातृणां स्तोत्रकथनं। कुब्जामाहात्म्यकथनं। विष्णुमाहात्म्यकीर्त्तनं। माण्डव्याश्रमवर्णनं। ययातिशुक्रमाहात्म्यकथनं। दीप्तिकेश्वरमाहात्म्यकथनं। शम्भुस्तोत्रकीर्त्तनं। ययातेः हरिहरभागहीनयज्ञानुष्ठानविवरणकथनं। तत्र विष्णुसहस्रनामस्तोत्रकथनञ्च। मयदानवदुहित्रा सार्द्धं रावणस्य परिणयविवरणकथनं। तत्र मेघनादस्य जन्मकथनं। तन्नामनिर्व्वचनं। नर्म्मदाजलमध्ये मेघनादेश्वरलिङ्गवृत्तान्तकीर्त्तनञ्च।

दारुतीर्थमाहात्म्यकथनप्रसङ्गेन स्वपुत्रं दारुकं प्रति मातलिना शापदानविवरणकथनं। देवतीर्थमाहात्म्यकथनं। तत्र जम्भासुरविप्रकृतानां क्रतुभुजां चेष्टितवर्णनं। एकदा वसन्तकाले अगस्त्याश्रमप्रविष्टस्य महादेवस्य लिङ्गपतनादिवृत्तान्तकथनं। नर्म्मदेश्वरमाहात्म्यकथनञ्च। करञ्जेश्वरमाहात्म्यकथनं। अच दनूकुमारस्य जन्मादिविवरणकथनं। कुण्डलेश्वरमाहात्म्यकथनं। पिप्पलेश्वरमाहात्म्यणं। याज्ञवल्क्यतनयस्य पिप्पलादस्य आख्यानकथनं। विमलेश्वरमाहात्म्य-

तत्र

करञ्ज

विषयः। कथनं। दानधर्म्मकीर्त्तनं। तत्र दानविधिकथनञ्च। गुह्यतीर्थविवरणादिकथनं। विश्वरूपलिङ्गमाहात्म्यकथनं। तत्र सारिकाया उपाख्यानकथनं। पञ्चलिङ्गमहिमा। स्कन्देश्वरमहिमा। अत्र मयूरकुक्कुटयोरुपाख्यानकथनञ्च। रमेश्वर-हरिणेश्वर-लुब्धकेश्वर-धनुषेश्वर-वाणेश्वरप्रभृतीनां माहात्म्यादिकथनं। अन्धकेश्वरलिङ्गमाहात्म्यकथनं। तत्र अन्धकवधविवरणं, तस्मै वरप्रदानवृत्तान्तकथनञ्च। शूलभेदोत्पत्तिकथनं। श्राद्धे पात्रकरणयोग्यब्राह्मणलक्षणकथनं। कन्यादानफलकीर्त्तनं। श्राद्धकालादिनिरूपणं। वाराणसीनाथस्य चित्रसेनस्य उपाख्यानकथनं। तत्र दीर्घतपाख्यानकथनञ्च। शम्बरस्वर्गारोहणविवरणकथनं। भानुमत्याः स्वर्गारोहणवृत्तान्तकीर्त्तनञ्च।

अर्कतीर्थमहिमा। तत्र हृदया सह याज्ञवल्क्य-भरद्वाज-शाण्डिल्य-विभाण्डक-शातातपप्रभृतीनामृषीणां संवादकथनं। आदित्येश्वरमाहात्म्यकथनं। तत्र ब्रह्मकृतवह्निज्वालास्तोत्रकथनं। अगस्त्यतीर्थवर्णनं। तत्र इन्द्रस्य पुरतो भरतेन दैत्यभारनिपीड़िताया पृथिव्या दुरवस्थादिवर्णनं। अगस्त्यकृतविन्ध्यगिरिरोधनविवरणकीर्तनञ्च। भस्माङ्गदवधविवरणकथनं। मणिनागतीर्थवर्णनं। शङ्खचूड़तीर्थमाहात्म्यकथनं। गोपारेश्वरलिङ्गमाहात्म्यकथनं। एवं पाराशरेश्वरादितीर्थमाहात्म्यकथनं। दधिच्छन्द-मधुच्छन्दादितीर्थपञ्चकविवरणकथनं। हनूमन्तेश्वरमाहात्म्यकथनप्रसङ्गेन शिखण्डिनः समीपे तत्कन्यया कलापिन्या पूर्व्वजन्मवृत्तान्तकीर्तनं।

सोमनाथतीर्थमाहात्म्यकथनं। तत्र दक्षशापेन चन्द्रस्य क्षयप्राप्तिविवरणकथनं। पिङ्गलेश्वर-कपिलेश्वरयोर्माहात्म्यकथनं। तत्र रुद्रतेजसा सन्तप्तस्य वह्नेस्तीर्थवर्णनं। चक्रतीर्थमाहात्म्यकथनप्रसङ्गेन श्रीकृष्णकृतधुन्धुमारादिनिपातनवृत्तान्तकीर्त्तनं। आदित्येश्वरमाहात्म्यकथनं। तत्र चण्डमुण्डकृतसूर्य्योपासनवृत्तान्तकीर्तनं। यमहासतीर्थमाहात्म्यकथनमुखेन नर्म्मदातीरे रजकमेकं पश्यतः पाण्डुराजस्य हास्यकरणादिवृत्तान्तकथनं। द्वीपेश्वरव्यासतीर्थमाहात्म्यकथनं। तत्र योजनगन्धया सह पराशरस्य संवादकथनं। व्यासजन्मादिविवरणकीर्तनञ्च। प्रभासतीर्थकथनं। भैरवरूपमास्थाय नृत्यतो महादेवस्य स्वेदमिश्रितं सलिलं पिवन्तं वासुकिमुद्दिश्य 'श्वपचो भवेति' मन्दाकिन्या शापदानादिवृत्तान्तकीर्तनं। एरण्डतीर्थमहिमा। तत्र अनुसूयया सार्द्धं हरिहरब्रह्मादीनां संवादकथनादिकं। करण्डेश्वरमाहात्म्यकथनं। सौभाग्यतीर्थवर्णनं। गङ्गादिकृतनर्म्मदापूजनविवरणकथनं। नर्म्मदासागरयोः संवादकथनं। तत्सङ्गममाहात्म्यकीर्तनञ्च। इति शम्। (इति रेवाखण्डस्य विवरणं)।

No. 1746. कन्दपुराणीयसौरसंहिता ।

Substance, country-made paper, $13\frac{1}{2} \times 6$ inches. Folia, 54. Lines, 7 on a page. Extent, 1,031 s'loka. Character, Nágara. Date, Sm., 1835. Place of deposit, Nasípura, Zilá Murshidábad. Rájá Rámachánda Siñha. Appearance, fresh. Verse. Incorrect.

Saura Sañhitá.—A part of the Kás'í-khaṇḍa of the Skanda Puráṇa. The codex comprises 16 chapters, but as the last chapter breaks off abruptly, the work is obviously incomplete. Contents: Puráṇas. Upa-Puráṇas. Vyása's adoration of S'iva. His compilation of the Vedas, and teaching thereof to Jaimini and others. His teachings on the attributes of the Deity. The character of the gods and characteristics of Dharma and the Puráṇas. Adoration of Súrya as the Divinity. Creation. Planets, their extent and motion. Adoration of Sadás'iva. The theory of illusion. Condemnation of Bauddha, Arhata, Pancha-pátra, Vináyaka, and other systems of philosophy. Sectarial marks. Destruction of sin. Praise of A'vimúkta, Benares, Ganges and other sacred places. Metaphysical disquisitions on the power of the soul and its relation to the Divinity. Ignorance and knowledge. The three essential qualities. Various philosophical theories and their value. Emancipation. Pre-eminence of the S'ruti. Yajńávalkya's hymn to Súrya.

Beginning. श्रीगणेशाय नमः। ॐ नमोऽहंपदर्थाय तत्पदार्थस्वरूपिणे।
भासकाय नमस्तस्मै भवाय भवहारिणे॥
नमः साम्बाय सर्व्वाय सर्व्वविज्ञानदायिने।
स्वशक्तिरचितेदन्ता-हन्तारूपाय साक्षिणे॥
समस्तजगदुत्पत्तिस्थितिनाशैकहेतवे।
रुद्रविष्णुविरिञ्च्यादिस्वरूपाय नमो नमः॥
प्रमाणानामगम्याय स्वयं भानाय वस्तुनं। इत्यादि।

End. इत्युक्ता भगवान् सूतः सर्व्वज्ञः साम्बमीश्वरं।
ध्यात्वा ++ मया भक्त्या पपात विवशो ++॥
बालखिल्या महात्मानं व्यासशिष्यं कृपाकरं।
यथार्हं पूजयामासुः सूतं सुमनसः प्रियम्॥

Colophon. इति श्रीस्कन्दपुराणे सौरसंहितायां षोड़शोऽध्यायः। शुभमस्तु। संवत् १८१५

विषयः। १ प्रथमे अध्याये,—सूतेन सह ऋषीणां संवादेन अष्टादशपुराणप्रस्तावकीर्त्तनं। उपपुराणकथनं। व्यासकृतशिवाराधनविवरणकथनं। तत्कृतवेदविभागकथनं तत्र ऋग्वेदस्य एकविंशतिशाखा, यजुर्वेदस्य शतैकशाखा, सामवेदस्य च सहस्र-शाखेति कथनं। विभागपूर्व्वकं जैमिन्यादिभ्यो वेददानविवरणकथनं। मुनीनां पुरतः कृष्णद्वैपायनेन परब्रह्मस्वरूपकथनं। तस्य शिव-शम्भु-महादेवादिनामकथ-नञ्च। धर्म्मस्य चोदनालक्षणत्वकथनं। चोदनाप्रामाण्यनिरूपणं। पुराणलक्षण-कथनञ्च।

२–५ अध्याये, याज्ञवल्क्यकृतसूर्य्योपासनाविवरणकथनं। तस्मै सूर्य्येण तत्त्वज्ञानो-पदेशदानकथनं। अभेदवादकथनं। जगत्सृष्टिकथनं। हिरण्यगर्भाद्युपाधिभेद-सप्तपातालानां स्वरूपकथनं। एवं स्वर्गाणां संस्थानादिकथनञ्च। वर्षादिस्थाननि-र्द्देशपूर्व्वकं जम्बूद्वीपसंस्थानादिकथनं। एवं ग्रहादीनां निरूपणं। आवहप्रवहादि-सप्तवायुनेमिनिरूपणं। नक्षत्रमण्डल-सप्तर्षिमण्डल-ध्रुवमण्डलादीनां दूरत्वादि-कथनं। सूर्य्य-चन्द्र-मङ्गलप्रभृतीनां मण्डलविस्तारादिपरिमाणकथनं। सदाशिव-लोकसंस्थानकथनपूर्व्वकं विस्तरतः सदाशिवरूपवर्णनं। जगत्कारणनिरूपणप्रसङ्गेन मायावादनिरूपणं। वेदान्तप्रशंसा। तत्र ब्रह्मकारणतावादस्य अभ्यर्हितत्वकथनं। आर्हतबौद्ध-पाशुपातवैनायकादितन्त्राणां निन्दाकीर्त्तनं।

६–१० अध्याये,—भस्मत्रिपुण्ड्रादिधारणमाहात्म्यकथनं। पापक्षयोपायकथनं। अवि-मुक्तमाहात्म्यकथनं। विश्वेश्वरमहिमा। वाराणसीवर्णनं। शिवगङ्गामाहात्म्यकथनं। गङ्गादिनानातीर्थमाहात्म्यकथनं। अध्यारोपादिस्वरूपनिरूपणं। अज्ञानलक्षणा-दिकथनं। आत्मस्वरूपादिकथनं। परमात्मजीवात्मनोरौपाधिको भेद इति निरू-पणं। ज्ञानमाहात्म्यकथनं। तदुपायकीर्त्तनं। तत्स्वरूपकथनञ्च। ज्ञानकारण-निरूपणञ्च।

११–१६ अध्याये,—सत्त्वरजस्तमोगुणानां प्रकृतिनिरूपणं। जीवस्वरूपविवेचनं। निर्गुणस्य आत्मनो बन्धहेतुनिरूपणं। तत्र आत्मनो देह-इन्द्रिय-मनः-प्राण-विज्ञान-शून्याद्यात्मकत्ववादकथनादिकं। मोक्षोपायकथनं। मोक्षस्वरूपनिरूपणञ्च। प्रत्य-क्षादिभ्यः श्रुतेर्बलवत्त्वकथनं। श्रुतिकल्पनायोग्यविषयनिरूपणं। श्रुतिसारकथनं याज्ञवल्क्यकृतसूर्य्यस्तोत्रकीर्त्तनञ्च॥

No. 1747. स्कन्दपुराणीयसूतसंहितायां शिवमाहात्म्यखण्डः ।

Substance, country-made paper, 17 × 5½ inches. Folia, 40. Lines, 6 on a page. Extent, 780 s'lokas. Character, Bengali. Date, ? Place of deposit, Nasípura, Zillah Murshidábád. Rájá Rámachánd Siñha. Appearance, new. Verse. Generally correct.

S'iva-máhátmya Khanḍa of the *Skanda Puráṇa*. The Skanda Puráṇa includes seven parts, of which the Súta Sañhitá forms a part of the 5th or Nágara Khanḍa. According to the introduction, the Sañhitá comprises four books or khanḍas, of which the codex under notice, which is known under the name given, contains only the first. It is divided into thirteen chapters, and devoted to the glory of S'iva. The first chapter gives a summary of the Puráṇas and of the Vedas with their several S'ákhás. Then follow four chapters on the glory of S'iva, the necessity and propriety of worshipping him, and the rituals appropriate for the purpose. The next three chapters are devoted to the adoration and glorification of S'ákta divinities, and their relation to S'iva. The last five chapters dwell upon Vishṇu as subordinate to S'iva.

Beginning. श्रीगणेशाय नमः । नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
ईश्वरं परमं तत्त्वमादिमध्यान्तवर्ज्जितं ।
आधारं सर्व्वलोकानामनाधारमविक्रियं ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमं ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहं ॥
सत्रावसाने मुनयो विशुद्धहृदया भृशम् ।
नैमिषीया महात्मानमागतं रोमहर्षणं ॥
दृष्ट्वा यथार्हं सम्पूज्य प्रसन्नेन्द्रियमानसाः ।
पप्रच्छुः संहितां पुण्यां सूतं पौराणिकीं मुदा ॥
एवं पृष्टो मुनिश्रेष्ठैः सूतः सर्व्वार्थदायिनं ।
महादेवं महात्मानं ध्यात्वा व्यासञ्च भक्तितः ॥
समाहितमना भूत्वा विलोक्य मुनिसत्तमान् ।
वक्तुमारभते सूतः संहितां श्रुतिसम्मितां ॥ इत्यादि ।

End. ध्यात्वा हृत्पङ्कजे भक्त्या प्रसन्नेन्द्रियमानसः ।
प्रणम्य दण्डवद्भूमौ महादेवं जगद्गुरुं ॥
वेदव्यासश्च संसारसमुद्रतरणप्लवं ।
हिताय मुनिशार्दूलाः कैलासमचलं गतः ॥

Colophon. इति श्रीस्कन्दपुराणे सूतसंहितायां शिवमाहात्म्यखण्डे त्रयोदशोऽध्यायः समाप्तः प्रथमः खण्डः समाप्तः ॥

विषयः । १ प्रथमे अध्याये,—सूतेन सह ऋषीणां संवादेन अष्टादशपुराणनामकथनपूर्व्वकं तेषां चतुर्लक्षश्लोकसम्मितत्वकथनं । एवमष्टादशोपपुराणनामकथनप्रसङ्गेन तेषां लक्षश्लोकपरिमाणत्वकीर्त्तनञ्च । स्कन्दपुराणस्य सनत्कुमारसूत-शाङ्कर-वैष्णव-ब्राह्म-सौरभेदात् षड्विधसंहिताकथनं । साकल्येनैषां पञ्चपञ्चाशत्सहस्रमितग्रन्थसङ्ख्याकथनं । तथा प्रत्येकं श्लोकसङ्ख्याकीर्त्तनं । सूतसंहितायाः शिवमाहात्म्य-ज्ञानयोग-मुक्ति-यज्ञवैभवभेदेन चतुःखण्डकथनं । तत्र प्रत्येकं अध्यायश्लोकसङ्ख्यादिनिरूपणं । ऋग्वेदादीनां शाखादिकथनं ।

२–५ अध्याये,—शिवसन्दर्शनार्थं केशवादीनां रुद्रलोकगमनवृत्तान्तकथनं । तेषां करुणोक्तिं निशम्य शिवस्य अर्द्धनारीश्वररूपेण आविर्भावादिवृत्तान्तकीर्त्तनं । भगवत ऐश्वर्य्यवर्णनञ्च । एकदा 'अहमेव जगत्कर्त्ता मय्येवेदं स्थितं जगत् । मत्समस्याधिकस्यापि नास्ति सर्व्वत्र सर्व्वदा ॥' इत्यहङ्कारसंच्छन्नस्य विष्णोः शिवेन शक्तिसमाहरणविवरणकथनं । सर्व्वेषां सुराणां पुरतो नन्दिना शिवमाहात्म्यकथनं । तदा तत्र शिवस्य आविर्भावदर्शनेन देवैस्तत्स्तोत्रकथनं । शिवपूजाविधिकीर्त्तनं । तत्र सन्न्यासिनां स्त्रीणाञ्च विशेषकथनादिकं । शिवपूजामाहात्म्यकथनप्रस्तावेन ब्राह्मण-कुलघातकस्य कस्यचित् पुक्कसस्य उपाख्यानकथनञ्च ।

६–८ अध्याये,—शक्तिपूजाविधिकथनं । तत्र साधार-निराधारभेदाद् विधिपूजा-निरूपणं । शिवभक्तस्य विशेषपूजाविधिकथनं । तत्र वाराणसीवासिनः कस्यचिद् वैश्यस्य आख्यानकथनं । विन्ध्याचलेश्वरमाहात्म्यकीर्त्तनञ्च । सलक्ष्मीकस्य हरेः व्यासेन सह शिवलोकगमनवृत्तान्तकथनं । तत्र तेषां प्रार्थनया शिवेन तत्त्वज्ञानस्य अभ्यर्हितत्वकथनं । तत्त्वज्ञाने द्विजातीनां मुख्याधिकारकथनं । स्त्रीशूद्रादीनां ज्ञानोपायकथनं । मुक्तिक्षेत्रनिरूपणं । कालसङ्ख्यानिरूपणं । तत्र कलाकाष्ठादि-परिभाषाकथनं । माया-अविद्या-करण-अव्यक्तादिशब्दानां प्रवृत्तिनिमित्तकथनञ्च । हरिहरब्रह्मादीनां त्रिगुणात्मकत्वादिकथनञ्च ।

९–१२ अध्याये,—नारायणशब्दनिर्व्वचनं । शिवाज्ञया वराहरूपधारिणा विष्णुना सागरगर्भे निमग्नायाः पृथिव्या उद्धारादिविवरणकथनं । सनकादिकृतवराहस्तोत्र-

कथनं। विरिञ्चिकृतसृष्टिविवरणकथनं। तत्र ऊर्द्ध्वस्रोतश्चादिसृष्टिनिरूपणं। हिरण्यगर्भ-सूत्रात्म-प्रभृतिस्वरूपनिरूपणं। जातिनिर्णयः। सङ्करजातीनामुत्पत्तिकथनं। वाराणस्यादितीर्थमाहात्म्यकथनं। शिवमाहात्म्यखण्डश्रवणादिफलश्रुतिकीर्त्तनञ्च।

No. 1748. स्कन्दपुराणीयसह्याद्रिखण्डः। उत्तरविभागः।

Substance, country-made paper, 14¼ × 7 inches. Folia, 225. Lines, 8—9 on a page. Extent, 4,998 s'lokas. Character, Nágara. Date, Sm. 1836. Place of deposit, Nasípura, Zillah Murshidábad. Rájá Rámachánd Siñha. Appearance, fresh. Verse. Incorrect.

Sahyádri Khaṇḍa of the *Skanda Puráṇa.* This work is devoted to the sacred places of pilgrimage in western India on the Western Ghauts and along the Godávarí river from its source to its mouth; the sacred places noticed most in detail being those which exist on the Sahyádri Hill, whence its name.

Beginning. ॐ नमो भगवते वासुदेवाय। युधिष्ठिर उवाच।
कथितानि मुनिश्रेष्ठ तीर्थानि भवता मम।
क्षेत्राणि चैव मुख्यानि वला+ वनवासिनां॥
वदर्य्यादीनि स्थानानि नैमिषं पुष्करस्तथा।
सह्याद्रेर्द्दण्डकारण्यमाहात्म्यं वद सुव्रत॥
मार्कण्डेय उवाच। शृणु वत्स प्रवक्ष्यामि सह्याद्रेर्द्दण्डके वने।
देवदेवः स्वयं यत्र सदा तिष्ठति दैत्यहा॥
दत्तात्रेयो मुनिर्यत्र यत्र देवी च रेणुका।
रामस्तु सर्व्वदा यत्र संस्थितो भगवान् स्वयं॥
यस्मिन् क्षेत्रे महाराज द्विसप्ततिचतुर्म्मुखाः।
मुक्तिं प्राप्तास्तथा सर्व्वे सिद्धयः सनकादयः॥
कृष्णधात्रीफली यत्र हृत्तस्तिष्ठति सर्व्वदा।
यत्र देवश्च देवाश्च शिवश्च परमेश्वरः॥ इत्यादि।

End. पुस्तकं धर्म्मशास्त्रस्य यो ददाति ++ द्विज।
शतमन्वन्तरान् पितॄन् तारयेन्नरकादपि॥
वेदविद्यां नरो दत्त्वा स्वर्गे कल्पत्रयं वसेत्।
आत्मविद्यां यो दद्यात्तस्य सङ्ख्या न विद्यते॥

धर्म्मशास्त्रं नरो बुद्ध्वा यं कश्चिद्धर्म्ममाचरेत् ।
तस्य दत्त्वा दशगुणं पुण्यं शास्त्रे च जायते ॥

Colophon. इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे त्र्यशीतितमोऽध्यायः ।
समाप्तोऽयमुत्तरविभागः । संवत् १८३६ ।

विषयः । १, २ अध्याये,—मार्कण्डेयेन सह युधिष्ठिरस्य संवादेन दत्तात्रेयस्य मुनेर्जन्मवृत्तान्तकीर्त्तनं। तत्र दस्युभिः सार्द्धं बद्धस्य माण्डव्यस्य शूलारोपणविवरणकथनं। अथ निशीथे निविड़ान्धकारतया पन्थानं ज्ञातुमसमर्थायाः कयाश्चित् पतिव्रतायाः शिरःस्पर्शेन द्विगुणितक्लेशेन माण्डव्येन तामुद्दिश्य 'सूर्य्योदये त्वं विधवा भविष्यसीति' शापः प्रदत्तः। तस्याः प्रभावेणैव दिवाकरो देवमानेन सहस्राणि वर्षाणि नोदेति-इति वृत्तान्तकथनं । पतिव्रता-तत्पत्योः पूर्व्वजन्मवृत्तान्तकीर्त्तनं। ततः हरिहरादिभिरभ्यर्थितया अनसूयया संस्तुतायाः भर्तुरनामयत्वलाभेन प्रीतिमापन्नायाः तस्याः अनुमत्या पुनः सूर्य्योदयादिकथनञ्च ।

३–७ अध्याये,—'पुत्रास्त्रया मे भवन्त्विति' देवानां पुरतोऽनसूयायाः प्रार्थनादिकथनं। सह्याद्रौ दण्डकारण्ये अत्रेराश्रमशोभावर्णनं। अनसूयागर्भे विष्णोर्जन्मग्रहणकथनं । तस्य दत्तात्रेयसमाख्याकथनञ्च । तथा शिवपितामहयोः तद्गर्भे जन्मग्रहणकथनं । तयोः यथाक्रमेण दुर्व्वासःसोमेति नामप्राप्तिकथनञ्च। भूगोलसंस्थानकीर्त्तनं। दत्तात्रेयस्य आश्रमे कृष्णामलकवृक्षतले चतुर्भुजस्य विष्णोरवस्थानकथनं। कृष्णामलकवृक्षस्य उद्भवादिकथनं। गर्गेन ब्रह्मणा कृतं विष्णुस्तोत्रं। तत्र तत्कृतविष्णुप्रतिमाप्रतिष्ठाकथनं। भ्रातृदर्शनलालसस्य दुर्व्वाससः सोमलोकगमनादिविवरणकीर्त्तनं। दत्तात्रेयस्य पुत्रतः परशुरामेण कार्त्तवीर्य्यार्ज्जुनस्य दुश्चेष्टितादिकथनं। तत्र जमदग्निरेणुकयोरन्त्येष्टिक्रियासम्पादनादिकथनञ्च ।

८–११ अध्याये,—सह्याद्रौ सर्व्वेषां तीर्थानामवस्थानकथनं । भानुतीर्थकथनं। तत्र भानुना निजकन्याहरणवृत्तान्तकीर्त्तनं। ब्रह्मतीर्थमाहात्म्यादिकथनं। गौतमतीर्थमाहात्म्यादिकथनं । अगस्त्यतीर्थमाहात्म्यादिकीर्त्तनं। एकदा द्वादशवार्षिक्या अनावृष्ट्या पीड़ितानामृषीणां वैक्लव्यदर्शनेन सन्तप्तहृदयेन गौतमेन तपोबलेन व्रीहीन् समुत्पाद्य तेभ्यो भोजनदानवृत्तान्तकीर्त्तनं। पद्मतीर्थमाहात्म्यादिकथनं । तत्र शृङ्गवेरपुराधीशस्य वज्रधारस्य नृपतेरुपाख्यानकथनं। गदातीर्थमाहात्म्यकथनं । सोमतीर्थकथनं। पुत्रतीर्थकथनं। लक्ष्मीतीर्थकथनं। बाणतीर्थकथनं। रुद्रतीर्थकथनं । खड्गतीर्थकथनं । गदातीर्थे रामचन्द्रेण वनवासगतेन दशरथमुद्दिश्य पिण्डदानवृत्तान्तकथनं। चन्द्रेण ताराहरणविवरणकथनं। गदातीर्थादीनामुत्पत्तिकथनञ्च।

विषयः। १२-१४ अध्याये,—तपसा सन्तोषिताद् आशुतोषात् वाणेन सहस्रबाहुत्वलाभवृत्तान्त-कीर्तनं। परिणयसमये गिरिजायाः रूपदर्शनेन मुग्धस्य ब्रह्मणः रेतःसेकात् बालखिल्यादीनां मुनीनामुत्पत्तिकथनं। अमरतीर्थमाहात्म्यादिकथनं। वसुतीर्थ-माहात्म्यकथनं। माहेश्वरतीर्थमाहात्म्यकथनं। शङ्खतीर्थमाहात्म्यकीर्तनं। अत्र शङ्खासुरकृतवेदहरणवृत्तान्तकथनं। चक्रतीर्थमाहात्म्यकथनं। रुद्रतीर्थमाहात्म्य-कथनं। बलाहकतीर्थमाहात्म्यकथनं। एवं स्कन्दतीर्थ-गोतीर्थ-दुर्गातीर्थ-हंसतीर्थ-पुष्करतीर्थ-वह्नितीर्थ-मयूरतीर्थानां माहात्म्यकथनं। कालजिह्वाभिधानस्य असुर-राजस्य शिवाद् वरप्राप्तिकथनं। हयशीर्षरूपेण भगवता तन्निपातनविवरणकथनं। तत्र हयशीर्षस्य रूपादिवर्णनञ्च। लक्ष्मीतीर्थमाहात्म्यकथनं।

१५-१७ अध्याये,—कर्णधाराभिधेयस्य राज्ञः कर्म्मविपाकेन शृगालयोनौ जन्मादि-विवरणकथनं। चक्रतीर्थमाहात्म्यकथनं। एकादशरुद्राणां रूपवर्णनादिकं। चक्र-तीर्थाद् वाष्परूपेण मेघानामुत्पत्तिकथनं। कार्त्तिककृततारकासुरविजयवृत्तान्त-कीर्तनं। त्रिपञ्चोः पितामहस्य शय्याभावेन तत्र अकृतार्थस्य च तपस्यादिवर्णनं। देवीकृतदुर्गासुरवधवृत्तान्तकीर्त्तनं। वृषाकपिनामकतीर्थस्य माहात्म्यकथनप्रसङ्गेन धेनुकाद्यसुरवधजनितपापेन सन्तप्तहृदयस्य श्रीकृष्णस्य नारदोपदेशेन चक्रतीर्थ-गमनादिविवरणकथनं। वृषाकपिनामप्राप्तिकथनं। वृषाकपिरूपवर्णनञ्च। हंस-रूपस्य भगवतः चक्रतीर्थागमनवृत्तान्तकथनं। खाण्डवदाहकस्य दहनस्य चक्र-तीर्थागमनवृत्तान्तकथनं। रूपवर्णनञ्च। मयूरतीर्थमाहात्म्यकथनप्रसङ्गेन कार्त्तिक-तारकयोः युद्धसमये गरुड़ांशस्य मयूरस्य उत्पत्त्यादिकथनं।

१८, १९ अध्याये,—पुरा किल कर्द्दमो नाम प्रजापतिः देवहूत्यां वासुदेवांशभूतं कपिलाभिधानं पुत्रमजीजनत्। अथ कपिलेन अनिच्छतापि पितुरनुज्ञया तपस्यातो निवृत्तेन देवहूत्याः पुरतः साङ्ख्ययोगः कथित इति विवरणकथनपूर्व्वकं कपिलतीर्थमाहात्म्यकीर्तनं। कर्द्दमतीर्थकथनं। देवहूतितीर्थकथनं। सिद्धतीर्थ-कथनं। महिषासुराद् भीतानामिन्द्रादीनां लोकपालानां सह्याद्रिगमनपूर्व्वकं। तत्र स्वस्वनाम्ना तीर्थकरणवृत्तान्तकथनं। सिद्धनद्या उत्पत्तिविवरणकथनं। महा-देवप्रसादेन गयासुरशरीरस्य पवित्रताकथनं। तस्य मस्तकं गृहीत्वा ब्रह्मणो यज्ञा-नुष्ठानवृत्तान्तकथनं। गयशिरसि पिण्डदानादिमाहात्म्यकथनञ्च।

२०, २१ अध्याये,—कोटीश्वरतीर्थमाहात्म्यकथनं। तत्र शतबिन्दुतीर्थमाहात्म्य-कीर्त्तनं। सहस्रबिन्दुतीर्थमाहात्म्यकीर्त्तनं। सोमतीर्थमाहात्म्यकथनं। अग्नितीर्थ-माहात्म्यकथनं। सूर्य्यतीर्थमाहात्म्यकथनप्रसङ्गेन द्वादशादित्यध्यानकथनं। विरज-तीर्थ-शिवतीर्थ-पद्मतीर्थ-हरितीर्थादिमाहात्म्यकथनं। कपिलतीर्थमाहात्म्यकथन-

विषयः। प्रस्तावेन भगवत्प्रीत्यर्थं रन्तिदेवस्य तपस्यादिवर्णनं। तत्र कपिलाभिधानायाः नद्याः उत्पत्तिकथनञ्च। करूषतीर्थमाहात्म्यकथनं। तत्र सिन्धुदेशेषु कश्चिद् ब्राह्मण आसीत्। तस्य सुमतिः सुरुचिश्चेति द्वौ पुत्रौ बभूवतुः। अथैकदा वेश्यासक्तेन सुरुचिना सुरापानेन उन्मत्ततया चौरबुद्ध्या कश्चिद् ब्राह्मणो हतः, हतश्च तेन प्रजावतीसतीत्वरत्नमितिवृत्तान्तकीर्त्तनं। कर्म्मतीर्थ-पितृतीर्थादिमाहात्म्यकथनं। रेणुकातीर्थमाहात्म्यकथनप्रसङ्गेन रेणुकाजमदग्न्योः प्राणनाशनपूर्व्वकं कार्त्तवीर्य्यार्ज्जुनेन धेनुहरणवृत्तान्तकीर्त्तनं।

२२–२५ अध्याये,—शक्तितीर्थमाहात्म्यकथनं। तत्र सरस्वती-गौरीप्रभृतीनां शक्तीनां ध्यानादिकथनञ्च। शेषतीर्थकथनं। तत्र शेषपर्य्यङ्कशयानस्य भगवतो ध्यानकथनं। रत्नगिरिवर्णनं। मातृतीर्थकथनं। ब्रह्मतीर्थकथनं। सोमतीर्थकथनं। रामतीर्थकथनं। शिवतीर्थकथनं। वैनायकतीर्थकथनं। फल्गुतीर्थकथनं। कालिकातीर्थकथनञ्च। तत्र मातृकाणां रूपकथनं। सर्व्वतीर्थमाहात्म्यकथनं। अम्बातीर्थमाहात्म्यकथनं। दक्षिणामूर्त्तेः शिवस्य रूपवर्णनादिकं। अष्टवसुकथनं। तत्र वसूनां प्रत्येकं ध्यानकथनं। भास्करालयतीर्थमाहात्म्यकथनं। तत्र सिद्धचण्डिकायाः ध्यानादिकथनं। धर्म्मस्य रूपकथनं। आयुर्व्वेद-धनुर्व्वेद-शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिष-मीमांसा-न्याय-धर्म्मशास्त्र-पुराणेतिहास-नृत्यशास्त्र-पञ्चरात्र-पाशुपत-पातञ्जल-साङ्ख्यादीनां शास्त्राणां ध्यानकथनं, तत्र तत्र अधिष्ठातृदेवताकीर्त्तनञ्च।

२६–३० अध्याये,—नारदादीनां ध्यानकथनं। काल-निमेष-काष्ठा-कला-क्षण-मुहूर्त्त-प्रहरादिध्यानकथनं। नरसिंहध्यानकथनं। गरुड़-विनायक-स्कन्दानां रूपवर्णनं। लक्ष्मीनारायणरूपवर्णनं। वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धरूपचतुर्व्यूहस्य रूपवर्णनं। भगवतः मत्स्यावतारे शृङ्गिमत्स्यरूपत्वकथनं। बलराम-कृष्ण-प्रद्युम्नानिरुद्ध-शाम्बप्रभृतीनां रूपकथनं। कल्किरूपस्य भगवतो रूपवर्णनं। बुद्धस्य रूपकथनं। व्यासस्य रूपवर्णनं। धन्वन्तरिरूपवर्णनं। श्यामलीग्रामस्य चतुर्द्वारेषु स्थितानां हाटकेशादीनां माहात्म्यकथनं। कपालमोचनतीर्थमाहात्म्यकथनप्रसङ्गेन शिवकृतब्रह्मशिरश्छेदनवृत्तान्तकथनादिकं। शङ्करतीर्थविवरणकथनं।

३१–३९ अध्याये,—सिद्धतीर्थयात्राप्रकारादिकीर्त्तनं। मानसतीर्थयात्राप्रकारकथनं। उत्तरमानसतीर्थयात्राप्रकारकथनं। सप्तक्रोशीतीर्थमाहात्म्यकथनं। तत्र यात्राप्रकारकीर्त्तनञ्च। गोण्डलीतीर्थमाहात्म्यनिरूपणं। तत्र नृत्यगीतादिलक्षणकीर्तनं। तत्तत्कालनिरूपणञ्च। गायकलक्षणं। रागकथनपूर्व्वकं तद्भार्यापत्यादिनिरूपणं। वैखरीपश्यन्तीप्रभृतीनां स्थानादिनिरूपणं। चैत्रशुक्लपञ्चम्यां मघानक्षत्रे रुद्रस्य

विषयः। जन्मकथनं। कार्त्तिकपौर्णमास्यां चण्डनामकदैत्यशरीरेण चण्डकाभिधानायाः वीणायाः उत्पत्त्यादिकथनं। महादेवात् तालोत्पत्तिकथनं। नाट्य-नृत्त-नृत्यानां पार्थक्यकथनमेषामवान्तरभेदकथनञ्च। ताण्डवलास्ययोरुत्पत्तिकथनं। स्थानविशेषे नृत्यविशेषनियमनं।

४०—४६ अध्याये,—रेणुकासहस्रनामस्तोत्रकथनं। रेणुकापूजनविधानादिकीर्त्तनं। असुरगणनिर्ज्जितस्य निर्ज्जरेन्द्रस्य क्षीरोदशायिना सह संवादादिकथनं। कान्यकुब्जाधिपस्य रेणुराजस्य कन्यात्वेन अदितेर्जन्मग्रहणकथनादिकं। तस्याः एकवीरा रेणुका चेति नामद्वयकथनं। अग्निं प्रति 'सर्व्वभक्ष्यो भवेति' भृगोः शापदानवृत्तान्तकथनं। जमदग्नेर्जन्मविवरणकीर्त्तनं। जह्नुवंशकथनं। ऋचीकवंशकीर्त्तनं। रेणुकास्वयम्बरवर्णनं। तया सार्द्धं जमदग्नेः परिणयविवरणकीर्त्तनं। रेणुकाकृतकाम्बोजादिदेशजयकथनं। रेणुकायाः पञ्चपुत्रजननकथनादिकं। परशुरामस्य उद्भवादिकथनं।

४७—६१ अध्याये,—तपस्यया सन्तोषितात् महादेवात् परशुरामेण पाशुपताद्यस्त्रप्राप्तिकथनं। सृष्टेः पूर्व्वं विश्वमिदं ज्वालामालाकुलमासीत्। तत्रैकदा महादेवेन सह प्रभारूपायाः कस्याश्चित् नार्य्याः संवादकथनं। जमदग्निरूपेण महादेव एव अवततार इति कथनादिकं। रेणुकावधवृत्तान्तकीर्त्तनं। तस्याः पुनर्जीवनकथनञ्च। मूर्त्तिमता क्रोधेन सार्द्धं जमदग्नेः संवादकथनं। कार्त्तवीर्य्यार्ज्जुनस्य उद्भवादिकथनं। तस्माद् दशग्रीवस्य निग्रहादिवृत्तान्तकीर्त्तनं। अर्ज्जुनकृतकामधेनुग्रहणविवरणं। दत्तात्रेयाश्रमे रामकृतरेणुकामूर्त्तिप्रतिष्ठावृत्तान्तकथनं।

६२—७० अध्याये,—अर्ज्जुनस्य दुर्निमित्तदर्शनविवरणकीर्त्तनं। रामकृतमाहिष्मतीपुरीदाहनवृत्तान्तकीर्त्तनं। रामार्ज्जुनयोरद्भुतयुद्धवर्णनं। परशुरामस्य दिग्विजयवर्णनं। तस्य कैलासगमनवृत्तान्तकथनं। राक्षसैः सार्द्धं समरसंरम्भवर्णनञ्च। स्यमन्तपञ्चकतीर्थवृत्तान्तकथनं। रामतीर्थविवरणकथनं। प्रत्यक्षतां गताभ्यां मातापितृभ्यां सह परशुरामस्य संवादकथनादिकं। यजमानेन रामेण कश्यपाय पृथिवीदानविवरणकथनं।

७१—७५ अध्याये,—विस्मृतवेदचतुष्टयस्य ब्रह्मणो रेणुकाश्रमे तपस्यावर्णनं। दत्तात्रेयप्रसादेन तस्य वेदप्राप्तिकथनं। पुत्रविक्रयजनितपापेन अजीगर्त्तस्य निरयगमनवृत्तान्तादिकीर्त्तनं। नरकवर्णनं। इन्द्रद्युम्नस्य उपाख्यानकथनं। हेमकुण्डाभिधानस्य विप्रस्य प्रयागतीर्थे पितृलोकदर्शनवृत्तान्तकीर्त्तनं। विष्णोर्दैवदेवेश्वरनामप्राप्तिविवरणकथनं। दत्तात्रेयस्य गार्हस्थ्यादिभ्यः पञ्चमाश्रमाश्रयत्वकथनं। कूष्माण्डकवृक्षस्य उत्पत्त्यादिकथनं। बाभ्रिकस्य द्विजस्य उपाख्यानकथनं। ब्रह्मस्थान-

तीर्थमाहात्म्यादिकथनं। मूर्त्तिमता हेमगिरिणा सार्द्धं देवानां रेणुकाश्रमगमन-विवरणकथनं। शृङ्गवेरपुराधिपतेः वज्रधारस्य नृपतेरुपाख्यानकीर्त्तनं।
७६-८२ अध्याये,—वज्रधारेण शाखामृगस्य कस्यचित् ब्राह्मणस्य प्राणनाशनवृत्तान्त-कीर्त्तनं। शाखामृगस्य जन्मवृत्तान्तकथनं। यमकिङ्करताड़ितस्य भ्रान्तचित्तस्य कस्यचित् पुरुषस्य अगस्त्येन सह संवादकथनं। भास्करालयमाहात्म्यकथनं। तत्र रिरंसया आगच्छन्तं भास्करं दृष्ट्वा उषायाः मृगीरूपेण पलायनवृत्तान्तकथनं। चक्रतीर्थमाहात्म्यकथनं। तत्र जम्बूकस्य उपाख्यानकथनं। शङ्करतीर्थवर्णनं। कोटीश्वरमाहात्म्यादिवर्णनं। पटेश्वरमाहात्म्यवर्णनं। कार्त्तिकमासमाहात्म्यकथनं। कन्यादानादिमाहात्म्यकथनं। विवाहकालादिकथनं। कन्याविक्रये महापाप-कथनं। उपनयनसंस्कारादिकरणे फलश्रुतिकथनं। विद्यादानमाहात्म्यकीर्त्तनञ्च।
इति स्कन्दपुराणीयसह्याद्रिखण्डोत्तरविभागस्य विवरणम्।

No. 1749. स्कन्दपुराणीयसह्याद्रिखण्डे तुरजामाहात्म्यविभागः।

Substance, country-made paper, 14 × 7 inches. Folia, 67. Lines, 12 on a page. Extent, 4,128 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilláh Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Incorrect.

Turajá Máhátmya.—The history of Turajá *alias* Tvaritá, a goddess. She was the wife of a Ṛishi named Kardama. On his death she was about to ascend the funeral pile of her lord, but desisted on a celestial voice preventing her. She then retired to the Himálaya to pass the rest of her life in devotion. A demon encountered her on a peak on the Himálaya, and was so struck by her charms as to be impelled to offer her violence. A goddess descended from heaven, and saved her. In the course of giving this narrative, the author recounts a number of stories, and the religious merits of a great number of sacred places in Central India. A brief account of the Rámáyaṇa is also given. The work extends to 15 chapters, and professes to be a part of the Sahyádri Khaṇḍa of the Skanda Puráṇa. The name is sometimes written Tulajá.

Beginning. श्रीगणेशाय नमः। नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥
ऋषय ऊचुः। महासेन महादेवनन्दनानन्तविक्रम।

सर्व्वज्ञाननिधे सौम्य शिवाङ्कादकर प्रभो ॥
त्वत्प्रसादेन चास्माभिरितिहासाः सहस्रशः ।
पुराणानि च सर्व्वाणि श्रुतानि देववल्लभ ॥
न तृप्तिमधिगच्छामः सुधास्वादे यथामराः ।
कथिता या त्वया देव त्वरिता नाम देवता ॥
अपरं तुरजा नाम तस्या जातं कथं विभो ।
यमुनाद्रौ किमर्थं सा अवतीर्णा विकाशिता ॥
एतदिच्छामहे श्रोतुमनुप्राप्ता भवाम ते ।
साकल्येन तु नो ब्रूहि त्वरितायाः कथामिमां ॥
स्कन्द उवाच । शृण्वन्तु ऋषयः सर्व्वे देवीमाहात्म्यमुत्तमं ।
कैलासशिखरासीनं शङ्करं पार्व्वतीपतिं ॥ इत्यादि ॥

End. उक्तवान् मुनयः श्रेष्ठाः तत्सर्व्वं कथितं मया ।
अविद्यारहितो भूत्वा ततः सिद्धिं गमिष्यति ॥

Colophon. इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे तुरजामाहात्म्यविभागे शिववसिष्ठसंवादे द्वाविंशतितमोऽध्यायः । शुभमस्तु ।

विषयः । १–३ अध्याये,—शिवेन सह वसिष्ठनामकस्य ऋषेः संवादे त्वरितापराभिधानायाः तुरजायाः माहात्म्यकीर्त्तनं । पुरा किल कृतयुगे कईमो नाम कश्चिद् ब्राह्मण आसीत् । एकदा कालधर्म्ममुपागते तस्मिन् तत्पत्नी सहमरणार्थं कृतनिश्चया आकाशवाणीमुपश्रुत्य ततो निवृत्तापि नितरां निर्व्वेदमापन्ना तपश्चरणार्थं त्वरितं सुमेरुप्रदेशं प्रययौ । तत्र च कुकुराभिधानः कश्चिद् दानवेन्द्रः मृगयार्थमागतः तां वीक्ष्य सम्भुचितकामतया तदभिप्रायमनाकलय्यैव आक्रमणाय कृतोद्यमो बभूव । अत्रान्तरे त्वरितायाः देव्याः आविर्भावादिकथनं ।

४–९ अध्याये,—परशुरामं प्रति त्वरितामूर्त्तेः रेणुकायाः रामलक्ष्मणयोः भाविवृत्तान्तवर्णनं । तत्र सङ्क्षेपेण रामस्य वनवासवृत्तान्तकीर्त्तनं । तत्र रामेण रेणुकादर्शनानन्तरं तत्स्तोत्रकथनं । पुनश्च रामकृतसहस्रनामस्तोत्रकीर्त्तनं । रामं प्रति रेणुकया वनवासोपयुक्तदेशदानविवरणकथनं । रामतीर्थकथनं । लक्ष्मणतीर्थकथनं । त्वरितया देव्या सह ब्रह्मणः संवादकथनं । वासवादिभिः सर्व्वैः देवैः गङ्गादिभिश्च सर्व्वाभिः देवीभिः सार्द्धं ब्रह्मणः तत्र अवस्थानकथनं । ब्रह्मणा आज्ञापितेन विश्वकर्म्मणा तत्र विचित्रपुरीनिर्म्माणकथनं ।

१०–१४ अध्याये,—त्वरिताश्रमे तीर्थभूतानां सर्व्वासां नदीनामागमनवृत्तान्तकथनं । कल्लोलतीर्थमाहात्म्यकथनं । अमृततीर्थमाहात्म्यकथनं । तत्र तत्र

स्नाने सर्व्वरोगशान्तिकथनं। धारातीर्थस्य उत्पत्तिकथनं। तन्माहात्म्यकथनञ्च। धारायाः त्रिवेणीत्वकथनं। ब्रह्मकुण्डमाहात्म्यकथनं। विष्णुतीर्थमाहात्म्यकथनं। गौतमस्य विष्णुप्रीत्यर्थं धारातीर्थे तपश्चरणवृत्तान्तकीर्त्तनं। गौतमकृतविष्णुस्तोत्रकथनं। तत्कृपया गौतमस्य इन्द्रद्युम्नरूपेण जन्मग्रहणकथनं। औदुम्बरतीर्थमाहात्म्यकीर्त्तनं। नागतीर्थमाहात्म्यकीर्त्तनं। रावणानुजेन ऐरावणेन पातालात् निर्व्वासितेन नागराजेन त्वरिताश्रमगमनपूर्व्वकं तपस्यानुष्ठानादिवर्णनं। मातङ्गीतीर्थमाहात्म्यकथनं।

१५ अध्याये,—राक्षसाधिपतेः मतङ्गस्य उपाख्यानकीर्त्तनं। तत्पीड़ितानां देवानां कात्यायनीस्तोत्रकीर्त्तनं। सिंहवाहिन्या तया सह मतङ्गस्य समरसंरम्भवर्णनं। तत्र तत्सैनिकयोः निशुम्भहयग्रीवयोः विनाशादिकथनं। मातङ्ग्या आविर्भावादिकथनं। मातङ्ग्या शरविद्धस्य मतङ्गस्य भुजङ्गादिरूपग्रहणविवरणकथनं। नृसिंहतीर्थमाहात्म्यकीर्त्तनं। गोकुलतीर्थमाहात्म्यकथनं। त्वरितायाः पूजाविधानकीर्त्तनं। सा तु आश्विनशुक्लप्रतिपद आरभ्य नवमीपर्य्यन्तं यावत्—इति कथनं। तत्र पञ्चपल्लव-पञ्चामृत-पञ्चगव्यादीनां लक्षणपरिभाषादिकथनं। अन्यान्यसमयेऽपि तस्याः पूजाकथनं। दत्तात्रेयपूजाविधिकथनं। देवीदर्शनार्थं यात्राविधानकथनं। फलश्रुतिकीर्त्तनञ्च।

No. 1750. स्कन्दपुराणीयशम्भलग्राममाहात्म्यम्।

Substance, country-made paper, 13½ × 7¼ inches. Folia, 74. Lines, 8 on a page. Extent, 1,812 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilláh Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Incorrect.

S'ambhalagráma Máhátmya.—A part of the Bhúmi Khaṇḍa of the Skanda Puráṇa. It is devoted to the religious merits of the various sacred places and pools in the Province of S'ambhala-gráma—modern Sambhalpur. As usual, each sacred place has a story attached to it, to illustrate its virtues and sin-removing powers. The work extends to 24 chapters. It is a local legend, not named in the account of the Puráṇas given in the Nárada Puráṇa.

Beginning. ॐ नमः परमात्मने। नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥
+ + + + काले पुष्यन्ति पादपाः।

वर्षन्ति तोयदाः काले तस्मात् कालं न लङ्घयेत् ॥
गायत्रीमन्त्रतो ++ दत्तं येनाञ्जलित्रयं ।
काले सवित्रे किन्न स्यात् तेन दत्तं जगत्त्रयं ॥
किं किं न सविता सूते काले सम्यगुपासितः ।
आयुरारोग्यमैश्वर्य्यं वसूनि सपशूनि च ॥
पुत्रमित्रकलत्राणि क्षेत्राणि ++ धानि च ।
भोगांश्च विविधांश्चापि स्वर्गं वाप्यपवर्गकं ॥
दुर्लभा सर्व्वमन्त्रेषु गायत्री प्रणवान्विता ।
न गायत्र्याधिकं किञ्चित् त्रयीषु परिविद्यते ॥
न गायत्रीसमो मन्त्रो न शम्भलसमं पुरं ।
न कृष्णसदृशो देवः सत्यं सत्यं पुनः पुनः ॥ इत्यादि ।

End. अधीत्येमां कथां दिव्यां न तृप्तिमधियाम्यहं ।
तव वागमृतं भूयो मनो मे पातुमिच्छति ।
इदानीं ब्रूहि मे स्वामिन् शालग्रामकथामृतं ॥
स्कन्द उवाच । नन्दिग्रामस्य माहात्म्यं हरेश्चैव द्विजोत्तम ।
कथितञ्च महापुण्यं शालग्रामे निशामय ॥

Colophon. इति श्रीस्कन्दपुराणे भूखण्डे शम्भलग्राममाहात्म्यं समाप्तं । इति शं ।

विषयः । १–३ अध्याये,—स्कन्देन सह ऋषीणां संवादेन शम्भलग्राममाहात्म्यकथनं । गायत्रीमाहात्म्यकीर्त्तनं । शम्भलेश्वरलिङ्गमाहात्म्यकथनं । चन्द्रेश्वरलिङ्गमाहात्म्यकथनं । भुवनेश्वरलिङ्गमाहात्म्यकथनं । शम्भलेश्वरस्वरूपवर्णनं । निषादाधिपतेः धूम्राक्षस्य आतिथ्यादिवर्णनं । काम्पिल्यनगरवास्तव्यस्य सोमयाजिनो देवशर्म्मण उपाख्यानकीर्त्तनं । तत्पुत्रस्य द्यूतकारस्य वृत्तान्तकीर्त्तनं ।

४, ५ अध्याये,—ययातिकृतराजसूययज्ञविवरणकथनं । तेन सह नारदस्य संवादादिकथन । नारदेन अर्ककुण्डेश्वरमाहात्म्यकीर्तनं । अत्र अङ्गदेशस्थस्य जातकुष्ठरोगस्य शालूकाभिधानस्य वैश्यस्य विवरणकथनं । हंसतीर्थमाहात्म्यकथनं । तत्र काकैः सार्द्धं क्रौञ्चानां विवादवृत्तान्तकीर्तनं । कृष्णतीर्थमाहात्म्यकथनं । श्वेतद्वीपमाहात्म्यकथनं । शङ्खमाधवतीर्थमाहात्म्यकथनं । लोलार्कतीर्थमाहात्म्यकीर्तनं । तत्र सुरथाभिधानस्य नरपतेरुपाख्यानकथनं । ब्रह्मेश्वरमाहात्म्यकथनं । दशाश्वमेधवर्णनञ्च ।

६–९ अध्याये,—पिशाचमोचनतीर्थवर्णनं । तत्र पिशाचेन सह कस्यचिद् ब्राह्मणस्य संवादकथनादिकं । चतुर्मुखतीर्थकथनं । हरिमन्दिरतीर्थमाहात्म्यकथनं

विषयः। विजयतीर्थमाहात्म्यकीर्त्तनं। एकान्तीतीर्थवर्णनादिकं। अवन्तीसरस्तीर्थविवरण-कथनं। अत्र कौशिकीतीरनिवासस्य यज्ञदत्तस्य उपाख्यानकथनं। तस्य निर्व्वे-दादिवर्णनं। तीर्थसागरमाहात्म्यादिकथनं। अग्निपञ्चकतीर्थमाहात्म्यादिकीर्त्तनं यमघण्टकतीर्थमाहात्म्यादिकीर्त्तनं।

१०–१३ अध्याये,—महोदकीतीर्थमाहात्म्यादिकथनं। मणिकर्णिकायाः महोद-कीनामप्राप्तिकारणकथनं। तत्र सोमवंशप्रभवस्य पुरञ्जयनामकस्य राजर्षेर्विवरण-कथनं। शिवेन तस्य पूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च। ऋणमोचनतीर्थमाहात्म्यादि-कथनं। पापमोचनतीर्थमाहात्म्यादिकीर्त्तनं कलोदकतीर्थमाहात्म्यादिकथनं। सोमतीर्थमाहात्म्यादिकथनं। विस्तरतः प्रयागतीर्थवर्णनं। मृत्युतीर्थमाहात्म्यादि-कथनं। एवं ब्रह्मावर्त्त-नर्म्मदा-धर्म्मकूपतीर्थानां माहात्म्यकथनं। पञ्चहृदयतीर्थस्य माहात्म्यकथनप्रसङ्गेन विष्णुना सह पितृलोकानां संवादादिकथनं। भविष्य-गङ्गाया विवरणकथनं। तत्र विष्णुना सार्द्धं तापस्य संलापादिवर्णनञ्च।

१४–१७ अध्याये,—गोमतीतीर्थमाहात्म्यकथनप्रसङ्गेन तस्या उद्भवादिवृत्तान्तकी-र्त्तनं। अत्र विश्वपालाभिधानस्य वणिज उपाख्यानकीर्त्तनं। गोदावरीतीर्थमाहात्म्य-कथनं। भारतीतीर्थमाहात्म्यकीर्त्तनं। रेवाकुण्डमाहात्म्यादिकथनं। अत्र चटक-मिथुनस्य विवरणकीर्त्तनञ्च। तीर्थगोपालमाहात्म्यादिकथनं। अत्र अत्रिवंश-सम्भूतस्य दत्ताभिधेयस्य विप्रस्य उपाख्यानकथनं। आनन्दसरस्तीर्थमाहात्म्यकीर्त्तनं। अत्र दशार्णविषयस्य लवणविक्रयिणो वाह्निकाभिधानस्य ब्राह्मणस्य उपाख्यान-कथनं। तस्य पुनर्जन्मनि क्षत्रियवंशे जन्मादिविवरणकीर्त्तनञ्च। भद्रकाश्रममाहा-त्म्यादिवर्णनं।

१८–२१ अध्याये,—अत्रिकाश्रममाहात्म्यकथनप्रसङ्गेन अत्रेस्तपस्यादिवर्णनं। देव-तीर्थमाहात्म्यकथनं। शिष्णुतीर्थमाहात्म्यकीर्त्तनं। गङ्गातीर्थमाहात्म्यकथनमुखेन कमलगन्धिनीनामिकाया विद्याधर्य्या उपाख्यानकथनं। शरद्वीपतीर्थमाहात्म्य-कथनं। तत्र गोधाया उपाख्यानकथनञ्च। मोक्षतीर्थमाहात्म्यादिकथनं। चक्रहृद-तीर्थमाहात्म्यकीर्त्तनप्रसङ्गेन रैभ्यस्य उपाख्यानकथनं।

२२–२४ अध्याये,—रुद्रयुग्मतीर्थमाहात्म्यकथनं। अत्र द्विमणिनामकस्य नृपते-रुपाख्यानकथनञ्च। गुप्ततीर्थमाहात्म्यकथनादिकं। अत्र हरिशर्म्मसञ्ज्ञकस्य राज्ञ उपाख्यानकथनञ्च। गयातीर्थमाहात्म्यादिकथनं। यज्ञकूपतीर्थमाहात्म्यादिकीर्त्तनं। सप्तसागरकूपतीर्थमाहात्म्यादिकथनं। विष्णुभक्तिमाहात्म्यकथनं। कलिधर्म्मकथनं। तत्र नराणां प्रकृतिवर्णनादिकं। शम्भलग्रामे विष्णुयशोऽभिधानस्य विप्रस्य पुत्रत्वेन कल्क्यवतारविवरणकथनञ्च। कलौ विशेषेण शम्भलग्राममाहात्म्यकीर्त्तनं।

No. 1751. स्कन्दपुराणीयगणेशमाहात्म्यखण्डः ।

Substance, country-made paper, 13½ × 7 inches. Folia, 45. Lines, 12—13 on a page. Extent, 1,764 s'lokas. Character, Nágara. Date, Sm., 1834. Place of deposit, Nasípura, Zilláh Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Generally correct.

Gaṇes'a Máhátmya.—The life of Gaṇes'a, his birth, loss of human head, wars, sanctity and virtues, as also the ritual of worshipping him. The work extends to 22 chapters and professes to be a part of the Gaṇes'a Khaṇḍa of the Skanda Puráṇa.

Beginning. श्रीगणेशाय नमः । स्कन्द उवाच । शिवशम्भो महादेव सर्व्वज्ञ सुखदायक ।
आख्यानानि सुपुण्यानि श्रुतानि त्वन्मुखाम्बुजात् ॥
विचित्राणि पवित्राणि सर्व्वाघशमनानि च ।
शाक्त-शाङ्कर-सौराणि बहूनि वैष्णवाणि च ॥
येषां श्रवणमात्रेण पलायन्ते महापदः ।
पुरुषार्थाः प्रसिद्ध्यन्ति महादेव जगत्पते ॥
तथापि तृप्तिं नो यामि पायं पायं सुधामिव ।
अतस्त्वं कृपया ब्रूहि गणेशचरितं मम ॥
अवतारान् सेतिहासान् सर्व्वकामप्रपूरकान् ।
शरण्यानस्य लोकस्य वक्तुमर्हसि शङ्कर ॥
शिव उवाच । सम्यक् पृष्टं त्वया स्कन्द सर्व्वसन्तोषकारकं ।
गणेशचरितं वक्ष्ये सेतिहासं तवानघ ॥ इत्यादि ।

End. व्यास उवाच । शिवेन कथितो विप्राः स्कन्दाय पृच्छतेऽखिलः ।
विनायकस्य महिमा स भवद्भ्यो निवेदितः ॥

Colophon. इति श्रीस्कन्दपुराणे गणेशमाहात्म्यखण्डे शिवस्कन्दसंवादे गणेशावतारवर्णनो नाम द्वाविंशतितमोऽध्यायः । संवत् १८३४ । कार्त्तिकमास ।

विषयः । १ प्रथमे अध्याये,—शिवस्कन्दयोः संवादप्रसङ्गेन गणेशस्य निर्व्विशेषत्वकथनं । गणेशात् हरिहरब्रह्मादीनामुत्पत्तिकथनं । प्रजासृष्ट्यर्थं गणेशेन आज्ञप्तस्य प्रजापतेः तत्र अकृतकार्य्यस्य वक्रतुण्डमन्त्रजपादिवृत्तान्तकथनं । वक्रतुण्डनामनिर्व्वचनं । वक्रतुण्डावतारकथनञ्च ।

२, ३ अध्याये,—द्राविडदेशेषु अभिजिन्नामकः कश्चित् नृपतिरासीत्, स च अनपत्यतया नितरां निर्व्वेदमापन्नः पत्न्या सह वनं प्रविवेश । तत्र सञ्जातकरुणेन

विषयः। केनचित् मुनिना समुपदिष्टोऽसौ तपस्यार्थं सरस्वत्यास्तीरं प्रययौ। अथ सफलमनोरथोऽयं स्वराज्यं पुनरागम्य स्वपुत्रं यौवराज्ये अभिषिक्तवानिति वृत्तान्तकथनं। तत्र सरस्वत्याः नदीभावप्राप्तिकथनं।

४, ५, ६, ७ अध्याये,—अभिजित्पुत्रस्य गणस्य दिग्विजयोद्यतस्य देवानीकपराजयवृत्तान्तवर्णनं। अथैकदा मृगयार्थं महारण्यमुपागतोऽसौ बुभुक्षया पीड़ितैः सैनिकैः सार्द्धं कपिलस्य मुनेराश्रमं प्राप। स च चिन्तामणिमणिप्रभावेण सबलस्य तस्य यथोचितमातिथ्यं कृतवान्। गणकृतचिन्तामणिहरणविवरणकथनं। कपिलतपस्यया सन्तोषमापन्नस्य विनायकस्य गणबधार्थमाविर्भावकथनं। गणस्य दुःस्वप्नदर्शनविवरणं। गणबधवृत्तान्तकथनं। गणेशस्य चिन्तामणिनामप्राप्तिकथनञ्च।

८, ९, १० अध्याये,—वासवादीनां कपिलाश्रमे भोजनविवरणकथनं। तत्र सुप्रसन्नेन पुरन्दरेण कपिलाय चिन्तामणिदानवृत्तान्तकीर्त्तनञ्च। एकदा जृम्भमानस्य ब्रह्मणो मुखात् कस्यचित् रक्तवर्णपुरुषस्य उद्भवादिकथनं। तस्य सिन्दूरनामप्राप्तिकथनं। 'त्वत्कृतवेष्टनेन सर्व्वे भस्मीभविष्यन्तीति' ब्रह्मणा तस्मै वरदानकथनं। तेन कृतानुगमनस्य भयाकुलस्य ब्रह्मणो वैकुण्ठसमीपे पलायनादिकथनं। विष्णोरुपदेशेन सिन्दूरस्य विनायकेन सह युद्धार्थं कैलासगमनादिवृत्तान्तकथनं। तद्भयाकुलानां देवानां विनायकस्तोत्रकीर्त्तनं। पार्व्वतीपुत्रत्वेन अवतरिष्यामीति तान् प्रति विनायकस्य आश्वासवाक्यकथनादिकं। अर्द्धनारीश्वररूपेण नन्दनकानने शिवाशिवयोः विहारकथनं। गजासुरस्य जन्मवृत्तान्तकथनं। तच्चर्म्मपरिधानेन शिवस्य कृत्तिवासोऽभिधानप्राप्तिकथनञ्च। तन्मस्तकस्य पूज्यत्वकथनञ्च।

११, १२ अध्याये,—एकदा गर्भिण्याः पार्व्वत्या वायुरूपेण उदरमध्यं प्रविष्टेन सिन्दूरेण नखैः गर्भस्थस्य शिशोः शिरश्छित्वा नर्म्मदायां निक्षिप्तमपि पार्व्वत्यादीनां तद्वृत्तान्ताज्ञानकथनं। तत्र पार्व्वतीकुमारदिदृक्षया समवेतानामुपेन्द्रादीनां मस्तकहीनं बालकं पश्यतां प्रार्थनया विनायकेन शिवगृहस्थितं गजासुरमस्तकमेव शिरस्त्वेन स्वीकृतमिति कथनादिकं। गजाननकृतसिन्दूरबधवृत्तान्तवर्णनं।

१३, १४ अध्याये,—सौभरिनामकस्य मुनेः शापात् क्रौञ्चसञ्ज्ञकस्य गन्धर्व्वस्य मूषिकत्वप्राप्तिकथनं। ततः तत्कृतकारुण्येन सकरुणहृदयेन सौभरिणा 'गणेशवाहनो भविष्यतीति' तस्मै वरदानवृत्तान्तकथनं। इन्द्रस्याज्ञया विघ्नरूपेण कालपुरुषेण अभिरूपस्य राज्ञः यज्ञध्वंसवृत्तान्तकथनं। तत्र विघ्नराजावतारकथाकीर्त्तनं। तेन सह विघ्नस्य समरसंरम्भवर्णनञ्च।

१५, १६, १७, १८ मल्लासुरकृतवेदादिहरणविवरणकथनं। ब्राह्मणरूपधारिणा विनायकेन सर्व्वाणि शास्त्राणि गृहीत्वा वल्लालेति समाख्यामधिगतेन मुनिभ्यः

विषयः। वेदादिशास्त्रदानवृत्तान्तकथनं। मयूरेशरूपेण विनायकेन शङ्खासुरसोदरस्य कमलासुरस्य बधवृत्तान्तकथनं। मयूरेश्वरमाहात्म्यकथनञ्च।
१९, २०, २१, २२ अध्याये,—विन्ध्यदेशाधिपस्य धूमाभिधानस्य भूपालस्य भृगुणा सह संवादेन राज्ञः पूर्व्वजन्मवृत्तान्तवर्णनं। विन्ध्यदेशवास्तव्यस्य माधवाख्यस्य ब्राह्मणस्य पत्न्या अनपत्यतया निर्व्वेदमापन्नायाः तपस्यया सन्तोषितात् भगवतो वरप्राप्तिवृत्तान्तकथनं। माधवपुत्रस्त्वां हनिष्यतीति आकाशवाणीं निशम्य धूमस्य मूर्च्छादिविवरणकथनं। तत्र नीतिज्ञानां वादानुवादविवरणकथनं। माधवपुत्ररूपेण विनायकेन धूमबधवृत्तान्तकथनं। तस्य धूमकेतुनामप्राप्तिकथनं। गणेशनामनिर्व्वचनम्। त्रिपुरासुरस्य पुरत्रयनिर्म्माणादिवृत्तान्तकथनं। पिनाकपाणिकृत त्रिपुरबधविवरणकथनं। विशेषेण विनायकमाहात्म्यकथनञ्च। इति शम्।

No. 1752. स्कन्दपुराणीयसह्याद्रिखण्डे रेणुकामाहात्म्यविभागः।

Substance, country-made paper, 14 × 7 inches. Folia, 113. Lines, 9 on a page. Extent, 2,542 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilláh Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Generally correct.

Reṇuká Máhátmya.—The history of Reṇuká, daughter of Reṇuka, king of Kányakubja. S'iva was charmed by her beauty and wanted to marry her. The work extends to 64 chapters, and comprises a great number of anecdotes regarding various places in Central India, and of Ráma's peregrinations during his exile. It is said to be a part of the Sahyádri Khaṇḍa of the Skanda Puráṇa.

Beginning. ॐ नमो भगवते वासुदेवाय। नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥
ऋषय ऊचुः। यत् त्वया कथितं स्कन्द भुक्तिमुक्तिफलप्रदं।
विरजं मेखलं तीर्थं तदस्माभिः श्रुतं प्रभो॥
मातृतीर्थमिति ख्यातं विस्तराद् ब्रूहि षन्मुख।
का चैकवीरा सा देवी जमदग्निश्च को विभो॥
यस्या गर्भे समुद्भूतः स रामः क्षत्रियान्तकः।
जमदग्निः कथम्भूतः को धेनुं तस्य वाहरत्॥

कार्त्तवीर्य्यः स रामेण कथयस्व कथं हतः।
स्कन्द उवाच। देवानां दानवानाञ्च युद्धमासीत् सुदारुणं।
तद्दैतानजयन् दैत्या मायया बलिनः सुरान्॥
ततः वक्रादयो देवा निर्ज्जितास्तैर्महासुरैः।
निराकृतास्ते त्रिदशा गोविन्दं शरणं ययुः॥ इत्यादि।

End. श्रुत्वा माहात्म्यमतुलं पुरुषो भक्तिसंयुतः।
ब्राह्मणान् भोजयेत् पश्चात् दद्याद्दानान्यनेकशः॥
सर्व्वान् कामानवाप्नोति नात्र कार्य्या विचारणा।
इति सर्व्वं मुनीन्द्राय वरिष्ठाय तु शङ्करः॥
उक्तवान् मुनयः श्रेष्ठाः तत् सर्व्वं कथितं मया।
अविद्यारहितो भूत्वा ततः सिद्धिं गमिष्यति॥

Colophon. इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे रेणुकामाहात्म्ये शङ्करवसिष्ठसंवादे फलश्रुतिर्नाम चतुःषष्टितमोऽध्यायः। (इति प्रथमो भागः)।

विषयः। १–५ अध्याये,—स्कन्देन सह ऋषीणां संवादकथनं। असुरनिर्ज्जितानां निर्ज्जराणां क्षीरोदसागरगमनपूर्व्वकं विष्णुस्तोत्रकथनं। उपेन्द्रं पुत्रत्वेन अधिगन्तुं अदितेस्तपस्यादिवर्णनं। तस्या एकवीरेति सञ्ज्ञाप्राप्तिकथनं। पार्व्वतीपतिं पतित्वेन प्रार्थयमानायै तस्यै तेन वरदानवृत्तान्तकथनं। कन्यालाभार्थं कान्यकुब्जदेशनाथस्य रेणुकस्य शिवसन्तोषणविवरणकथनं। तस्य यज्ञानुष्ठानसमये कुण्डादेकवीराया आविर्भावादिकथनं। तस्या रेणुकानामकथनं। वरुणाद् भृगोरुत्पत्तिकथनं। वह्निं प्रति सर्व्वभक्षो भवेति तस्य शापदानवृत्तान्तकथनं। भृगुवंशकथनञ्च।

६–१२ अध्याये,—सुहोत्रराजकुमारस्य जह्नोः यज्ञस्थलीप्लावनेन कुपितस्य गङ्गाशोषणवृत्तान्तकथनं। युवनाश्वशापेन मानुषरूपायाः कावेर्य्याः जह्नुपत्नीत्वकथनं। तत्पुत्रस्य जनकस्य कुशाभिधानपुत्रोत्पत्तिकथनं। तपसा "प्रीतस्य इन्द्रस्य कुशपुत्रत्वेन जन्मग्रहणकथनं"। तस्य गाधिनामकरणं। तत्कन्यया सत्यवत्या सह ऋचीकस्य विवाहकथनं। जमदग्नेः उत्पत्तिकथनं। रेणुकया सह तस्य विवाहकथनं। तत्र स्वयम्बरसभायां समरसंरम्भवर्णनञ्च।

१३-२० अध्याये,—रेणुकायै इन्द्रदत्तकामधेनुचिन्तामणिविवरणकथनं। तस्याः पञ्चपुत्रजननकथनं। रेणुकागर्भे हरेः जन्मग्रहणकथनं। रामस्य तपस्यार्थ-कैलासपर्व्वतगमनवृत्तान्तकीर्त्तनं। तस्य महादेवात् धनुर्व्विद्याप्राप्तिः, गणेशात् परशुलाभविवरणकथनञ्च। परशुरामस्य पुरतः पुरारिणा जमदग्निरेणुकयोः पूर्व्ववृत्तान्तकथनं। नारीशतपरिवृतस्य कुवेरस्य गङ्गायां जलविहारवर्णनं।

विषयः। २१-२७ अध्याये,—रेणुकाबधार्थं आज्ञापितानपि तत्र असम्मतान् पुत्रानुद्दिश्य क्रुद्धस्य जमदग्नेः शापदानादिवृत्तान्तकथनं। परशुरामकृतरेणुकाबधवृत्तान्तकथनं। तत्र परशुरामप्रार्थनया जातकरुणस्य जमदग्नेः प्रसन्नतया सपुत्रायाः रेणुकायाः पुनर्जीवनवृत्तान्तकीर्त्तनञ्च। क्रोधेन सह जमदग्नेः संवादकथनं। रिरंसया कृतवीर्य्यसमीपमुपागतया राकावत्या सह तस्य संवादकथनं। तत्र हरेः पूर्व्ववैरं संस्मृत्य मधुनामकस्य असुरस्य कृतवीर्य्यपुत्रत्वेन जन्मग्रहणकथनं। करहीनस्य तस्य दत्तात्रेयप्रसादेन सहस्रकरत्वप्राप्तिकथनं। तस्य करहीनतया जन्मग्रहणकारणकथनं। एकदा दिग्विजयोद्यतस्य दशमुखस्य नर्म्मदायां स्त्रीभिः सार्द्धं जलक्रीड़ायामासक्तेन कार्त्तवीर्य्यार्ज्जुनेन सह संवादकथनं। तयोः युद्धवर्णनं। ब्रह्मादीनां प्रार्थनया कार्त्तवीर्य्यार्ज्जुनगृहे बद्धस्य रावणस्य मुक्तिकथनञ्च।

२८-३५ अध्याये,—नारदोपदेशेन सपरिवारस्य कार्त्तवीर्य्यार्ज्जुनस्य रेणुकादर्शनार्थं जमदग्न्याश्रमगमनविवरणकथनं। जमदग्निना कामधेनुप्रसादेन सबलस्य राज्ञः आतिथ्यकरणवृत्तान्तकीर्त्तनं। कामधेनुग्रहणार्थं सामदानादिप्रयोगेणापि अकृतकार्य्यस्य अर्ज्जुनस्य बलात्कारेण तां नेतुमिच्छतः कलत्रापत्यसैन्यादीनां कामधेनुसृष्टपुरुषसमूहेन समूलं विनाशवृत्तान्तकथनं। धेनुहरणविवरणकथनं। अर्ज्जुनकृतजमदग्निबधवृत्तान्तकथनञ्च।

३६-४० अध्याये,—पितरं निहतं दृष्ट्वा परशुरामस्य प्रतिज्ञादिवर्णनं। ततस्तच्छरीरं तुलायामारोप्य सह्याद्रिप्रदेशमुपागतस्य रामस्य दैववाणीमाकर्ण्य तत्र पितुरौर्द्धदेहिकादिकार्य्यानुष्ठानविवरणकथनं। रेणुकायाः सहगमनवृत्तान्तकीर्त्तनं। कार्त्तवीर्य्यार्ज्जुनबधाय कृतप्रयाणस्य रामस्य पथि नारदेन सह संवादकथनं। रामकृतपिशाचगणबधवृत्तान्तकीर्त्तनं। एकदा मार्कण्डेयाश्रममुपागतेन रामेण भ्राम्यमाणः कश्चित् राक्षसः अर्ज्जुनराजधान्यां निपपात। तञ्च दृष्ट्वा विदितकारणस्य अर्ज्जुनस्य चेष्टादिकथनं। तस्य दुःस्वप्नदर्शनवृत्तान्तकथनञ्च।

४१-५० अध्याये,—नारदस्य परशुरामचररूपेण माहिष्मतीपुरीप्रवेशवृत्तान्तकथनं। रामस्य ज्याशब्दश्रवणेन यमसचिवस्य अर्ज्जुनस्य वितर्कादिवर्णनं। रामार्ज्जुनयोः विचित्रयुद्धवर्णनं। बहुना उपायेनापि तं हन्तुं असमर्थेन रामेण वायोरुपदेशात् लम्बोदररूपधारिणा तद्विनाशवृत्तान्तकथनं। परशुरामभयार्द्दितानां नृपतीनां परिव्राजकादिरूपेण पर्य्यटनवृत्तान्तकथनं। एकविंशतिवारं परशुरामेण क्षत्रियविनाशनवृत्तान्तकथनं। तेन च पृथिवीं निःक्षत्रियां विधाय स्यमन्तपञ्चकाभिधानतीर्थनिर्म्माणविवरणकथनं। तत्कृतत्रैलोक्यविजयवृत्तान्तकीर्त्तनं। वासुकिकृतरामसपर्य्यावर्णनं। गणेशरामयोः संवादकथनं। रामकृतराक्षसबधवृत्तान्तकीर्त्तनञ्च।

५१-५५ अध्याये,—तत्र प्रत्यक्षतां गतायाः रेणुकायाः समादेशात् रामेण अस्त्र-जालप्रक्षालनार्थं भागीरथीगमनविवरणकथनं। रामतीर्थस्य उत्पत्तिकथनं। तत्र दत्तात्रेयाश्रमे शङ्खतीर्थचक्रतीर्थादीनामुत्पत्तिकथनं। रामकृतयज्ञानुष्ठानसमृद्धि-वर्णनं। तेन च दक्षिणालेन कश्यपाय पृथिवीदानविवरणकथनं। रामकृत-रेणुकाभिषेकवृत्तान्तकीर्त्तनं। तत्र ब्रह्मादिकृतरेणुकास्तोत्रकथनं। ब्रह्मणः पुरतः हरिणा गायत्रीरूपायाः रेणुकायाः सर्व्ववेदमयत्वकथनं। ब्रह्मणो वेदोपदेशप्राप्ति-विवरणकथनञ्च।

५६-५८ अध्याये,—आजीगर्त्तस्य "शुनः पुच्छः शुनः शेफः शुनो लाङ्गूलश्च" इति त्रयः पुत्रा आसन्। तत्र दुर्भिक्षनिपीड़ितेन आजीगर्त्तेन हरिश्चन्द्रस्य राज्ञः समीपे शुनःशेफं विक्रीय तज्जनितपापेन अधोगच्छता शमीकाभिधानस्य ऋषेरुपदेशात् रेणुकातीर्थगमनवृत्तान्तकीर्त्तनं। देवशर्म्मनामकस्य मुनेः शापेन हतश्रीकस्य इन्द्र-द्युम्नस्य रेणुकातीर्थगमनविवरणकथनं। रेणुकासमादिष्टेन ब्रह्मणा क्षीरसागरात् आमलकीतरुरक्षितस्य विष्णोरानयनवृत्तान्तकथनं। विशेषेण रेणुकामाहात्म्यकी-र्त्तनं। तत्र मणिदत्ताभिधानस्य ब्राह्मणस्य उपाख्यानं।

५९-६४ अध्याये,—रामदीर्घिकाविवरणकथनं। भास्करतीर्थमाहात्म्यकथनं। भा-स्करस्य उषायां भानुमतीनाम कन्या बभूव। तां कामयमानस्य तस्य कुष्ठरोग-प्राप्तिविवरणादिकथनं। पद्मतीर्थस्थापनवृत्तान्तकीर्त्तनं। विष्णुना हयग्रीवरूपेण कालजिह्वाभिधेयासुरनाशनवृत्तान्तकथनं। जम्बूकरूपस्य कर्णधारस्य नृपतेरुपा-ख्यानकीर्त्तनं। शङ्करतीर्थवर्णनं। कोटितीर्थमाहात्म्यकथनप्रसङ्गेन मुचकुन्दस्य नृपतेरुपाख्यानकीर्त्तनं। फलश्रुतिकीर्त्तनञ्च। इति रेणुकामाहात्म्यविमर्शः॥

No. 1753. स्कन्दपुराणीयावन्तीखण्डः।

Substance, country-made paper, 13½ × 7¼ inches. Folia, 143. Lines, 12 on a page. Extent, 5,345 s'lokas. Character, Nágara. Date, Sm. 1835. Place of deposit, Nasípura, Zillah Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Generally correct.

Avanti Khaṇḍa.—The fifth of the seven parts into which the Skanda Puráṇa is divided. It belongs to the class of works which are known under the generic name of Mahátmya. Its character may be best described by comparing it with a modern tourist's guide; though the authorship of the work is attributed to a divine personage. It

opens with a request from Umá, who desires her lord to describe, for her information, all those sacred pools and rivers on the earth where funeral cakes should be offered to the manes, and in reply to this comprehensive question S'iva gives her an account of all the sacred places, temples, pools and lingams in the city of Avanti, modern Ujjain, and its neighbourhood, and recites a number of stories to account for the sanctity of those places. The names of the places, and abstracts of the stories relating to them, are given below in Sanskrit.

Beginning. श्रीगणेशाय नमः। उमा उवाच। पृथिव्यां यानि तीर्थानि पुण्याश्च सरितस्तथा।
कथ्यन्तां तानि यत्नेन श्राद्धं येषु प्रदीयते ॥
ईश्वर उवाच। अस्ति लोकेषु विख्याता गङ्गा त्रिपथगा नदी।
सेविता देवगन्धर्व्वैर्मुनिभिश्च निषेविता ॥
तपनस्य सुता देवि यमुना लोकपावनी।
पितॄणां वल्लभा देवि महापातकनाशनी ॥
चन्द्रभागा वितस्ता च नर्म्मदामरसङ्कटं।
कुरुक्षेत्रं गया देवि प्रभासं नैमिषं तथा ॥
केदारं पुष्करञ्चैव तथा कायावरोहणं।
तथा पुण्यतमं देवि महाकालवनं शुभं ॥
यत्रास्ते श्रीमहाकालः पापेन्धनहुताशनः।
क्षेत्रं योजनपर्य्यन्तं ब्रह्महत्याविनाशनं ॥ इत्यादि।

End. इत्येते चतुरशीतिसङ्ख्याता ईश्वरास्तव।
कथिता ये त्वया ++ महाकालवने ++ ॥
एतेषां देवि यो यात्रां प्रतिलोमानुलोमतः।
करिष्यति नरो भक्त्या स यास्यति परं पदं ॥
यद्येषां लिङ्गमेकन्तु पश्येद्भक्त्याथ वा पुनः।
सकुलं तारयेदेव पैतृकं मातृकं शतं ॥
एष ते कथितो देवि प्रभावपापनाशनः।
चतुरशीतिलिङ्गानां किं भूयः श्रोतुमिच्छसि ॥

Colophon. इति स्कन्दपुराणे अवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्यम्। शिवमस्तु।
संवत् १८३५।

विषयः। ईश्वरीश्वरयोः संवादेन श्राद्धदानयोग्यपुण्यनदीवनादिनिरूपणप्रसङ्गात् अशीति-सङ्ख्यकलिङ्गमाहात्म्यकीर्त्तनं। तत्र अवन्तीदेशे महाकालवनवर्णनं। अगस्त्येश्वर-

विषयः। माहात्म्यादिवर्णनं। अत्र असुरविप्रकृतानां देवानां मुखमालिन्यं निर्वर्ण्य सन्तप्तहृदयेन अगस्त्येन स्वतेजसा दानवकुलं भस्मसात्कृत्वा 'किमिदमनुष्ठितं हिंसारूपं महत्पापमिति' खेदमधिगच्छता अगस्त्येश्वराभिधानलिङ्गप्रतिष्ठावृत्तान्तकथनं। गुह्येश्वरलिङ्गमाहात्म्यकीर्त्तनं। अत्र मङ्कणाभिधानस्य महर्षेर्वृत्तान्तकीर्त्तनं। ढुण्ढेश्वरलिङ्गमाहात्म्यं। अत्र गणनायकस्य ढुण्ढस्य वृत्तान्तकथनं। डमरुकेश्वरलिङ्गमाहात्म्यं। रुरुपुत्रेण सुरपुरान्निर्व्वासितानां वासवादीनां खेदराशितः समुद्भूतायाः देव्याः समरसंरम्भे रुरुपुत्रादशिवमाशङ्कमानायाः महाकालवने पलायनादिवृत्तान्तकथनं। अनादिकल्पेश्वरलिङ्गमाहात्म्यं। तत्र अहमेव ज्यायानिति विवदमानयोः पद्मनाभपद्मजन्मनोरूर्द्धाधोलोकप्रयाणादिकथनं। स्वर्गद्वारेश्वरमाहात्म्यकीर्त्तनं। तत्र वह्निमुखनिहितस्य शैवरेतसः सुवर्णस्य उद्भवादिकथनं। तल्लाभाय अन्योन्यं प्रहरतां सुरासुरादीनां निधनादिकथनञ्च। विष्टपेश्वरलिङ्गमाहात्म्यं। अत्र देवर्षिणा सह देवेन्द्रस्य महाकालवनगमनादिवृत्तान्तकथनं। कपालेश्वरमाहात्म्यकथनं। तत्र कापालिकवेशेन महाकालवने प्रविशन्तं कपालिनं तत्त्वतोऽजानतां विप्राणां लोष्ट्रादिप्रक्षेपविवरणकीर्त्तनं। स्वर्गद्वारेश्वरलिङ्गमाहात्म्यकथनं। तत्र गणमुखात् विष्णुना सुदर्शनेन ताड़ितस्य वीरभद्रस्य निधनवृत्तान्तमुपश्रुत्य शूलमादाय शूलिने दक्षयज्ञप्रवेशे उपेन्द्रादीनामन्तर्द्धानकथनं। महेशकृतस्वर्गद्वारनिरोधवृत्तान्तकीर्त्तनञ्च। कर्क्कोटेश्वरलिङ्गमाहात्म्यकथनं। तत्र मातुः शापेन भीतानां शेषादीनां तपस्यादिवर्णनं। कर्क्कोटकस्य महाकालवनप्रवेशादिविवरणञ्च। सिद्धेश्वरलिङ्गमाहात्म्यं। महाकालवनं प्रविश्य सिद्धानां तपश्चरणादिवृत्तान्तवर्णनं। लोकपालेश्वरलिङ्गमाहात्म्यकीर्त्तनं। दानवकुलाकुलितानां लोकपालानां नारायणोपदेशेन महाकालवनगमनादिवृत्तान्तकीर्त्तनं। कामेश्वरलिङ्गमाहात्म्यकीर्त्तनं। अत्र ब्रह्मशरीरात् कामस्य उत्पत्तिकथनं। कामं प्रति ब्रह्मणः शापदानविवरणादिकीर्त्तनञ्च। कुटुम्बेश्वरलिङ्गमाहात्म्यं। तत्र नीलकण्ठरूपधारिणा भगवता नीलकण्ठेन समुद्रोत्थानं कालकूटं सम्पीय शिप्राप्रवाहेण महाकालवने तत्प्रक्षिप्तमित्यादिवृत्तान्तकथनं। इन्द्रद्युम्नेश्वरलिङ्गमाहात्म्यकथनं। तत्र इन्द्रद्युम्नस्य नृपतेः हिमालयपार्श्वे तपस्यादिकथनञ्च। ईशानेश्वरलिङ्गमाहात्म्यं। तत्र कुकुण्डाभिधानेन दानवेन ताड़ितानां देवानां नारदोपदेशेन महाकालवनप्रवेशादिकथनञ्च। अप्सरेश्वरलिङ्गमाहात्म्यकथनं। तत्रैकदा सुरसदसि नृत्यन्त्याः रम्भायाः तौर्य्यत्रिकेषु प्रमादमाकलय्य जातकोपस्य वासवस्य महान् मन्युरासीत्, समनन्तरञ्च अभिशप्तायास्तस्या नारदोपदेशेन महाकालवनगमनादिविवरणकीर्त्तनञ्च। कलकलेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र गिरिजया सार्द्धं गिरिशस्य कलहवृत्तान्तकथनञ्च।

विषयः। चण्डेश्वरलिङ्गमाहात्म्यकथनं। नारदेन सह देवानां महाकालमुद्दिश्य गच्छतां पथि नागचण्डेत्यभिधानेन गणनायकेन समं संवादकथनञ्च। प्रतीहारेश्वरलिङ्गमाहात्म्यकथनं। तत्र द्वारपालं नन्दिनं वञ्चयित्वा रममाणयोः शिवाशिवयोः सान्निध्यमुपस्थिते हंसरूपधारिणि जातवेदसि नन्दिनं प्रति विरूपाक्षस्य शापदानवृत्तान्तकथनञ्च। कुक्कुटेश्वरलिङ्गमाहात्म्यकथनं। अत्र रात्रौ कुक्कुटरूपं धारयतः कौशिकनामकस्य राज्ञ उपाख्यानकीर्त्तनञ्च। कर्कटेश्वरमाहात्म्यकथनं। तत्र धर्म्ममूर्त्तिनामकस्य नृपतेः पुरतः वसिष्ठेन पूर्व्वजन्मनि राज्ञः शूद्रजातित्वकथनादिकं। मेघनादेश्वरलिङ्गमाहात्म्यकथनं। महान्धनामकेन असुरेण उपद्रुतानां द्रुहिणानां भगवद्दर्शनार्थं श्वेतद्वीपगमनादिकथनं। महालयेश्वरलिङ्गमाहात्म्यकीर्त्तनं। मुक्तीश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र मुक्तिनामकेन ब्राह्मणेन सार्द्धं तं हन्तुकामस्य व्याधस्य संवादकथनञ्च। सोमेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र इतराः दक्षकन्याः विहाय रोहिण्यामेव अनुरक्तं सोमं प्रति सन्धुक्षितकोपेन दक्षेण शापदानविवरणकथनं। नरकेश्वरमाहात्म्यकीर्त्तनं। तत्र पूर्व्वकल्पीयकलियुगे जीवानां नरकयातनावर्णनप्रसङ्गात् निमिनामकेन नृपतिना समं यमकिङ्करस्य संवादकथनं। जटेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र रथन्तरकल्पीयस्य वीरधन्वाभिधानस्य नरपतेरुपाख्यानकीर्त्तनञ्च। (परशु-)रामेश्वरलिङ्गमाहात्म्यकथनं। तत्र अनुष्ठिताश्वमेधयज्ञेन परशुरामेण सह नारदस्य संवादकथनादिकञ्च। च्यवनेश्वरमाहात्म्यकथनं। तत्र वितस्तायाः तीरे तपश्चरन्तं प्राप्तवल्मीकभावं च्यवनं निरूपयन्तीनां शर्य्यातिकामिनीनां वृत्तान्तकथनञ्च। षण्डेश्वरलिङ्गमाहात्म्यकथनं। तत्र भद्राश्वाभिधेयेन राज्ञा सार्द्धमगस्त्यस्य संवादकथनञ्च। पत्तनेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र देवदेवेन सह देवर्षेः संवादकथनञ्च। आनन्देश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र रथन्तरकल्पे अनमित्रतनयस्य आनन्दाभिधानस्य नरपतेरुपाख्यानकथनञ्च। कङ्कटेश्वरलिङ्गमाहात्म्यकथनं। तत्र प्रेतराजं जेतुकामस्य दरिद्रद्विजशिशोः तपस्यादिवर्णनञ्च। इन्द्रेश्वरलिङ्गमाहात्म्यकथनं। तत्र शतक्रतुना स्वतनयं निहतं श्रुत्वा कोपज्वलितस्य त्वष्टुः जटामाच्छिद्य अग्नौ क्षिपतः प्रभावेण वृत्रस्य उद्भवादिकथनञ्च। मार्कण्डेयेश्वरलिङ्गमाहात्म्यकथनं। तत्र पुत्रलाभार्थं मृकण्डोस्तपस्यादिवर्णनञ्च। शिवेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र ब्राह्मकल्पीयरिपुञ्जयाभिधानस्य नृपतेरुपाख्यानकथनञ्च। कुसुमेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र गणेशस्य कुसुमक्रीड़ादिवर्णनञ्च। अक्रूरेश्वरलिङ्गमाहात्म्यकथनं। तत्रैकदा भृङ्गिरिटेः सकाशात् सपर्य्यामनधिगम्य अधिगतरोषायाः पार्व्वत्याः पुरतस्तेन स्वकायात् मातृभागरूपमांसशोणितादिपरित्यागवृत्तान्तकीर्त्तनञ्च। कुण्डेश्वरलिङ्गमाहात्म्यकथनं। स्वतनयं वीरकं महाकालवने

विषयः। तपस्यन्तं निशम्य दिदृक्षया कृतप्रयाणयोः पार्व्वतीपरमेश्वरयोः गणाध्यक्षेण कुण्डेन सह संवादकथनञ्च। लुम्पेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र म्लेच्छराजस्य लुम्पस्य युयुत्सया सामगनामकस्य मुनेराश्रमप्रविष्टस्य बलात्कारेण होमधेनुग्रहणादिवृत्तान्तकथनञ्च। गङ्गेश्वरमाहात्म्यकथनं तत्र गङ्गां प्रति समुद्रस्य शापदानवृत्तान्तकीर्त्तनञ्च। अङ्गारकेश्वरमाहात्म्यकथनं। तत्र शिवशरीरादङ्गारकस्य उत्पत्तिः, तस्य मङ्गलादिनामप्राप्तिवृत्तान्तकथनञ्च। उत्तरेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र इन्द्राज्ञया मेघनामकालवर्षणादिवृत्तान्तकथनञ्च। नूपुरेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र नूपुरस्य तपस्यादिवर्णनञ्च। अभयेश्वरमाहात्म्यकीर्त्तनं। तत्र सिसृक्षया चिन्ताकुलस्य कमलजस्य अश्रुविन्दुतो हेरम्बकालकाभिधानयोः दानवयोः उत्पत्त्यादिकथनञ्च। पृथुकेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र वेणशरीरात् पृथोरुत्पत्तौ तत्कृतधरादोहनविवरणकीर्त्तनञ्च। स्थावरेश्वरमाहात्म्यकथनं। तत्र छायायाः गर्भे शनैश्चरस्य उत्पत्तिकथनं। तद्भयात् देवानां महादेवसमीपगमनादिविवरणञ्च। शूलेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र जम्भासुरसमीपात् वासवादीनां पराजये गौरीप्रार्थनया गिरिशस्य समीपे अन्धकस्य दूतप्रेरणादिवृत्तान्तकथनञ्च। ॐकारेश्वरलिङ्गमाहात्म्य-कथनं। तत्र ॐकाराभिधानस्य कपिलाकृतेरुपाख्यानकीर्तनञ्च। विश्वेश्वरलिङ्गमाहात्म्यकथनं। कण्टकेश्वरलिङ्गमाहात्म्यकथनं। तत्र सूर्य्यवंशीयस्य सत्यविक्रमनामकस्य नृपतेः महाकालवनं प्रस्थितस्य तत्र मित्रचरं कञ्चन तापसं हुङ्कारेणैव अलौकिकवस्तुसृष्टिसमर्थं पश्यतः उपाख्यानकीर्तनञ्च। सिंहेश्वरलिङ्गमाहात्म्यकथनं। तत्र पतित्वेन पशुपतिमधिगन्तुं तपस्यन्तीं पार्व्वतीमुपेत्य प्रजापतौ शिवनिन्दनोद्यते तस्याः कोपेन सिंहस्य उत्पत्त्यादिकथनञ्च। रेवन्तेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र वड़वारूपायाः सञ्ज्ञायाः गर्भे अश्वमुखकुमारयोः रेवन्तस्य च जन्मग्रहणवृत्तान्तकथनञ्च। घण्टेश्वरमाहात्म्यकीर्त्तनं। तत्र घण्टाभिधेयस्य कस्यचित् गणस्य विधातुः द्वारदेशे संवत्सरं यावदवस्थानादिवृत्तान्तकथनञ्च। प्रयागेश्वरमाहात्म्यकथनं। तत्र प्रियव्रतस्य पुरतो नारदेन ‘मया खलु श्वेतद्वीपे कापि कामिनी सरोवरोदरे दृष्टेति’ विवरणकथनञ्च। सिद्धेश्वरलिङ्गमाहात्म्यकथनं। तत्र अश्वशिरोनामकस्य नृपतेः जैगीषव्यकपिलाभ्यां सह संवादकीर्तनञ्च। मातङ्गेश्वरलिङ्गमाहात्म्यकथनं। तत्र गर्द्दभ्या मातङ्गाभिधानस्य कस्यचित् द्विजकुमारस्य पूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च। सौभाग्येश्वरलिङ्गमाहात्म्यवर्णनं। तत्र प्राग्ज्योतिषपुराधिपतेः कामिन्याः अनङ्गमञ्जर्य्याः दुर्भगाया अपि पतिसौभाग्यप्राप्तिविवरणकीर्तनञ्च। रूपेश्वरलिङ्गमाहात्म्यवर्णनं। तत्र एकदा पद्मकल्पे पद्माभिधानस्य नृपतेः मृगयार्थं गहनमध्यं प्रविष्टस्य कण्वदुहित्रा सह परिणयादिवृत्तान्तकीर्तनञ्च। धनुः-

विषयः। सहस्रेश्वरलिङ्गमाहात्म्यवर्णनं। तत्र वनमध्ये कुजम्भाभिधेयस्य दानवस्य गृहविवरं दृष्ट्वा शङ्काकुलेन विदूरथनामकेन राज्ञा सार्द्धं कस्यचित् ब्राह्मणस्य संवादकथनञ्च। पशुपालेश्वरलिङ्गमाहात्म्यकथनं। तत्र पशुपालनामकस्य भूपालस्य दस्युभिराक्रमणवृत्तान्तकीर्तनञ्च। ब्रह्मेश्वरलिङ्गमाहात्म्यकथनं। तत्र पुलोमोऽभिधानेन दैत्येन क्षीरसागरं गत्वा पद्मनाभनाभिपद्मस्थितोऽपि पद्मोद्भवः समाक्रान्तः तपस्यार्थं महाकालवनं प्रययाविति विवरणकथनञ्च। जल्पेश्वरलिङ्गमाहात्म्यकथनं। तत्र जल्पाभिधानराजकुमाराणां सुवाहु-शत्रुमर्द्द-जय-विजयविक्रान्तानां वृत्तान्तकीर्त्तनञ्च। केदारेश्वरलिङ्गमाहात्म्यकथनं। तत्र शीतजर्ज्जरितानां निर्ज्जराणां ब्रह्माणं पुरस्कृत्य पुरारिसामीप्यगमनवृत्तान्तकीर्तनञ्च। पिशाचेश्वरमाहात्म्यकीर्तनं। तत्र लोमशनामकस्य कस्यचित् शूद्रस्य नास्तिकतया जन्मान्तरे पिशाचत्वमापन्नस्य शाकटायनेन सह संवादकथनादिकञ्च। सङ्गमेश्वरमाहात्म्यकथनं। तत्र कलिङ्गविषये सुबाहुनामकेन राज्ञा महिष्याः पुरतः निजपूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च। दुर्द्धर्षेश्वरलिङ्गमाहात्म्यकथनं। तत्र नेपालदेशवास्तव्यस्य दुर्द्धर्षसञ्ज्ञकस्य राज्ञः मृगयार्थं वनमध्यप्रविष्टस्य पुरतस्तं भर्त्तृत्वेन अधिगन्तुं कस्याश्चित् द्विजकन्यायाः उपस्थानादिविवरणकथनञ्च। प्रयागेश्वरलिङ्गमाहात्म्यकीर्तनं। तत्र हस्तिनापुरपुरन्दरस्य शत्रुञ्जयाभिधानस्य भूपतेः वनमध्ये मानुषरूपया गङ्गया सार्द्धं पाणिग्रहणादिविवरणकथनञ्च। चन्द्रादित्येश्वरलिङ्गमाहात्म्यकथनं। तत्र शम्बरासुरेण विप्रकृतानां क्रतुभुजां रणभूमेः निर्य्याणे राहुभयेन अर्द्दितयोः सूर्य्याचन्द्रयोः विष्णुसान्निध्यगमनादिविवरणकथनञ्च। करभेश्वरलिङ्गमाहात्म्यकथनं। तत्र मृगयार्थं गहनमध्यगतस्य अयोध्याधिपतेः वीरकेतुनामकस्य नृपतेः शरवर्षेण करभरूपकृषभदेववेधनवृत्तान्तकीर्त्तनञ्च। राजस्थलेश्वरलिङ्गमाहात्म्यकथनं। तत्र ब्रह्माज्ञया रिपुञ्जयस्य अवन्तीदेशनायकत्वं प्राप्तस्य पृथिवीपालनावसरे कदाचित् पृथिव्यां वक्रभावादिवृत्तान्तकथनञ्च। वड़लेश्वरलिङ्गमाहात्म्यकथनं। तत्र मणिभद्रतनयस्य वड़लस्य नरवाहनोद्याने विहरमाणस्य विवरणकथनञ्च। अरुणेश्वरलिङ्गमाहात्म्यकथनं। तत्र अरुणं प्रति विनतायाः शापदानवृत्तान्तकीर्त्तनञ्च। पुष्पदन्तेश्वरलिङ्गमाहात्म्यकथनं। तत्र पुत्रलाभार्थं निमिनामकस्य ब्राह्मणस्य तपस्याकथनं, शिवपार्षदस्य पुष्पदन्तस्य अधोगतिकीर्त्तनञ्च। अविमुक्तेश्वरलिङ्गमाहात्म्यकथनं। तत्र शाकलनगराधिपस्य चित्रसेनस्य उपाख्यानकीर्त्तनञ्च। हनूमन्तेश्वरलिङ्गमाहात्म्यकथनं। तत्र रावणबधानन्तरं राजपदप्रतिष्ठितं रामचन्द्रं सभाजयितुं समागतानामगस्त्यादीनां लक्षणमुत्सृज्य केवलं अञ्जनानन्दनमेव प्रशंसतां बाल्ये हनूमतो रविधारणार्थं कृतोद्यमस्य ऐन्द्रकुलिशपातेन म्रियमाणस्य वरलाभादि-

विषयः। वृत्तान्तकीर्तनञ्च। स्वप्नेश्वरलिङ्गमाहात्म्यकथनं। तत्र इक्ष्वाकुवंशीयं कल्माषपादं प्रति वसिष्ठेन 'राक्षसो भवेति' शापदानविवरणकथनञ्च। पिङ्गलेश्वरलिङ्गमाहात्म्यकथनं। तत्र पिङ्गलाया उपाख्यानकथनञ्च। विल्वेश्वरमाहात्म्यकथनं। तत्र कपिलेन सह विल्ववृक्षस्य संवादकथनं। कायावरोहणेश्वरलिङ्गमाहात्म्यकथनं। तत्र दक्षं प्रति चन्द्रस्य 'कायहीनो भविष्यसि' इति शापदानवृत्तान्तकथनञ्च। उत्तरेश्वरलिङ्गमाहात्म्यकथनं। तत्र पुरा किल परीक्षिदित्यभिधानः इक्ष्वाकुकुल-तिलकः कश्चित् राजा अयोध्यायां प्रतिवसति स्म। स एकदा मृगाननुसरन् अश्वमात्रसहायः मध्यकाननं प्रविवेश। तत्र च कुसुमानि विचिन्वतीं कामपि कमनीयदर्शनां कामिनीं पश्यतः तस्य स्मरमार्गणानां अबन्ध्यप्रभावतया तस्यां हृदयं सरसमासीत्। सा च नृपतिप्रार्थनया आत्मानं बहुमन्यमाना 'त्वया नोदकं दर्शयितव्यमिति' ब्रुवाणा तेन सह सुचिरं रमयाञ्चकार, चकार च अन्तर्द्धानं कदाचित् राजप्रेरणया सलिलसन्दर्शनेनेत्यादिवृत्तान्तकीर्त्तनञ्च॥
अत्र अध्यायसङ्ख्या नास्तीति ज्ञेयम्। इति अवन्तीखण्डस्य विवरणम्॥

No. 1754. ज्योतिषकल्पतरुः।

Substance, country-made paper, $12\frac{1}{2} \times 3$ inches. Folia, 45. Lines, 10 on a page. Extent, 1,350 s'lokas. Character, Nágara. Date, Sm. 1896. Place of deposit, Calcutta, Government of India. Appearance, Fresh. Prose and verse. Incorrect.

Jyotisha-kalpataru. The influences of particular conjunctions of planets, stars, months and days of the week on the day of the birth, on human destiny. By Kavi Chúḍámaṇi.

Beginning. वृन्दाविपिनविनोदी दीनदयालुः स्वभक्तजनवश्यः।
शिवविधिवन्दितचरणः श्रीगोपीरमणः पातु॥
प्रणम्य सच्चिदानन्दं यशोदानन्दनन्दनं।
प्रवक्ष्ये लौकिकस्कन्धं यत्र लोकशुभाशुभं॥ अथ लौकिकस्कन्धो निरूप्यते।

End. इति त्रिविधोत्पातशान्तिर्मिश्रस्कन्धे लिखिता अतस्त्रिविधोक्तिः

Colophon. इति श्रीकविचूड़ामणिविरचिते ज्योतिषकल्पतरौ लौकिकस्कन्धे उत्पातकथनं नामैकादशोऽध्यायः॥ ११॥

विषयः। अत्र एकादशाध्यायाः सन्ति। तत्र १–मे, प्रभवादिषष्टिसंवत्सरफलकथनं २–ये, वर्षपञ्चाङ्गकथनं। ३–ये, सूर्य्यादिषु सप्तसु वारेषु रविसङ्क्रमणफलकथनं ४–र्थे, भौमबुधगुरुचारकथनं। ५–मे, शनिराहुचारकथनं। ६–ष्ठे, नक्षत्र ग्रहविभागकथनं। ७–मे, प्रकीर्णयोगकथनं। ८–मे,मासफलकथनं। ९–मे वत्सरगर्भाधानादिकथनं। १०–मे, कूर्मचक्रादिकथनं। ११ शे, उत्पात प्रकरणं॥

No. 1755. तन्त्रालोकटीका।

Substance, country-made paper, $12\frac{1}{4} \times 4\frac{2}{3}$ inches. Folia, 35. Lines, 12 on a page. Extent, 1,400 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, Fresh. Prose and verse. Incorrect.

Tantráloka-ṭíká. A commentary on the Tantráloka, which is a work by Abhinava Gupta, on transcendental knowledge and emancipation. By Jayaratha. The codex is incomplete, containing only the 1st áhnika.

Beginning. इह यद्यपि सर्व्ववादिनां मोक्ष एवोपादेयः तत्प्रतिपक्षभूतश्च संसारो हेयः तस्य च मिथ्याज्ञानं निमित्तं तत्प्रतिकूलञ्च तत्त्वज्ञानमिति तत्साक्षात्कारेणैवा-ज्ञानापगमान्मोक्षावाप्तिरित्यत्राविवादः। तथापि तैस्तत्त्वैकविषयं ज्ञानाज्ञानयोः स्वरूपं न ज्ञानमिति भ्रमयत्येव तान् माया ह्यमोक्षे मोक्षलिप्सयेत्यादि उक्तयुक्त्या तदभ्युपगतो मोक्षो मोक्ष एव न भवति इति दर्शयितुं शास्त्रान्तर-वैलक्षण्येन तत्परीक्षणस्य वक्ष्यमाणत्वात् प्राधान्यमपि कटाक्षयितुमुपक्रम एव बन्धमोक्षपरीक्षामुट्टङ्कयति ग्रन्थकारः॥

इह तावत् समस्तेषु शास्त्रेषु परिगीयते।
अज्ञानं संसृतेर्हेतुर्ज्ञानं मोक्षैककारणं॥
न चैतदस्माभिः स्वोपज्ञ(?)मेवोक्तमित्याह,——
मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणं इति।

तथा च श्रीमालिनीविजयोत्तरे। अज्ञानं तिमिरं पारमेश्वरस्वातन्त्र्यमात्र-समुल्लसितस्वरूपगोचरासतत्त्वया(?)त्मानात्मनोरन्यथाभिमानस्वभावमपूर्णं ज्ञानं तदेव चाणवं मलं न तु नवमाह्निकादौ निषेत्स्यमानं द्रव्यरूपं। उक्तञ्च

स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता। द्विधाणवं मलमिदं स्वस्वरूपाप-हानित इति। तच्च कीदृगित्याह॥ संसारेति।

End. इहाह्निकादाह्निकान्तरस्य संगत्यन्यायेन परस्परमनुद्वत्यतां दर्शयितुमेकेनैव श्लोकेन तत्पर्यन्तप्रारम्भयोरुपसंहारोपक्रमा करोतीत्यस्य ग्रन्थकारस्य शैलीति-श्लोकस्य प्रथमार्द्धेनाह्निकार्थमुपसंहरति,—

तन्त्रालोकेऽभिनवरचिते स्वचविज्ञानसत्ता-
भेदोद्धारप्रकटनपटावाह्निकेऽस्मिन् समाप्तिः।
पटाविति पाचिकात् पुंवद्भावात् इति शिवं।
श्रीशृङ्गादरथाद्वाप्य क्वतिनो जन्मानवद्यक्रमं
श्रीमच्छ्रम्भुधरात् परं परिचयं विद्यासु सर्व्वास्वपि।
श्रीकल्याणतनोः शिवादधिगमं सर्व्वागमानामपि
व्याख्यातं प्रथमाह्निकं जयरथेनाचावधेयं बुधैः॥

Colophon. इति श्रीमदभिनवगुप्तविरचिते तन्त्रालोके विज्ञानभेदप्रकाशनं नाम प्रथम-माह्निकं॥

विषयः। अभिनवगुप्तविरचिततन्त्रालोकस्य व्याख्यानं। तन्त्रालोके तु संसारहेतुज्ञान-निरूपणं। मोचहेतुज्ञाननिरूपणञ्च। "इति श्रीमदभिनवगुप्तविरचिते तन्त्रालोके विज्ञानभेदप्रकाशनं नाम प्रथमाह्निकं" इति यत् समाप्तिसूचकं वाक्यं तत् तन्त्रालोकस्य न तु तन्त्रालोकटीकायाः॥

No. 1756. यतिधर्म्मसमुच्चयः।

Substance, country-made paper, 13 × 6 inches. Folia, 39. Lines, 14 on a page. Extent, 2,340 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Yati-dharma-samuchchaya. A compendium of the duties of Yatis and Paramahañsas, compiled from the leading Smṛitis. By Vis'ves'-vara Sarasvatí.

Beginning. प्रणम्य विष्णुमात्मानं सच्चिदानन्दमुक्तिदं।
गुरुं सर्व्वज्ञविश्वेशं मायया धृतविग्रहं॥१॥
विश्वेश्वरसरस्वत्या क्रियते वेदमानतः।
यतेः परमहंसस्य धर्म्माणामेष सङ्ग्रहः॥२॥

End. न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते ।
मलाक्तञ्च दशाहीनं वर्जयेदम्बरं यतिः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकविश्वेश्वरसरस्वतीसङ्ग्रथिते यतिधर्म्मसमुच्चये निवृत्ति
धर्म्मानुष्ठानाचाराः सम्पूर्णाः (समाप्ताः) । शुभं भवतु ॥

विषयः । श्रुतिस्मृतिपुराणप्रमाणानि संगृह्य यतेः परमहंसस्य धर्म्मसमुच्चयनिरूपणं ।

No. 1757. तत्त्वयाथार्थ्यदीपनं ।

Substance, country-made paper, 10¾ × 5 inches. Folia, 14. Lines, 1 on a page. Extent, 434 s'lokas. Character, Nágara. Date, ? Plac of deposit, Calcutta, Government of India. Appearance, old. Prose an verse. Correct.

Tattva-yáthárthya-dípana. A commentary on the Tattvasamása It comprises a summary of the leading doctrines of the S'áṅkhya system of Philosophy. By Bhává Gaṇes'a Dikshita, son of Bhává Vis'va nátha, and pupil of Vijñána Bhikshu. Hall's *Contributions*, p. 4.

Beginning. पुरुषः स जयत्याद्यः प्रकृतिः सा जयत्यजा ।
याभ्यां संहत्य सृज्यन्तेऽनन्तब्रह्माण्डकोटयः ॥ १ ॥
कपिलासुरिपञ्चशिखान् गुरून् विज्ञानाचार्य्यवर्य्यांश्च ।
प्रणमामि बुद्धिवृद्धौ सिद्धौ वा सर्व्वकार्य्याणां ॥ २ ॥
समाससूत्राण्यालम्ब्य व्याख्यां पञ्चशिखस्य च ।
भावागणेशः कुरुते तत्त्वयाथार्थ्यदीपनं ॥ २ ॥

End. पुरुषार्थबुभूत्सूनां बोधायैव मयेरितं ।
तेभ्यः समर्पितञ्चैतत् तेनापि प्रीयतां हरिः ॥

Colophon. इति श्रीभावागणेशकृतं तत्त्वयाथार्थ्यदीपनं समाप्तं ॥

विषयः । अत्र प्रथमं साङ्ख्यमतसिद्धमूलप्रकृतिनिरूपणं । ततो बुद्धितत्त्वनिरूपणं । तत
अहङ्कारनिरूपणं । ततः पञ्चतन्मात्रानिरूपनं । तत एकादशेन्द्रिय-पञ्चमह
भूतात्मकषोड़शविकारनिरूपणं । ततः पुरुषनिरूपणं । ततस्त्रैगुण्यनिरूपणं
ततः सृष्टिनिरूपणं । ततः प्राकृतिक-वैकारिक-दाक्षिणरूपबन्धत्रयनिरूपणं
ततो मोक्षत्रयनिरूपणं । ततः प्रत्यक्षानुमानशब्दात्मकप्रमाणत्रयनिरूपणं । त
आध्यात्मिक-आधिभौतिक-आधिदैविकदुःखत्रयनिरूपणं ॥

No. 1758. पाखण्डचपेटिका ।

Substance, country-made paper, 12¾ × 4¾ inches. Folia, 8. Lines, 12. on a page. Extent, 576 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Pákhaṇḍa-chapeṭiká. "A slap for the unbeliever." A polemical disquisition on the Vaishṇavite doctrine, refuting objections to the authenticity of the Bhágavata Puráṇa, and establishing the superiority of the Vaishṇava faith as opposed to S'aiva and S'ákta doctrines. By Vijayaráma A'chárya.

Beginning. विश्वस्वीकर्त्ति विभुः स्वलीलया तथा वरीभर्त्त्यखिलं सनातनः ।
यः सञ्जरीहर्त्ति कलान्तविग्रहस्तं सर्व्वभूताश्रयमानतोऽस्म्यहं ॥ १ ॥
श्रीमद्विजयरामाख्यः पाखण्डस्य चपेटिकां ।
आचार्य्यकुलसम्भूतस्तनोति विदुषां मुदे ॥ २ ॥

End. सर्व्वे ते सुखिनः सन्तु प्रसादात् कमलापतेः ।
ये भजन्ति महाविष्णुं सम्प्रदायानुसारतः ॥ इति ।
इदं मदीयं साहसिकत्वं गुणग्राह्यैः सूरिभिरङ्गीकर्त्तव्यं ॥

Colophon. इति श्रीमद्विजयरामाचार्य्यविरचिता पाखण्डचपेटिका समाप्ता ॥

विषयः । श्रुतिविरुद्धान् परित्यक्तनिजवर्णाश्रमधर्म्मान् स्वर्गादिप्रतिबन्धकान् नरकोत्पादकान् पाखण्डान् शिक्षयितुं पुराणादिवाक्यैः तन्मुखचपेटिकानिरूपणं ।

No. 1759. वासिष्ठोपपुराणं ।

Substance, country-made paper, 12½ × 4¾ inches. Folia, 13. Lines, 12 on a page. Extent, 880 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Vás'ishṭha Upapuráṇa. Apparently a fragment of the work whose name it bears. The codex comprises 12 chapters as follows: 1, Conversation with S'iva and Vas'ishṭha. 2, Máyá, the origin of creation. 3, S'iva, the original first cause. 4, The advantages of worshipping S'iva on the 15 lunar days. 5, Do. of smearing the body with ashes.

6, Do. of wearing garlands of Rudráksha seeds. 7, Rules for repeating the Praṇava. 8, Religious duties of the four castes. 9, Characteristics of the Yogas. 10, A story of S'anka. 11, Praise of saints. 12, A story illustrating the merits of offerings to S'iva.

Beginning. श्रीमत्कैलासमागम्य वसिष्ठो वेदविन्मुनिः ।
तपश्चचार सत्कर्म्मनिरतो नियतेन्द्रियः ॥ १ ॥
दिव्यं वर्षसहस्रन्तु वायुभक्षोऽग्निमध्यगः ।
श्रीमत्पञ्चाक्षरं साक्षाच्छतरुद्रियमध्यगं ॥ २ ॥
सर्व्वपापहरं पुण्यं प्रणवेन षड़क्षरं ।
जजाप शङ्करं द्रष्टुं वाञ्छया मुनिसत्तमः ॥ ३ ॥
ततः प्रसन्नो भगवानम्बया सह शङ्करः ।
लिङ्गज्योतिःस्वरूपेण पुरतोऽस्य प्रकाशितः ॥ ४ ॥

End. यत्प्रसादेन विज्ञानं यथावज्जायते नृणां ।
तं वन्दे षण्मुखं देवं ज्ञानशक्तिधरं परं ॥ ५५ ॥
यस्य प्रसादलेशस्य लवलेशलवेन तु ।
सर्व्वसिद्धिरयत्नेन तं नमामि विनायकं ॥ ५६ ॥

Colophon. इति श्रीउपपुराणे वाशिष्ठलैङ्गे द्वादशोऽध्यायः ॥ १२ ॥ सङ्ख्या १०० ।

विषयः । अत्र १–मे, वसिष्ठशिवसंवादः । २–ये, मायाया जगत्कारणत्वकथनं । ३–ये, शिवस्यैव परमतत्त्वरूपताकथनं । ४–र्थे, पञ्चदशसु तिथिषु शिवपूजायाः फलकथनं । ५–मे, भस्मधारणफलं । ६–ष्ठे, रुद्राक्षधारणफलं । ७–मे, प्रणवजपनियमादिकथनं । ८–मे, ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनां धर्म्मकथनं । ९–मे, युगधर्म्मकथनं । १०–मे, भिक्षापर्य्यटनव्याजेन शङ्ककर्तृकमुनिसम्मोहनवृत्तान्तं । ११–शे, स्तोत्रैर्मुनिभिर्ब्रह्मप्रबोधनादिकथनं । १२–शे, सभार्य्यवृषलस्य शिवप्रसादेन पुनरैश्वर्य्यप्राप्तिवृत्तान्तं ॥

No. 1760. आगमतत्त्वसङ्ग्रहः, द्वितीयपरिच्छेदमात्रं ।

Substance, country-made paper, $12\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 16. Lines, 12 on a page. Extent, 900 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

A'gamatattva-sañgraha. A compilation of the three leading doctrines of the Tantra system, including rites, adoration and knowledge. By Kes'ava Vis'varupa,—an inhabitant of the bank of the Tuñgabhadrá River.

Beginning. प्रणम्य सर्व्वात्ममयीं महेश्वरीं गुरूंश्च सर्व्वान् विदुषः कृताञ्जलिः ।
द्वितीयभागं प्रकरोमि मेयप्रकाशकं ह्यागमतत्त्वसङ्ग्रहे ॥ १ ॥
प्रथमपरिच्छेदे आगमानां प्रामाण्यं निर्व्वाहितं । सम्प्रत्यागमप्रमेयतत्त्वं सङ्ग्रहेण विविच्यते ॥

End. एतेन त्रिपुरां वा प्रीयतां सर्व्वेश्वरी परा संवित् ।
श्रुतिरागमश्च यस्या निश्वसितञ्चापि चोच्छ्वसितं ॥ १० ॥

Colophon. इति श्रीतुङ्गभद्रोपकूलवसतिविश्वरूपोपाख्यकेशवकृतावागमतत्त्वसङ्ग्रहे द्वितीयः परिच्छेदः । समाप्तो ग्रन्थः ॥

विषयः । अत्र तन्त्रेषु काण्डत्रयेण निरूपितकर्म्मोपासनाज्ञानानां प्रत्येकस्वरूपनिरूपणं ।

No. 1761. अद्वैतब्रह्मविद्यापद्धतिः ।

Substance, country-made paper, 13 × 5 inches. Folia, 23. Lines, 15 on a page. Extent 736 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Advaita-brahmavidyá-paddhati. An attempt to interpret the adualistic theory in connexion with the supreme divinity of Mahádeva, and to support the S'aiva system of faith. By Gopálás'rama-rúpa Nandís'vara A'chárya.

Beginning. सकलसुरगुरुर्यः शम्भुराद्यो महेशो गणपतिजनको यः षण्मुखस्योद्भवो यः ।
निखिलजननकर्त्री यस्य शक्तिर्ह्युमा तं विनतकरणसङ्घश्चिन्तये विश्ववन्द्यं ॥ १ ॥
निखिलसुरगणाग्र्यो यस्तु नन्दीश्वराख्यो विविधसुतपसा यः श्रीशिलादेन लब्धः ।
सुमुनिगणनमस्यो दुर्जयो देवसङ्घैः स्वजनहितकरं तं वन्दितं वन्दे गणाग्र्यैः ॥ २ ॥

End. षड़ध्यायीमिमां यस्तु शिवप्रीतिकरीं शुभां ।
पठेद्धि शृणुयाद्वापि यथेष्टं फलमाप्नुयात् ॥ ७७ ॥
अनेन कृपया शिष्यं प्रशिष्यं ामतमारयत् ।
यः शम्भोः परमो भक्तस्तदात्मा तं प्रणौम्यहं ॥ ७८ ॥

Colophon. इति श्रीमद्गोपालाश्रमरूपनन्दीश्वराचार्य्योपदिष्टाद्वैतब्रह्मविद्यापद्धतौ षष्ठोऽध्याय
समाप्तोऽयं ग्रन्थः ।

विषयः । अत्र शिवस्यैव परमतत्त्वरूपताकथनं । शैवीविद्यानिरूपणं, शिव एवोपास्य इ
कथनञ्च ।

No. 1762. ज्योतिःशास्त्रसमुच्चयः ।

Substance, country-made paper, $12\frac{1}{4} \times 5\frac{1}{2}$ inches. Folia, 126. Line
10 on a page. Extent, 2,814 s'lokas. Character, Nágara. Date,
Place of deposit, Calcutta, Government of India. Appearance, old. Pro
and verse. Incorrect.

Jyotih-s'ástra-samuchchaya. A compilation on civil astronomy an
astrology. By Nanda Paṇḍita. The author was a great Smṛi
scholar, and compiled several works on the subject. The work unde
notice is one of several treatises bearing the generic name of *Samuch-
chaya*, and is designed to afford full information on the selection of pro-
per days for the performance of civil rites.

Beginning. ॐ श्रीमान् सत्त्वकिरणः श्रियमातनोतु युष्माकमभ्यधिकमानतिमात्रलभ्यः ।
मुक्तिं मुमुक्षुरधिगच्छति यं प्रसाद्य भक्त्या विभूतिमतुलामपि भुक्तिकामः ॥
ॐ अथ ज्योतिःशास्त्रसमुच्चयः तत्र प्रथमं प्रभवादिवर्षविचारः ।

End. श्रीनारायणपादपङ्कजनतिप्राप्तप्रबोधोद्गमो
वेदानङ्गयुतान् सभारतखिलान् साहित्यकाव्यान्वितान् ।
मीमांसेश्वरसाङ्ख्यबोधमखिलं चार्व्वाकजैनाभिधं
ग्रन्थं यो व्यष्टणोत् स पण्डितकविः श्रीदेवशर्म्माऽभवत् ॥
तस्य श्रीशितिकण्ठभक्तिनिरतो नन्दाभिधोऽभूत् सुतो
विन्दा देवपदारविन्दशरणा यस्य प्रसिद्धा प्रज्ञः ।
सोऽयं नातिलघुं न विस्तृततरं ज्योतिर्विदां सेवको
ज्योतिःशास्त्रसमुच्चयं व्यरचयच्छिष्योघसम्प्रार्थितं ॥
विजयजयदमित्रं मित्रराजीवनेत्रं भवजलधिवहित्रं दानवानाममित्रं ।
विषधररिपुपत्रं देवकीशौरिपुत्रं गहनतरचरित्रं नौमि मायाविचित्रं ॥

Colophon. इति श्रीपण्डितनन्दविरचितो ज्योतिःशास्त्रसमुच्चयः समाप्तः ।

विषयः। अत्र प्रथमं प्रभवादिषष्टिसंवत्सरविचारः। ततः अयनविचारः। अधिमासविचारः। तिथिविचारः। वारविचारः। नक्षत्रविचारः। उपयोगविचारः। विष्कम्भादियोगविचारः। करणविचारः। भद्राविचारः। चन्द्रविचारः। करणप्रस्तारः। ताराविचारः। ताराप्रस्तारः। मुहूर्त्तविचारः। लग्नविचारः। गोचरविचारः। राजाभिषेकविचारः। वस्त्रादिपरिधानविचारः। व्रतारम्भः। विद्यारम्भः। धनुर्विद्यारम्भः। नृत्यगीतप्रारम्भः। अनध्यायः। होमादिनक्षत्राणि। वेतालादिसाधनं। अभिचारकृत्यं। धर्म्मारम्भः। सेवानक्षत्राणि। मघारम्भः। चौरविचारः। चूड़ाकर्म्म। अन्नप्राशनं। कर्णवेधनं। पुंसवनं। नामकरणं। सूर्य्येन्दुदर्शनिष्क्रमाणि। अग्न्याधानं। श्रावणीविचारः। जलारम्भनक्षत्राणि। वृक्षरोपणं। गजकार्य्यनक्षत्राणि। गोनक्षत्राणि। क्रयविक्रयादिनक्षत्राणि। सन्धिनक्षत्राणि। हलनक्षत्राणि। पञ्चकविचारः। सर्पदंशनक्षत्राणि। रोगनिवृत्तिलक्षणानि। रोगमुक्तस्नाननक्षत्राणि। यात्राविधानं। दिक्साधनं। उपनयनं। विवाहनिर्णयः। द्विरागमनं। वास्तुविचारः। गृहप्रवेशादिविधिः। देवादिप्रतिष्ठा। सङ्क्रान्तिनिर्णयः। मूलविचारः। मूलाश्लेषगण्डान्तशान्तिः। गण्डान्तविचारः। ज्येष्ठाजातनिर्णयः। ज्येष्ठाविचारः। अगस्त्योदयविचारः। संवत्सरपुरुषलक्षणं। सस्यजातकाध्यायः। सद्योवर्षणाध्यायः। रविवर्षफलं। चन्द्रवर्षफलं। भौमवर्षफलं। बुधवर्षफलं। जीववर्षफलं। शुक्रवर्षफलं। शनिवर्षफलं। मासफलं। ग्रहणविचारः। केतुलक्षणं। पिटकविचारः। अङ्गस्फुरणविचारः। शनिचक्रं। प्रकीर्णकं। रोहिणीयोगः। पल्लीविचारः। पल्लीसरटशान्तिविधानं। संवत्सरमाहात्म्यं। खञ्जदर्शनफलं। अशुभदर्शनप्रतीकारः॥

No. 1763. मानसोल्लासः, मानसोल्लासवृत्तान्ताख्यटीकासहितः।

Substance, country-made paper, 13 × 6 inches. Folia, 41. Lines, 14 on a page. Extent, 2,700 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Mánasollása and *Mánasollása-vrittánta.* The first is a metrical commentary on a poem of ten stanzas by S'aṅkara Áchárya, in praise of Dakshiṇámúrti, a form of Durgá; the second is a prose gloss

on the commentary. The first is by Vis'ves'vara *alias* Vis'varúpa A'chárya, a pupil of S'aṅkara A'chárya; the second is by Ráma Tirtha, a hermit of his school.

Beginning. (टी॰)। प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं
प्रत्यक् तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननं।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं
हृद्यन्तःकलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकं ॥ १ ॥
नत्वाथ शङ्कराचार्य्यमुख्यान् सर्व्वान् गरीयसः।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥ २ ॥

इह हि भाष्यकारः श्रीमच्छङ्कराचार्य्यनामा मन्दमतींस्तत्त्वजिज्ञासूननुगृह्णीतुं दक्षिणामूर्त्तिस्तोत्रव्याजेन समस्तवेदान्तार्थरहस्यमाविश्चकार, दशभिः पद्यबन्धैः तच्छिष्येण विश्वरूपाचार्य्येण सुरेश्वरापरनाम्ना तत्पद्यप्रबन्धार्थतत्त्वं तात्पर्य्यतो मानसोल्लासनाम्ना वार्त्तिकात्मना ग्रन्थसन्दर्भेणाविष्कृतमिमं ग्रन्थं यथाशक्ति विवृणोमि। तत्र शिष्याचारसंरक्षणाय कृतं मङ्गलाचरणं द्योतयत्ययमाद्यः श्लोकः मङ्गलमिति।१।

(मू॰)। मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥ १ ॥
आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः।
तल्लाभार्थं कविः स्तौमि स्वात्मानं परमेश्वरं ॥ २ ॥
स्वेच्छया सृष्टमाविश्य विश्वं यो मनसि स्थितः।
स्तोत्रेण स्तूयते तेन स एष परमेश्वरः ॥ ३ ॥
अस्ति प्रकाशत इति व्यवहारः प्रवर्त्तते।
तत्राखिलं प्रकाशित्वं कस्मिन्नर्थे व्यवस्थितं ॥ ४ ॥
किन्तेषु तेषु भावेषु किंवा सर्व्वात्मनीश्वरे।
ईश्वरत्वञ्च जीवत्वं सर्व्वात्मत्वञ्च कीदृशं ॥ ५ ॥
जानीयात्तत् कथं जीवः किं तज्ज्ञानस्य साधनं।
ज्ञानात्तस्य फलं किं स्यादेकत्वञ्च कथं भवेत् ॥ ६ ॥
सर्व्वज्ञः सर्व्वकर्त्ता च कथं जीवो भविष्यति।
शिष्यं प्रतीत्थं पृच्छन्तं वक्तुं प्रारभते गुरुः ॥ ७ ॥
विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।

यः साक्षात् कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्त्तये नम इदं श्रीदक्षिणामूर्त्तये ॥ ८ ॥

End. (मू॰)। प्रकाशात्मिकया शक्त्या प्रकाशप्रभवाकरः।
प्रकाशयति यो विश्वं प्रकाशोऽसौ प्रकाशतां ॥ १४ ॥

Colophon. इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थप्रतिपादके।
प्रबन्धे मानसोल्लासे दशमोल्लाससङ्ग्रहः ॥ १० ॥

(टी॰)। इति श्रीमानसोल्लासप्रबन्धोऽयं यथा मति।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥
अनेन भगवान् श्रीमद्दक्षिणामूर्त्तिरीश्वरः।
गुर्व्वात्मा प्रीयतां नित्यं तत्त्वज्ञानप्रदः सतां ॥
इति श्रीदक्षिणामूर्त्तिस्तोत्रव्याख्याप्रबन्धमानसोल्लासवृत्तान्तविलासः सम्पूर्णः ॥

विषयः। श्रीमच्छङ्कराचार्य्येण समस्तवेदान्तार्थरहस्यमाविष्कर्त्तुं श्रीमद्दक्षिणामूर्त्तिस्तोत्र-व्याजेन यानि दशपद्यानि आविष्कृतानि तेषां दशपद्यानां श्रीमच्छङ्कराचार्य्य-शिष्येण विश्वरूपाचार्य्येण सुरेश्वरापरनाम्ना अनेन मानसोल्लासग्रन्थेन तात्पर्य्या-विष्करणं।

No. 1764. कण्टकोद्धारः।

Substance, palm-leaf, 11 × 1 inches Folia, 120. Lines, 5 on a page. Extent, 3,036 s'lokas. Character, Maithili. Date, L.S. 431=A. D. 1537. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Kaṇṭakoddhára. A gloss on the *Pratyaksha Chintámaṇyáloka* of Jayadeva Mis'ra. By Madhusúdana Ṭhakkura. (*Vide ante*, I, p. 298.)

Beginning. मधुसूदनसद्युक्तिसमुत्सारितकण्टकाः।
आलोकव्यक्तमार्गेण मणिं गृह्णन्तु धीधनाः ॥
विशेषविभागोपयोगिसामान्यलक्षणं प्रमाणस्य सूचयति। एवमिति मूलं। यद्यपि करणत्वं व्यापारवत् कारणत्वमिति शरीरात्मप्राणालोकविषयादिषु अतिव्याप्तिः। इत्यादि।

End. तदवच्छेदकविद्यमानसम्बन्धप्रतियोगित्वमित्यवधातव्यं सुगममितिवत्।

Colophon. महामहोपाध्यायठक्कुरश्रीमधुसूदनकृततत्त्वचिन्तामण्युद्धारे प्रत्यक्षखण्डः परिपूर्णः ।

* * * * * * * * * * * * *

चक्रे रामकनीयसोऽवनिपतेः श्रीतांशुनन्दाम्बुधा-

वङ्के फाल्गुनसप्तमीरविदिने गङ्गागणेशार्चकः ॥

विषयः । जयदेवमिश्रकृतप्रत्यक्षचिन्तामण्यालोकस्य व्याख्यानं ।

No. 1765. न्यायकौस्तुभः ।

Substance, country-made paper, 9 × 4 inches. Folia, 136. Lines, 12 on a page. Extent, 4,185 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Nyáya-kaustubha. A gloss on the Pratyaksha Khaṇḍa of the Tattvachintamaṇi of Gaṅges'a. By Mahádeva Paṇḍita, son of Mukunda Paṇḍita.

Beginning. दाक्षायणीरमणसच्चरणारविन्दं ब्रह्मादिभिः सुरवरैरपि सेव्यमानं ।

श्रीगौतमं मुनिवरं मणिकारमुख्यान् आन्वीक्षिकीर+बुधांश्च नमामि भक्त्या

मुकुन्दं पितरं नौमि षट्शास्त्रतत्त्वदर्शिनं ।

यत् पुण्यपरिपाकेण शास्त्रे गतिरभून्मम ॥

पुरुहूतपुरोहितं सभायां कवितायां किल कालिदाससमं ।

निखिलाखिलशास्त्रविद्गुरीणं शितिकण्ठाभिधं सद्गुरुं नमामि ॥

मोक्षहेतुप्रमाणादितत्त्वज्ञानाय सद्धियां ।

महादेवेन सुधिया क्रियते न्यायकौस्तुभः ॥

End. मिश्रादीनामप्यत्रैव पक्षे स्वारस्यञ्चेति वदन्तीत्यधिकमूह्यं सुधीभिरित्यलं विस्तरेण ।

प्रत्यक्षचिन्तामणिमिश्रदीधित्यादिप्रबन्धानवलोक्य भूयः ।

सङ्क्षेपतो वर्णितमत्र सम्यक् प्रत्यक्षतत्त्वं बहुयुक्तियुक्तं ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणज्ञश्रीमन्मुकुन्दपण्डितात्मजपुणतामकरे (?)पनामक... देवपण्डितविरचिते श्रीन्यायकौस्तुभे प्रत्यक्षकौस्तुभः समाप्तः ।

विषयः । तत्त्वचिन्तामण्यन्तर्गतप्रत्यक्षखण्डस्य व्याख्यानं ।

No. 1766. वेदान्तकल्पतरुपरिमलः ।

Substance, country-made paper, 11 × 3½ inches. Folia, 508. Lines, 11 on a page. Extent, 16,382 s'lokas. Character, Nágara. Date, Sm., 1851. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Vedánta-kalpataru-parimala. Explanatory notes on Amalánanda's gloss on the Bhámati, which is a commentary on the Vedánta Sútras of Vyása. By Apyayi Díkshita, son of Rangarája Adhvaravara, of the race of Bharadvája. The work has been already noticed under No. 1413, (Vol. IV, p. 33), but the codex there noticed is incomplete.

Beginning. गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः ।
अवलम्ब्य शिवमधीय यथामति व्याकरोमि कल्पतरुं ॥
कल्पतरुमुपकुर्य्यां कमधिकमाकाङ्क्षितमुपहृत्य ।
तद्वत्तैरेवार्थैर्मम मतिमीहे परिष्कर्त्तुं ॥
यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः ।
सर्व्वेषामपि तेषामयमवकाशं ददाति पुष्पकवत् ॥
इत्यमिह्यातिगभीरे कियदाशयवर्णनं मया क्रियते ।
तुष्यन्ति ततोऽपि कतिपयरत्नग्रहादिरम्बुनिधेः ॥
यदिति । अत्र प्रत्यगिति ब्रह्मविशेषणेन शास्त्रस्य विषयं प्रदर्श्य तत्र सर्व्वेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः । इत्यादि ।

End. अयमर्थो भाष्यकाराणामिमां श्रुतिं भोगसाम्यार्थत्वेन उदाहृतवतामाशयस्थो भवतीति स्वयमन्यथा व्याचष्टे तं ब्रह्मलोकगतमित्यादिना ॥

Colophon. इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यविश्वजिद्याजि-श्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले चतुर्थाध्यायस्य चतुर्थः पादः । सम्पूर्णः शुभमस्तु । संवत् १८५१ । नारायण ।

विषयः । वेदान्तकल्पतरुनामिकायाः भामतीटीकायाः व्याख्यानं ।

No. 1767. सिद्धान्तसुन्दरः, गोलाध्यायः ।

Substance, country-made paper, 9½ × 4 inches. Folia, 8. Lines, 14 on a page. Extent, 424 s'lokas. Character, Maithili. Date, Sk., 1269. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Sidhántasundara alias *Goládhyáya.* An elementary treatise on astronomical geography. By Jñánarája, son of Nága. Contents : Order of creation ; terrestrial sphere shaped like a Kadamba flower floating on vacuity ; celestial sphere ; situation of the Meru mountain ; explanation of the Puráṇic theory about the earth ; refutation of the theory of Bháskara about attraction ; the meridian of Lañká ; location of mountains ; duration of the year ; distance of the stars from the earth ; orbits ; circumference of the earth and other spheres ; motions of planets ; solstitial motions and crossings ; ecliptics ; circles ; astronomical instruments ; causes of seasons.

Beginning. श्रीगणेशाय नमः। भाले यस्य कलानिधिर्मधुमिलद्भृङ्गावली गण्डयोः
कण्ठेऽहिर्विलसत्यगं पदयुगे गीर्व्वाण+भोजनाः।
ब्रह्मापि त्रिजगत् सिद्धचुरभजन्निर्व्विघ्नसंसिद्धये
श्रीमन्मङ्गलमूर्त्तिमनघं तन्नौमि भक्तप्रियं॥
यन्नामाच्चररश्मिभिस्तनुगतैश्चञ्चत्कला+न् भवेत्
भक्तस्वान्तनिशाकरो हततमास्तन्नोच्चरद्भिः क्रमात्।
नत्वा तां भुवनेश्वरीमपि गुरून् सिद्धान्तसत्सुन्दरं
सुज्ञानन्दकरं करोति चतुरं ज्ञानाधिराजः स्फुटं॥
यन्नारदाय गदितं चतुराननेन ज्ञानं ग्रहर्चगतिसंस्थितिरूपमग्र्यं।
शाकल्यसञ्ज्ञमुनिना निखिलं निबद्धं पद्यैस्तदेव विदधामि सवासनं स्वैः॥
इत्यादि।

End. इत्थं श्रीमन्नागनामात्मजेन प्रोक्ते तन्त्रे ज्ञानराजेन रम्ये।
ग्रन्थागाराधारभूते प्रभूते गोलाध्याये वर्णनं षड्तूनां॥

Colophon. समाप्तोऽयं गोलाध्यायः सिद्धान्तसुन्दरः। सन् १२६९। श्रावण।

विषयः। सृष्टिक्रमकीर्त्तनं। कदम्बकुसुमाकारस्य भूगोलस्य शून्ये अवस्थितिकथनं। भचक्रसंस्थानकथनं। मेरुस्थितिनिरूपणं। भूरादर्शतलाकारेत्यादिपौराणिक-वाक्यतात्पर्य्यकथनं। आकृष्टशक्तिश्च महीत्यादिभास्करमतखण्डनं। लङ्कायम-कोटिसिद्धपुररोमकाणां संस्थितिकथनं। पर्व्वतानां स्थानादिकथनं। वर्ष-निरूपणं। नक्षत्रमण्डलादीनां दूरत्वादिकथनं। कक्षादिनिरूपणं। पृथिव्यादीनां परिधिनिरूपणं। ग्रहाणां गत्यादिनिरूपणं। क्षेपकनिरूपणमुखेन कोट्याद्यान-यनप्रकारकीर्त्तनं। मण्डलवर्णनं। वृत्तकथनं। विविधयन्त्रकथनं। ऋतूनां कारणकथनादिकञ्च। इति शम्।

No. 1768. पारस्करगृह्यसूत्रं ।

Substance, country-made paper, 16½ × 6 inches. Folia, 38. Lines, 10 on a page. Extent, 740 s'lokas. Character, Nágara. Date, Sm., 1923. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Páraskara Gṛihya Sútra. Domestic rites enjoined to the followers of the Mádhyandiní School. By Páraskara. The work is divided into three káṇḍas, and treats of the domestic fire, the sacraments, and sthálipáka.

Beginning. अथातो गृह्यस्थालीपाकानां कर्म्म परिसमुह्योपलिप्योपलिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य्य प्रणीय परिस्तीर्य्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत् प्रोक्ष्य निरुप्याज्यमधिश्रित्य पर्य्यग्निं कुर्य्यात् स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्व्ववदुपयमनकुशानादाय समिधोभ्यादाय पर्य्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः ॥

End. आप्यायन्तु मेऽङ्गानि वाक् प्राणश्चक्षुः श्रोत्रं यशो बलं यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ १६ ॥

Colophon. इति श्रीगृह्यसूत्रे तृतीयं काण्डं समाप्तं। इति पारस्कराचार्य्यकृतं माध्यन्दिनीशाखासम्बन्धितं गृह्यसूत्रं समाप्तं। संवत् १९२२ ।

विषयः। माध्यन्दिनीशाखासम्बन्धिगृह्यस्थालीपाककर्म्मनिरूपणं ।

No. 1769. कुसुमाञ्जलिव्याख्या ।

Substance, country-made paper, 13½ × 6¼ inches. Folia, 37. Lines, 15 on a page. Extent, 2,600 s'lokas. Character, Bengali, Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Kusumanjali-vyákhyá. A commentary on the Kusumáñjali of Udayana A'chárya. The name of the commentator is not given in the codex, and as there are several exegeses extant under the name of Vyákhyá, I cannot ascertain which it is. From the initial words it is evident that it is distinct from the work noticed under No. 1955. (III, p. 30). The text of Udayaná with an English translation has been published by Dr. E. B. Cowell.

Beginning. सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्द्देऽप्यतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमानं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघः न्यायप्रसूनाञ्जलिः ॥
स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥

End. इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्रीर्यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किममरेशगुरोर्गुरुस्तु प्रीतोऽस्त्वनेन पदपीठसमर्पितेन ॥

Colophon. इत्याचार्य्यश्रीमदुदयनविरचितन्यायकुसुमाञ्जलिप्रकरणं समाप्तं ।

विषयः । उदयनाचार्य्यकृतन्यायकुसुमाञ्जलिव्याख्यानं ॥

No. 1770. हारीतसंहिता, उत्तरार्द्धं ।

Substance, country-made paper, $16\frac{3}{4} \times 5\frac{3}{4}$ inches. Folia, 187. Lines, 12 on a page. Extent, 4,563 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Hárita Sañhitá. A supplement to the system of medicine of A'treya. By Hárita. A'treya was the oldest medical writer among the Hindus, older than Dhanvantari and Charaka. The latter amplified the text of A'treya. The text of Hárita is exceedingly scarce. The codex under notice contains only the chapter on anatomy.

Beginning. नत्वा शिवं सकलतत्त्वकलाभिरूढं ज्ञानाय्तैकबहुलं परमात्मरूपं ।
रोगाधिरोगशमनं दमनं स्मरस्य शान्तं त्रपाकरधरं त्रिगुणात्मरूपं ॥
हिमवदुत्तरे कूले सिद्धगन्धर्व्वसेविते । शान्तद्वगगणाकीर्णे नगरादपि शोभने ॥
तत्रस्थं तपसा युक्तं तरुणादित्यतेजसं । शुद्धस्फटिकवच्छुभ्रं भूतिभूषितविग्रहं ॥
जटाजुटाटवीमौलिं वासितं शुभ्रकुण्डलं ।
आत्रेयं बहुशिष्यैस्तु राजितं तपसा वने ॥
पप्रच्छ शिष्यो हारीतः सर्व्वज्ञानमिदं महत् ।
भगवंस्त्वं गुणाधार आयुर्व्वेदविदांवर ॥
विनयावविनीतो हि पृच्छामि मुनिपुङ्गव ।
कथं रोगसमुत्पत्तिरुत्पन्नो ज्ञायते कथं ॥

End. तस्माद् यत्नेन सद्वैद्यैः सादरार्द्रसमानसैः ।
अर्चयित्वा तु सन्ध्यात् तदा स्यात् सुखसम्पदः ॥

Colophon. इति श्रीमहर्षिश्रात्रेयभाषितहारीतोत्तरे शरीराध्यायः समाप्तः ।

विषयः । रोगाणां लक्षणं चिकित्सा च ।

No. 1771. सिद्धान्तकौमुदीगूढफक्किकाप्रकाशः ।

Substance, country-made paper, $11\frac{3}{4} \times 6$ inches. Folia, 314. Lines, 8 on a page. Extent, 7,250 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Siddhánta-kaumudí-gúḍha-phakkiká-prakás'a, alias *Gúḍha-phakkiká-prakás'a.* A commentary on the Siddhánta-kaumudí of Bhaṭṭojí Díkshita. By Indradatta Upáḍhyáya. The work refers to the portion extending from Sandhi to Kridanta.

Beginning. संवास्य मास्यकञ्जालिं हरिं हृदयपङ्कजे ।
सिद्धान्तकौमुदीगूढफक्किकार्थः प्रकाश्यते ॥
गर्गवंशावतंसो यो वैयाकरणकेशरी ।
उपाध्यायोपनामेन्द्रदत्तस्यैषा कृतिः ++ ॥

End. इन्द्रदत्तेन विदुषा कृतोऽयं सङ्ग्रहो मुदा ।
श्रीकृष्णः प्रियतान्तेन भगवान् भक्तवत्सलः ॥

Colophon. इति श्रीमदुपाध्यायेन्द्रदत्तकृते सिद्धान्तकौमुदीगूढफक्किकाप्रकाशे कृदन्तं समाप्तं ।

विषयः । सिद्धान्तकौमुद्याः सन्धिप्रकरणावधिकृदन्तप्रकरणपर्य्यन्तस्य व्याख्यानं ।

No. 1772. यङ्लुगन्तशिरोमणिः ।

Substance, country-made paper, 11×5 inches. Folia, 50. Lines, 7 on a page. Extent, 525 s'lokas. Character, Nágara. Date. ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Yañluganta S'iromaṇi. A gloss on a portion of S'iromaṇi's commentary on the S'abda-khaṇḍa of Gañges'a. By S'eshakṛishṇa Paṇḍit. The portion refers to the effect of certain grammatical affixes.

Beginning. नतदेवशिरःस्यन्दिमकरन्दाङ्किताङ्घ्रये । वागीशदत्तमतये विघ्ननाशाय ते नमः ॥
यङोऽचि च । अजितिप्रत्ययो गृह्यते न प्रत्याहारः तथा सत्यनीत्येवावच्यत्
यङन्तादन्यस्याचोऽसम्भवादिति हरदत्तः ।

End. श्रीभाष्यप्रमुखमहार्णवावगाहाल्लब्धोऽयं मणिरमलो हृदा निषेव्यः ।
चन्तव्यं यदकरवं(?) पुरस्तात् प्रागल्भ्यं पितृचरणप्रमादलेशात् ॥

Colophon. इति श्रीशेषकृष्णपण्डितविरचितो यङ्लुगन्तशिरोमणिः समाप्तः ॥

विषयः । यङ्लुगन्तधातुप्रकरणं ।

No. 1773. पितृभक्तितरङ्गिणी ।

Substance, country-made paper, 11 × 4 inches. Folia, 84. Lines, 11 on a page. Extent, 1,890 s'lokas. Character, Nágara. Date, Sm. 1650. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Pitṛibhakti-taraṅginí, alias *S'ráddha-kalpa.* On the religious duties due by a son to a father, or directions for the performance of the funeral and the various offerings of water and cake to the close of the first year after the death of a parent. By Váchaspati S'armá. The work was compiled under the orders, and by a court paṇḍit, of Maharájádhirája Rámabhadra, son of Rúpanáráyaṇa, and grandson of Harináráyaṇa, of Mithilá.

Beginning. प्रणम्य वासुदेवाय तन्यते स्वर्गरङ्गिणी । श्रीवाचस्पतिधीरेण पितृभक्तितरङ्गिणी ॥

End. ततो ब्राह्मणो यजमान एकादशब्राह्मणान् पात्रवद् भोजयेत ॥
इति छन्दोगप्रयोगः समाप्तः ॥

Colophon. इति श्रीमहाराजाधिराजश्रीहरिनारायणात्मजश्रीरूपनारायणपदवीमलङ्कृत-
मिथिलामण्डलश्रीरामभद्रचरणादिष्टेन परिषदा श्रीवाचस्पतिशर्म्मणा विर-
चितोऽयं श्राद्धकल्पः परिपूर्णः ॥

विषयः । पुत्रकर्त्तव्यपित्रोर्द्धदेहिकक्रियादिसपिण्डीकरणान्तक्रियानिरूपणं ।

No. 1774. व्यवहारचमत्कारः ।

Substance, country-made paper $10\frac{3}{4} \times 5\frac{1}{2}$ inches. Folia, 40. Lines, 12 on a page. Extent, 1,116 s'lokas. Character, Nágara. Date, Sm. 1637. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vyavahára-chamatkára. A Smṛiti compilation, containing succinct rules regarding certain domestic rites and sacraments. By Rúpanáráyaṇa Mis'ra, son of Bhavánidása. Contents: I. The sacrament of conception. II. do. of Puñsavana. III. do. after birth. IV. to VI. do. of naming, and first eating of rice. VII. do. of cropping of the crown-lock. VIII. do. of puncturing the ears. IX. do. of putting on the sacred cord. X. returning home from pupilage. XI. do. of marriage. XII. do. of bringing a bride to her husband's abode for permanent stay there. XIII. Auspicious days for starting on journeys. XIV. Intercallary months.

Beginning. गङ्गातरङ्गाङ्कितशेखराय ब्रह्मादिनारायणवन्दिताय ।
संसारदुःखस्य निवर्त्तकाय सुखस्वरूपाय नमः शिवाय ॥ १ ॥
भारद्वाजकुलावतंसविमलप्रख्यातिकीर्त्त्याश्रयो
यो नारायणपादपद्मयुगलध्यानैकतानः सदा ।
श्रीमद्गर्गवराहमुख्यगणकाचार्य्यप्रबन्धाऽर्जित-
ज्ञानोऽभूद्नवद्यगद्यजलधिः श्रीनाथमल्लः सुधीः ॥ २ ॥
भवानीदासनामाभूत्तत्तनुजो द्विजाग्रणीः ।
प्रदीपस्त्रक्तिमुक्तानां पटली सेव्यते बुधैः ॥ ३ ॥
रूपनारायणस्तस्य तनूजो विदुषां मुदे ।
व्यवहारचमत्कारं तनुते गुर्व्वनुग्रहात् ॥ ४ ॥

End. १६३७ मिते शाके श्रीविक्रमार्कदेवस्य कार्त्तिकश्चैष्ठशुक्लात्रयम्यां ग्रन्थसमाप्तिं रवौ कृतवान् ॥

Colophon. इति श्रीभवानीदासात्मजमिश्ररूपनारायणविरचिते व्यवहारचमत्कारे मलमास-। निर्णयप्रकरणं चतुर्दशं ॥

विषयः । अत्र चतुर्दशप्रकरणानि सन्ति । तत्र १ प्रथमे प्रकरणे,—गर्भाधानं । २ ये,—पुंसवनं । ३ ये,—जातकर्म्म । ४ र्थे,—नामकरणं । ५ मे,—निष्क्रमणं ६ ष्ठे,—अन्नप्राशनं । ७ मे,—चूड़ाकरणं । ८ मे,—कर्णवेधः । ९ मे,—उपनयनं । १० मे,—समावर्त्तनं । ११ शे,—विवाहः । १२ शे,—द्विरागमनं १३ शे,—यात्रानिरूपणं । १४ शे,—मलमासनिर्णयः ॥

No. 1775. प्रयोगदर्पणं ।

Substance, country-made paper, 13 × 4¾ inches. Folia, 102. Lines, 11 on a page. Extent, 3,700 s'lokas. Character, Nágara. Date, Sm. 1884. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Prayoga-darpaṇa. Directions for the performance of domestic duties and sacraments. By Padmanábha Díkshita, son of Gopála by Párvatí, grandson of Náráyaṇa, and pupil of Sítikaṇṭha. Contents: S'ráddha performed before a marriage for the gratification of the manes. The tying of the crown-lock. Necessity of worshipping Gaṇes'a before commencing a domestic rite. The adoration of the *Mátrikás*, or the eight primary mothers. The sacraments from conception to birth. Special rites to be performed in the event of a child being born under inauspicious conjunctions. Do. for accidents during accouchement. Do. for the birth of twins. Do. for birth with face presentation. Sacrament of naming. Rules for placing a child on a bedstead. Do. for nursing. Sacraments from the first eating of rice to marriage.

Beginning. यो वन्द्यस्त्रिदशैः सदैव यमिनां ध्येयः सदा योगिनां
यो विघ्नौघविनाशनेऽप्यतिदृढो भाग्यप्रदः सेविनां ।
यो विश्वार्त्तिहरस्तथैव सुखदः साहित्यविद्यानिधि-
स्तं वन्दे गिरिजात्मजं गणपतिं वाक्सिद्धये सर्व्वदा ॥ १ ॥
वन्दे श्रीवैष्णवीमूर्त्तिमोहनीं कुलदेवतां ।
प्रचयायास्तटे रम्ये निवासपुरवासिनीं ॥ २ ॥
श्रीमद्गोपालपितरं नारायणपितामहं ।
श्रीगुरुं शितिकण्ठाख्यं पार्व्वतीञ्चैव मातरं ॥ ३ ॥
नाम्ना च पद्मनाभस्तु दीक्षितः श्रीदयान्वितः ।
नानाग्रन्थान् समालोक्य विदुषां प्रीतिहेतवे ॥ ४ ॥
रम्यां नवीनां सुगमां नानावाक्यसुधामयीं ।
प्रयोगदर्पणाख्यां वै चक्रे पद्धतिमुत्तमां ॥ ५ ॥

End. विसृज्य होममग्निञ्च विधिना मानुषीं पुरीं ।
उद्वहेदन्यथा नैव पुत्रपौत्रसमृद्धिमान् ॥ इत्यर्कविवाहः ॥

Colophon. इति श्रीमद्दीक्षितनारायणात्मजगोपालसूनुपद्मनाभविरचितं प्रयोगदर्पणाख्यं अर्कविवाहप्रकरणं समाप्तं ॥

विषयः । अत्र प्रथमं स्वस्तिवाचनप्रकरणं । तत आभ्युदयिकप्रकरणं । तत आभ्युदयिकश्राद्धदेवतानिर्णयः । ततः शिखाबन्धनविचारः । ततः सर्व्वकर्म्मसाधारणाङ्गानां गणेशपूजादीनां प्रयोगः । ततो मातृकापूजनं । ततो गर्भाधानादिजातकर्म्मप्रयोगः । ततो जातस्य बालकस्य अशुभतिथिनक्षत्रयोगजनितदोषशान्तिप्रयोगः । ततो वैकृतप्रसवशान्तिप्रयोगः । ततो यमलजननशान्तिप्रयोगः । अधोमुखप्रसवशान्तिप्रयोगः । नामकरणप्रयोगः । पर्य्यङ्कारोहणविधिः । दुग्धपानविधिः । अन्नप्राशनचूड़ाकरणादिविवाहान्तसंस्कारप्रयोगः ॥

No. 1776. सूतसंहिता स्कन्दपुराणीया । सूतसंहितातात्पर्य्यदीपिकाख्यटीकासहिता ।

Substance, couutry-made paper, $12\frac{3}{4} \times 6\frac{1}{2}$ inches. Folia, 401. Lines, 14—15--16—17—18 on a page. Extent, 32,812 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Súta Sañhitá, with a commentary entitled *Tátparya-dípiká*. The work professes to be a part of the 5th book or the Nágara Khaṇḍa of the Skanda Puráṇa, and comprises, in the codex before me, six khaṇḍas, each subdivided into several adhyáyas or chapters. The *first*, containing 8 chapters, describes the origin of all things, sentient or otherwise, from S'iva. The *second*, containing 13 chapters, dwells on the greatness of S'iva. This is the work noticed under No. 1747 (*ante* p. 50) but there described as the 'first book.' The *third*, containing 20 chapters, discusses the means of liberation and the acquisition of true knowledge. The *fourth*, comprising 12 chapters, treats of the relation of the human to the divine soul, and of the purport of the Upanishads. The *fifth*, comprising 9 chapters, discusses the character of *Mukti* or salvation. The *sixth*, comprising 47 chapters, gives an exposition of the fruits of religious rites and sacrifices performed with a view to reward (*kámya*), as daily duties (*nitya*)—and as occasional rites (*naimittika*). The commentary is by Mádhava A'chárya

Beginning. (टी॰)। अथ विद्यार्थिना गुरुनमस्कारस्तुती प्रथमतः कर्त्तव्ये इति व्युत्पादयितुं सूतगीतां श्रोतुकामैर्न्नैमिषीयैः कृते नमस्कारस्तुती उपनिबध्नाति ।

(मू॰)। ऐश्वर्य्यं परमानन्दमनन्तं सत्यचिद्घनं।
आत्मत्वेनैव पश्यन्तं निस्तरङ्गसमुद्रवत्॥ १ ॥
निर्व्विकल्पं सुसम्पूर्णं सुप्रसन्नं शुचिस्मितं।
भासयन्तं जगत् सा भानुमन्तमिवापरं॥ २ ॥
प्रणम्य मुनयः सूतं दण्डवत् पृथिवीतले।
कृताञ्जलिपुटा भूत्वा तुष्टुवुः परया मुदा॥ ३ ॥

End. (मू॰)। इति जनहितमेतत् प्रोच्य देव्याः प्रसादात् गुरुगुरुमखिलेशं भक्तिपूर्व्वं प्रणम्य।
मुनिगणमवलोक्य स्वानुभूत्यैव सूतः स्वकपरशिवरूपे लीनबुद्धिर्बभूव॥

Colophon. इति श्रीस्कन्दपुराणे सूतसंहितायां यज्ञवैभवखण्डे सप्तचत्वारिंशोऽध्यायः॥

(टी॰)। तत्र विशेषतोऽभिव्यक्तावित्यर्थः श्रूयते हि यो वेद निहितं गुहायां परमे व्योमन्निति।

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यम्बकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्त्तकेन माधवाचार्य्येण विरचितायां सूतसंहितातात्पर्य्यदीपिकायां यज्ञवैभवाख्ये चतुर्थे खण्डे सप्तचत्वारिंशोऽध्यायः।

विषयः। अस्मिन्नेतद्ग्रन्थस्य षट्खण्डाः सन्ति। एकखण्डे,—अष्टभिरध्यायैः, शिवात् चेतनाचेतनात्मकजगतः आविर्भावकथनं।

अपरैकखण्डे,—त्रयोदशभिरध्यायैः, शिवमाहात्म्यवर्णनं।

अपरैकखण्डे,—विंशत्यध्यायैः, मोक्षसाधनज्ञानोपायनिरूपणं।

अपरैकखण्डे,—द्वादशभिरध्यायैः, जीवब्रह्मणोरेकत्वज्ञानस्य मुक्तिसाधनत्वं सर्व्वशाखासम्मतमिति दर्शयितुं ऐतरेयक-तैत्तिरीयकादिसमस्तोपनिषदर्थस्य साकल्येन प्रतिपादिकाया ब्रह्मगीतायाः कथनं।

अपरैकखण्डे,—नवभिरध्यायैः, मुक्तिनिरूपणं।

अपरैकखण्डे,—सप्तचत्वारिंशदध्यायैः, काम्यनित्यनैमित्तिकभेदेन त्रिधा विभक्तस्य यज्ञकर्म्मणः फलवैलक्षण्यादिनिरूपणं॥

No. 1777. शिवगीता, पद्मपुराणोत्तरखण्डीया, सुबोधिन्याख्यटीकासहिता।

Substance, country-made paper, 14 × 7¼ inches. Folia, 72. Lines, 17 on a page. Extent, 4,200 s'lokas. Character, Nágara. Date, Sм. 1873. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'iva Gítá, with a commentary entitled *Subodhiní*. On the divinity of S'iva. The commentary is by Apyají Bhaṭṭa, of Vírapura, pupil of Jñánánanda. Contents : I. The importance of faith in S'iva. II. Dispassion. III. Initiation in the mantra of Virajá. IV. The manifestations of S'iva. V. The gift of the Mahápásupat weapon by S'iva to Ráma. VI. The embellishments of S'iva. VII. S'iva imparts to Ráma a knowledge of his (S'iva's) pervading the universe. VIII. Origin of the human body. IX. The philosophy of corporation. X. Ditto of the soul. XI. The rise and fall of the soul. XII. Adoration. XIII. Varieties of Mukti. XIV. The origin of the five ceremonies of the soul. XV. Bhakti Yoga. XVI. Persons for whom the work is designed. The colophon describes the work to be a part of the Uttara Khaṇḍa of the Padma Puráṇa, but a different codex with a similar beginning has a colophon in which the work is described to be a part of the Matsya Purána, *ante* IV, p. 84.

Beginning. (टी०) । यस्मिन् जातानि भूतानि प्रोतानि च जगत्यतो ।
यस्य सर्व्वान्तरो गीतासुबोधिन्या मुदेऽस्तु नः ॥ १ ॥
अप्याजीभट्टो मेधावी वसन् वीरपुराभिधे ।
ज्ञानानन्देन गुरुणा प्रेरितस्तस्य वै मुदे ॥ २ ॥
विवृतिं शिवगीतायास्तनोति सुविबोधिनीं ।
मुदे विदग्धकोराणां चन्द्रिकां सुविबोधिनीं ॥ ३ ॥
(मू०) । सूत उवाच । अथातः सम्प्रवक्ष्यामि शुद्धं कैवल्यमुक्तिदं ।
अनुग्रहान्महेशस्य भवदुःखस्य भेषजं ॥ १ ॥
न कर्म्मणामनुष्ठानैर्न दानैस्तपसापि वा ।
कैवल्यं लभते मर्त्त्यः किन्तु ज्ञानेन केवलं ॥ २ ॥
रामाय दण्डकारण्ये पार्व्वतीपतिना पुरा ।
या प्रोक्ता शिवगीताख्या गुह्याद् गुह्यतमा हि सा ॥ ३ ॥
यस्याः श्रवणमात्रेण नृणां मुक्तिर्ध्रुवं भवेत् ।
पुरा सनत्कुमाराय स्कन्देनाभिहिता हि सा ॥ ४ ॥
सनत्कुमारः प्रोवाच व्यासाय मुनिसत्तमाः ।
मह्यं कृपातिरेकेण प्रददौ बादरायणः ॥ ५ ॥

End. (मू०) । इत्युक्त्वा प्रययुः सर्व्वे सायं सन्ध्यामुपासितुं ।
स्तुवन्तः सूतपुत्रं ते सन्तुष्टा गोमतीतटं ॥ ६५ ॥

Colophon. इति श्रीपद्मपुराणे उपरिभागे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीशिवराघवसंवादे शिवगीताधिकारिनिरूपणं नाम षोड़शोऽध्यायः ॥ १६ ॥

(टी०)। अतनोच्छिवगीतोपनिषद्बोधसुचन्द्रिकां।
अप्पाजीभट्टः प्रियतां ज्ञानानन्दोऽनया गुरुः ॥
इति श्रीशिवगीताटीकायां अप्पाजीभट्टविरचितायां सुबोधिन्यां षोड़शोऽध्यायः।

विषयः। अत्र षोड़श अध्यायाः सन्ति। तत्र १ मे,—शिवभक्त्युत्कर्षकथनं। २ ये,—वैराग्योपदेशः। ३ ये,—विरजादीक्षानिरूपणं। ४ थें,—शिवप्रादुर्भावः। ५ मे,—रामाय शिवेन महापाशुपतनामकास्त्रदानवृत्तान्तं। ६ ष्ठे,—शिवविभूतियोगनिरूपणं। ७ मे,—रामे शिवेनात्मनो विश्वरूपतादर्शनं। ८ मे,—शरीरोत्पत्तिकथनं। ९ मे,—देहस्वरूपनिर्णयः। १० मे,—जीवस्वरूपकथनं। ११ शे,—जीवगत्यगतिनिरूपणं। १२ शे,—उपासनाविधिः। १३ शे,—मुक्तिभेदनिरूपणं। १४ शे,—पञ्चकोशोपपादनं। १५ शे,—भक्तियोगनिरूपणं। १६ शे, शिवगीताधिकारिनिरूपणं॥

No. 1778. श्राद्धेन्दुः।

Substance, country-made paper, 13 × 5 inches. Folia, 44. Lines, 10 on a page. Extent, 1,300 s'lokas. Character, Nágara. Date, Sm. 1845. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'ráddhendu. A dissertation on the nature of S'ráddha, and the mode of performing it during the new-moon. Anonymous.

Beginning. अथ श्राद्धं निरूप्यते श्रद्धया ब्राह्मणेभ्यो यत् पितॄनुद्दिश्य दीयते ऋषयः श्राद्धमित्याहुः।

End. विष्णुं स्मृत्वा कर्म्मेश्वरार्पणं कुर्य्यादिति सङ्क्षेपः। इति दर्शश्राद्धप्रयोगः।

Colophon. इति श्राद्धेन्दुः समाप्तः।

विषयः। श्राद्धपदार्थनिरूपणं। दर्शश्राद्धप्रयोगकथनञ्च ॥

No. 1779. आचारचन्द्रोदयः ।

Substance, country-made paper, 13½ × 7¼ inches. Folia, 283. Lines, 16 on a page. Extent, 4,500 s'lokas. Character, Nágara. Date, Sm. 1869. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

A'chára-chandrodaya. A digest of the diurnal duties of the faithful. By Mahes'a Kavi, pupil of Purushottama of Miṭhilá, and disciple of Viṭṭhala. The work is divided into eight books, of which the *first* treats of the duties at dawn, immediately after rising from bed. The *second*, the study of the Vedas and the collection of materials for religious rites. The *third*, earning of livelihood for the maintenance of the family, and the duties of faithful women. The *fourth*, of midday duties. The *fifth*, of the five daily sacrifices, including the midday meal. The *sixth*, of duties after the midday meal, and of the nature of food. The *seventh*, of hearing of the Puráṇas. The *eighth*, of nocturnal duties.

Beginning. गोपीवल्लभवल्लभं गुरुतमं दीक्षागुरुं विट्ठलं
वन्देऽहं पुरुषोत्तमं कविवरं विद्यागुरुं मैथिलं ।
यत्पादाम्बुजसेवया अतितरां श्रीकृष्णसेवारति-
र्मैत्रीसत्सु सदा सभासु विदुषां विद्याविलासोदयः ॥ १ ॥
विश्वं यत् कुरुते बिभर्त्ति हरते शैलूषवत् प्रत्यहं
यच्छ्वासप्रभवाः स्रुवन्ति निगमाः साङ्गाः सशास्त्रागमाः ।
संसारार्णवतारणाय जगतां यन्नाम नौका दृढा
तद्वन्दे सहजप्रकाशममलं चैतन्यरूपं महः ॥ २ ॥
ज्ञात्वा गोकुलमर्दितं मघवता विस्मापयन् भूधरं
धृत्वा वामकरे करीव कमलं योऽपादपायाद् व्रजं ।
गुञ्जाहारमयूरमौलिमुरलीपीताम्बरालङ्कृतो
गोपीलोचनचुम्बितो विजयते गोपालचूड़ामणिः ॥ ३ ॥
अस्त्यैरावति रोधसीह नगरं विद्वज्जनालङ्कृतं
धर्म्मश्रीसदनं विटङ्कविलसत् प्रासादमालम्बितं ।
स्मृत्याम्नायविधाननित्यनियतैर्वर्णाश्रमैः सेवितं
नाम्नालाहपुरं पुरन्दरपुरीगर्व्वापहं पश्चिमे ॥ ४ ॥

सेवा यत्र गुरौ हरौ च निरता धर्म्मेषु कार्य्येष्वधी-
स्तर्के वादमतिर्गजेषु च मदः मारीषु मारोन्नयः ।
बन्धो वेणिषु मानतापनपथे स्नेहक्षयो दीपके
द्वारे देवगृहस्य दण्डघटना संदृश्यते नान्यतः ॥ ५ ॥
तस्मिन् राजसभासु लब्धविभवः कालूः कवीनां प्रियो
ह्यासीदुत्पलवंशपङ्कजरवीराजन्यचूडामणिः ।
येनादायि हिरण्यमन्नमचला गावः सवत्सा हरेः
प्रीत्यै विप्रवरेषु बन्धुजनतावर्गेषु मानर्द्धयः ॥ ६ ॥
तत्पुत्रोऽजनि बन्धुवर्गनिरतो धर्म्मैकचित्तोऽनिशं
ब्रह्मण्यो गुरुदेवपूजनमतो नानूर्नरेन्द्राग्रणीः ।
येनेदं कुलकैरवं विधिरुचा नित्यं विकाशीकृतं
धर्म्माचारयशःप्रतापविभवैर्वर्त्ति सर्वोपरि ॥ ७ ॥
जातास्तत्तनयास्त्रयः सुविनया गोपीशपादाश्रयाः
ज्येष्ठस्तत्र परोपकारकुशलः ख्यातः स्म धारीति यः ।
वापीकूपतड़ागदेवभवनारामादिनिर्म्माणकृद्-
दाता बन्धुजनाश्रयो नृपसभालब्धैकपूजोदयः ॥ ८ ॥
तस्यानुप्रभवो बलैकविभवो दाता सदा धर्म्मधी-
र्लोके यो भगवान(?) इत्यभिहितो यस्यानुजो माधवः ।
रूपेणानुजगाम यो रतिपतिं भोगैः सुराणां पतिं
भक्त्या दैत्यपतिं नये भृगुपतिं शीले कुरूणां पतिं ॥ ९ ॥
तद्धर्म्मपत्नी समसूत वंमा(?) नारायणानेत(?) जनार्द्दनादीन् ।
सुतान् सुराभान् गुरुदेवभक्तान यथेशभक्तिर्विदिताखिलार्थान् ॥ १० ॥
तेनाचारमभीप्सुता रुविनयं विज्ञापितो धीमता
श्रीसारस्वतदुर्गशर्म्मतनयो नाम्ना महेशः कृती ।
ग्रन्थे यत्र हि माधवादिरभवत् सार्थः प्रकाशान्तिकः
शब्दस्तं कुरुते हिताय जगतामाचारचन्द्रोदयं ॥ ११ ॥

End. यावत् खे रविचन्द्रतारकगणा दीप्यन्ति दिव्यप्रभाः
यावत् सप्तधराधरा भुवि गजाः सन्त्यष्ट सप्तार्णवाः ।
पाताले किल कोककूर्म्मभुजगा यावद् भुवं बिभ्रति
तावन्माधवकीर्त्तिरस्तु भुवने मोहान्धकारापहा ॥

Colophon. इति श्रीमदुत्पलवंशावतंसविद्वज्जनमानसराजहंसनानूनरेन्द्रप्रतापकीर्त्तिकौमुदी-

विशदीकृतदिग्वलयश्रीमाधवप्रकाशे महेशकविदर्शिते सदाचारचन्द्रोदयेऽष्टम-
भागकृत्यपरिच्छेदः ।

प्रदर्शितो धीरमहेशशर्म्मणा सुपूजितो वाजसनेयिकर्म्मणा ।
प्रकाशितो माधवदासवर्म्मणा प्रयुज्यतां सर्व्वजनेन शर्म्मणा ॥

इति श्रीसदाचारचन्द्रोदयः सम्पूर्णः ॥

विषयः । अत्राष्टभागाः सन्ति । तत्र प्रथमे भागे,—आदौ धर्म्माचारप्रशंसा । ततः सदाचार-लक्षणं । ततः सदाचारप्रमाणपरामर्शः । ब्राह्ममुहूर्त्तकृत्यं । प्रातर्मङ्गलालोकनं, मूत्रोत्सर्गादिविधिश्च । शौचाचारविधानं । कमण्डलुमार्जनं । देहमलशुद्धिः । आचमननिर्णयः । दन्तकाष्ठविधिः । शिखाबन्धविधिः । प्रातर्गेहस्नानक्रिया, होमकालनिर्णयश्च । नित्यदानविधिः ।

द्वितीये भागे,—वेदाभ्यासविधिः । अभिवादक्रिया । कार्य्याकार्य्यनिर्णयः । कुश-सङ्ग्रहणविधिः ।

तृतीयभागे,—पोष्यवर्गार्थसाधनं । धनार्जनविधिः । स्त्रीणां धर्म्मप्रशंसा । सहा-नुगमनविधिः ।

चतुर्थभागे,—मध्याह्नस्नानकथनं । स्नानप्रसङ्गक्रियोक्तिः । रात्र्यादिस्नाननिर्णयः । महानिशालक्षणं । समुद्रस्नानकथनं । नद्यादिस्नानकथनं । तड़ागस्नाननिर्णयः । उष्णोदकस्नानविधिः । मलस्नानविधानं । तैलाभ्यङ्गनिर्णयः । गौणस्नानकथनं । नदीलक्षणं । नदीरजोनिर्णयः । नित्यकर्म्मपरित्यागनिमित्तानि । धौतवस्त्रपरीधानं । सोत्तरीयविधानं । तिलकविधानं । शङ्खचक्रादिधारणं । तुलसीमणिमालादि-धारणं । सन्ध्याप्रशंसायां गौणकालनिर्णयः । पवित्रलक्षणोक्तिः । पवित्रधारणविधिः । सन्ध्याविधानं । गायत्रीजपनिर्णयः । जपमालाविधानं । रुद्राक्षस्य फलोदय-जपभेदकथनं । काम्यजाप्यक्रियादिकं । सन्ध्याप्रयोगः । ब्रह्मयज्ञविधिः । तर्पण-विधानं । भीष्मकृतर्प[illegible] । पद्मविष्णुपुराणीयतर्पणं । तर्पणप्रयोगः । जलाशये विष्णु-पूजाविधानं । तान्त्रि[illegible]सन्ध्याविधानं । नित्यकाम्यभेदेन देवपूजाप्रशंसा । अशौच-पूजनविधिः । निर्म[illegible]द्वासनविधिः । पूजाधिकारिनिरूपणं । दीक्षोक्तिः । प्रतिमा-लक्षणं । भूतशुद्धिः । अर्घ्यादिविधिः । पुष्पदानविधिः । पूजोपचारगणनं । पञ्चदेव-प्रशंसनं । विष्णुपूजाधारविधिः । शालग्रामप्रशंसनं । शालग्रामभेदकथनं । शाल-ग्रामपूजाधिकारिणः । द्वारिकाचक्रपूजोक्तिः । देवानां वैगुण्ये प्रतिष्ठात्यागः । विष्णुपूजोपचाराणां फलोक्तिः । घण्टावादनमाहात्म्यं । शङ्खपूजाफलं । गीतादि-स्तोत्रमहिमा । अष्टाक्षरजपमहिमा । पुरुषसूक्तादिमन्त्रपूजादि । आसनविधानं । महापुराणीयपूजा । अष्टाक्षरपूजनं । विष्णवेश्मकरणं । पञ्चायतनपूजनं । पूजा-पराधकथनं । वैष्णवस्तुतिलक्षणं ।

पञ्चमभागे,—पञ्चयज्ञविधिः। गोग्रासविधिः। गृहस्थाश्रमकथनं। भोजनविधिः
षष्ठभागे,—भोजनोत्तरकर्म्मविधानं। भोज्याभोज्यनिर्णयः। स्वाभाविकाभक्ष्यकथनं।
निमित्ताभक्ष्यकथनं। मांसाशनविधानं। दूषितान्नशुचिः।
सप्तमभागे,—पुराणश्रवणविधिः।
अष्टमभागे,—होमादिविधिः। नक्तं शयनविधिः। दारोपगमनिर्णयः। रजस्वला
गर्भवतीधर्म्मोक्तिः। शास्त्राधिकारिकथनं॥

No. 1780. स्फोटचटकम्।

Substance, country-made paper, 14 × 6 inches. Folia, 17. Lines, 1 on a page. Extent, 400 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. In correct.

Sphoṭa-chaṭaka. On the power of sound in expressing the meaning of words—a philosophical dogma founded on the theory of eternity of sound. By Kṛishṇa Bhaṭṭa, son of Raghunátha, and grandson of Govardhana, of the clan of Mauli. The dogma is held in great reput by grammarians of the Nyáya school.

Beginning. पित्रोः पादयुगं नत्वा जानकीरघुनाथयोः।
मौनी+कृष्णभट्टेन तन्यते स्फोटचण्टका॥
शाब्दिकानां वाच्यलक्ष्यवङ्ग्यार्थप्रतिपादकानां वाचिकलाक्षणिकव्यञ्जकानां शब्द
न्तः, तन्निष्ठा जातिर्वा स्फोट इति व्यवहारः।

End. तस्मादेकवर्णात्मकोऽखण्डवाक्यस्फोटो वाचक इति सिद्धं।

Colophon. इति श्रीमन्मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजजानकीजानिरघुनाथभट्टा
त्मजश्रीकृष्णकृतस्फोटचटका सम्पूर्णा॥

विषयः। अष्टौ स्फोटशब्दाः। तत्र वर्णपदवाक्याखण्डपदाखण्डवाक्यभेदेन व्यक्तिस्फोट
पञ्च। वर्णपदवाक्यभेदेन जातिस्फोटाः त्रयः।

No. 1781. वेदान्तार्य्या, आर्य्याव्याख्याऽभिधटीकासहिता।

Substance, country-made paper, $10\frac{1}{4} \times 5\frac{3}{4}$ inches. Folia, 33. Lines, 1 on a page. Extent, 300 s'lokas. Character, Nágara. Date, Sm. 189 Place of deposit, Calcutta, Government of India. Appearance, old. Pro and verse. Incorrect.

Svátmanirúpaṇa-prakaraṇa, or *Svátmánanda-prakaraṇa* alias *Vedántáryá*. A compendium of the Vedánta doctrine, in a set of verses in the A'ryá metre. By S'aṅkara A'chárya. Attached to the text is a commentary entitled A'ryávyákhyá, by Sachchidánanda Sarasvatí. Hall's Contributions, p. 104.

Beginning. (टी॰)। प्रचण्डपाषण्डविखण्डनोद्यतं त्रयीशिरोऽर्थप्रतिपादने रतं।
बुधैर्नुतं योगकलाभिराश्रितं नमामि तं शङ्करं देशिकं ततं॥ १॥
इह सकलशिष्टाग्रणीर्भगवान् शङ्कराचार्य्यः जिज्ञासुजनानुकम्पया सकलवेदान्त-
सिद्धान्तरहस्यप्रदर्शनपरं वेदान्तप्रकरणमारभमानस्तत्रादौ श्रीगुरुनमस्काररलचणं
मङ्गलाचरणमार्य्याद्वितद्वयेनाकरोत् श्रीगुर्व्विति॥
(मू॰)। श्रीगुरुचरणद्वन्द्वं वन्देऽहं मथितदुःसहद्वन्द्वं।
भ्रान्तिग्रहोपशान्तिं पांशुमयं यस्य भसितमातनुते॥ १॥
देशिकवरं दयालुं वन्देऽहं निहतसकलसन्देहं।
यच्चरणद्वयमनुभवमुपदिशति तत्पदस्यार्थं॥ २॥
संसारदावपावकसन्तप्तः सकलसाधनोपेतः।
स्वात्मनिरूपणनिपुनैर्वाक्यैः शिष्यः प्रबोधते गुरुणा॥ ३॥

End. (मू॰)। अज्ञानान्धविहन्ता विरचितविज्ञानपङ्कजोल्लासः।
मानसगगनतलं मे भासयति श्रीनिवासगुरुभानुः॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशङ्कराचार्य्यकृतस्वात्मनिरूपणप्रकरणं
समाप्तं!
(टी॰)। चैतन्यद्युतिरुचिराङ्गो दूरनिरस्तश्यामलासङ्गः।
हृदयसरोजे वरजे भ्रमति भ्रमरो विलचणः कश्चित्॥
इति श्रीसच्चिदानन्दसरस्वतीविरचिता आर्य्याव्याख्या समाप्ता।

विषयः। आत्मतत्त्वनिरूपणं।

No. 1782. परिभाषेन्दुशेखरकाशिका।

Substance, country-made paper, $10\frac{3}{4} \times 6\frac{1}{4}$ inches. Folia, 164. Lines, 11 on a page. Extent, 4,715 s'lokas. Character, Nágara. Date, Sм. 1916. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Paribháshendu-s'ekhara-kás'iká or simply *Kás'iká*. A commentary on the Paribhashendu s'ekhara, of Nages'a Bhaṭṭa. By Vaidyanátha Bhaṭṭa, surnamed Paiyaguṇḍa, son of Mahádeva by Vení. The

Paribháshendu-s'ekhara itself is a commentary on the grammatical apho-risms of Páṇini. See my Catalogue of Sanskrit MSS. in the Library of the Asiatic Society, pp. 57, 58.

Beginning. वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुं ।
विवृतिं परिभाषेन्दुशेखरे तनुतेऽगदाम् ॥
प्रारीप्सितस्य ग्रन्थस्य निर्व्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानतिरूपं मङ्गलमाचर-
शिष्यशिक्षायै व्याख्यात्टश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति नत्वेति ।

End. गमकं बोध्यमित्यन्यत्र विस्तर इति सर्व्वमनवद्यमिति शिवं ।

Colophon. इति श्रीमत्पायगुण्डोपाख्यमहादेवसुतवेणीगर्भजवैद्यनाथभट्टकृतपरिभाषेन्दुशेखर-
काशिका समाप्ता ।

विषयः । परिभाषेन्दुशेखरव्याख्यानं ।

No. 1783. मानसोल्लासवृत्तान्तविलासः, मूलसहितः ।

Substance, country-made paper, 12¾ × 6 inches. Folia, 41. Lines, 7—11—12—14—15 on a page. Extent, 2,007 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mánasollása-vṛittánta-vilása alias *Dakshiṇá-múrti-stotra-vártika*. A gloss on a commentary, called Mánasollása, on a hymn by S'añkara A'chárya, in praise of Dakshiṇá Múrti. By Vis'varúpa A'chárya. The commentary is by Ráma Tirtha. The hymn is a short one of ten stanzas, but in it S'añkara has condensed the essence of the Vedánta. Hall's Contributions, p. 110.

Beginning. (टी॰) । प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं
प्रत्यक् तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननं ।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं
हृद्यन्तं कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकं ॥
नत्वाथ शङ्कराचार्य्यमुख्यान् सर्व्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥
इह हि भाष्यकारः श्रीमच्छङ्कराचार्य्यनामा मन्दमतीं स्तत्त्वजिज्ञासूननुग्रहीतु-
दक्षिणामूर्त्तिस्तोत्रव्याजेन समस्तवेदान्तार्थरहस्यमाविष्कार दशभिः पद्यबन्धै-
तच्छिष्येण विश्वरूपाचार्य्येण सुरेश्वरापरनाम्ना तत्पद्यप्रबन्धार्थतत्त्वं तात्पर्य्यतो

मानसोल्लासनाम्ना वार्त्तिकात्मना ग्रन्थसन्दर्भेणाविष्कृतं तमिमं ग्रन्थं यथाशक्ति विवृणोमि तत्र शिष्टाचारसंरक्षणाय मङ्गलाचरणं द्योतयत्ययमाद्यः श्लोकः मङ्गलमिति ।

(मू॰)। मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥ १ ॥
आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरं ॥

End. (मू॰)। प्रकाशात्मिकया शक्त्या प्रकाशप्रभयाकरः ।
प्रकाशयति यो विश्वं प्रकाशोऽसौ प्रकाशतां ॥ १४ ॥

Colophon. इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थप्रतिपादके प्रबन्धे मानसोल्लासे दशमोल्लाससङ्ग्रहः ।
(टी॰)। दशमश्लोकव्याख्योपसंहारश्लोकः इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थप्रतिपादक इति ।
इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥
अनेन भगवान् श्रीमद्दक्षिणामूर्त्तिरीश्वरः ।
गुर्व्वात्मा प्रियतां नित्यं तत्त्वज्ञानप्रदः सतां ॥
इति श्रीदक्षिणामूर्त्तिस्तोत्रव्याख्याप्रबन्धमानसोल्लासवृत्तान्तविलासः सम्पूर्णः ॥

Substance, country-made yellow paper, 7 × 4 inches. Folia, 10. Lines, 11 on a page. Extent, 275 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi, Post Madhubani, Darbhañgá. Paṇḍit Kánáilála Jhá. Appearance, new. Prose. Correct.

Vedántasañjñá-dípiká. A commentary on the Vedánta-sañjñá, a treatise on the terminology of the Vedánta. By Áditya Puri, disciple of Haricharana Puri.

Beginning. नत्वा श्रीकृष्णदत्ताख्यसेवातीर्थमुनीश्वरौ ।
सञ्ज्ञाग्रन्थस्य चास्यैव क्रियते पददीपिका ॥
मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥
चिकीर्षितग्रन्थपरिसमाप्त्यर्थमिष्टदेवतानमस्कारलक्षणं मङ्गलं निबध्नन् चिकीर्षितं प्रतिजानीते गणेशमिति । इत्यादि ।

End. पदार्थानामध्यारोपमाश्रित्य सञ्ज्ञाः प्रतिपादिता इत्यर्थः ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीहरिचरणपुरीशिष्यादित्यपुरीविरचिता वेदान्तसञ्ज्ञादीपिका समाप्ता ।

विषयः । वेदान्तसञ्ज्ञाभिधानप्रकरणस्य व्याख्यानम् ।

No. 1845. तत्त्वनिर्णयः ।

Substance, palm-leaf, 8 × 2 inches. Folia, 157. Lines, 5 on a page. Extent, 2,925 s'lokas. Character, Maithili. Date, Sk. 1661. Place of deposit, the Library of the Rájá of Darbhañgá; also another copy with Paṇḍit Náná Díkshita of Darbhañgá. Appearance, old. Prose and verse. Correct.

Tattva-nirṇaya. Disquisitions regarding various topics of Smṛiti ritual. By Pakshadhara Mis'ra, son of Vaṭes'vara Mahámahopádhyáya.

Beginning. अवतु सततं शिवाङ्कशायी शिशुरफलीकृतदानवारियत्नः ।
तदनु कमलभूकृतप्रणामो गिरितनयार्पितपादपद्ममालः ॥
श्रये संसारपाथोधितापत्रयहरं हरं ।
शरणं केशवस्यापि परार्थैकप्रयोजनम् ॥
न्यायार्णवपरिश्रान्तसूरितारणसेतवे ।
गुरवे श्रीवटेशाय खरार्कमतये नमः ॥
श्रीमत्पक्षधरैरेष प्रणम्य पितरं गुरुम् ।
वटेश्वरविमूढानां क्रियते तत्त्वनिर्णयः ॥

तत्रादौ नामस्वरूपनिरूपणं। तत्र ब्राह्मणस्य शर्म्मेति नाम कर्त्तव्यमिति गृह्य-
दर्शनात्। इत्यादि।

End. कृतः पक्षधरेणैष मोहविप्लवतो मुदम्।
तनोतु मूढमनसो मनसस्तत्त्वनिर्णयः॥

Colophon. इति श्रीमहामहोपाध्यायश्रीवटेश्वरात्मजमहामहोपाध्यायश्रीपक्षधरकृतः तत्त्व-
निर्णयः समाप्तः। शाके १६६१।

विषयः। ब्राह्मणादीनां नामस्वरूपकथनादिकं। मलिम्लुचादिमासनिरूपणं। प्रमादकृत-
धर्म्माणामनुष्ठेयत्वकीर्त्तनादिकं। सन्ध्यागर्ज्जनादिनिरूपणं। आभ्युदयिकनिरूपणं।
आभ्युदयिकक्रमकीर्त्तनं। न्युब्जीकृतार्घ्यपात्रस्य अनुत्तानीकरणकथनं। धर्म्मलक्ष-
णस्वरूपादिविवेचनं। शूद्रकर्त्तव्यधर्म्मनिरूपणं। होमपरिभाषाकथनं। होमम-
न्त्राणामन्तरे प्रणवनिषेधकथनं। प्रतिग्रहविधिकीर्त्तनं। भूपालात् प्रतिग्रहप्रति-
षेधकीर्त्तनं। भोजनविधिः। वृथामुण्डननिषेधः। सङ्कल्पं विनापि एकादश्यादि-
व्रतसिद्धिर्भवतीति निरूपणं। प्रायश्चित्तोपदेशः। सपिण्डनश्राद्धादिनिरूपणं। त-
त्कालादिनिरूपणं। मासिकादिव्यवस्थानिरूपणं। एकादशाहव्यवस्था। पतिपुत्र-
हीनायाः सपिण्डननिषेधः। स्त्रीकर्त्तृकवृषोत्सर्गविधिः। और्द्ध्वदेहिकाधिकारिनिरू-
पणं। नवान्नव्यवस्था। अमावास्यादिश्राद्धनिरूपणं। अपरपक्षश्राद्धकथनं। तीर्थ-
श्राद्धविधिः। पुण्यक्षेत्रे अन्यस्वामिकत्वनिषेधः। सपिण्डननियतकालनिरूपणं। त-
र्पणविधिः। अशौचनिरूपणं। शिखाबन्धनादिविधिः। पवित्रधारणविधिः। पाद-
शौचं विना आचमनादिनिषेधः। आचमनविधिकथनं। परनिपाने स्नानादि-
विधिः। नदीरजोयोगनिरूपणं। नद्यादीनां लक्षणकथनं। मासस्वरूपादिविवेचनं।
कुशलक्षणादिनिरूपणं। श्राद्धाधिकारिनिरूपणं। श्राद्धकर्त्तुर्नियमादिकथनं
सङ्क्रान्तिनिर्णयः। कन्यादानाधिकारिनिरूपणं। ब्राह्मणेतरस्य द्विजस्य मद्यपान-
प्रायश्चित्तकथनादिकं। ग्रहणे भोजनादिव्यवस्थानिरूपणं। भूकम्पाद्यशुद्धिनिरू-
पणं। एकादश्यादिव्यवस्थानिर्णयः। विधवाकृत्यनिरूपणं। पौनर्भवादिनिरूपणं।
नार्द्रवाससा जपादिकं कर्त्तव्यमिति कथनादिकं। प्रातःस्नानविधिः। दायाधिकारि-
निरूपणादिकं। पत्नीसङ्क्रान्तपतिधनाधिकारिनिरूपणं। विभागानन्तरं जातस्य
व्यवस्थाकथनं। दत्ताप्रदानिकनिरूपणं। दिव्याधिकारिनिरूपणं। दिव्यकालनि-
रूपणादिकं। निवृत्तव्यवहारस्य प्रामाण्यनिवर्त्तनकथनं। शपथादिनिरूपणं। भुक्ति-
निरूपणादिकं। क्रयविक्रयादिकथनं। विभक्ताविभक्तव्यवस्थानिरूपणं। महाष्ट-
म्यादिव्यवस्थाकीर्त्तनं। पूजायां पुष्पादिनिरूपणं। सामान्यतो निषिद्धानि। जन्मा-
ष्टम्यादिव्यवस्थानिर्णयः। परिभाषाकथनं। तत्र अष्टादशधान्यानि। चित्रौदन-

निरूपणं। सर्व्वगन्धनिरूपणं। सर्व्वधातुनिरूपणं। हविष्यद्रव्यनिरूपणं। अशौच-सङ्करादिनिरूपणं। त्रिविधक्रियानिरूपणं। श्राद्धे विधाहिता-स्वयङ्गाहितासुतयोः सत्त्वे व्यवस्थाकथनं स्वाशौचादिनिरूपणं। मृत्युविशेषाशौचनिरूपणं। अनशौचिनः। देशाचारधर्म्मस्य प्रामाण्यकीर्त्तनञ्च॥

No. 1846. स्मृतिदीपिका।

Substance, country-made paper, 10 × 4 inches Folia, 212. Lines, 7 on a page. Extent, 5,722 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi, Post Madhubani, Darbhañgá, Paṇḍit Kánáilála Jhá. Appearance, fresh. Prose and verse. Correct.

Smṛiti-dípiká. A Smṛiti compilation treating of times meet for domestic rites, rituals for worshipping various divinities, daily religious duties, S'ráddhas, &c. By Vámadeva Upádhyáya.

Beginning. गोविन्दचरणद्वन्द्वमाधाय हृदयाम्बुजे।
वामदेवेन सुधिया कृता गूढार्थदीपिका॥
हरिप्रसादादन्येषामवेद्यार्था निरूपिताः।
इह मात्सर्य्यमुत्सार्य्य विदाङ्कुर्व्वन्तु पण्डिताः॥
तत्र वर्षकृत्ये त्रिंशत्तिथिघटितैर्द्वादशभिर्मासैर्मलमासपाते त्रयोदशभिर्वर्षसमाप्तिः। इत्यादि।

End. होमानन्तरं भूस्वाम्यन्नदानं न चतिकरं। आलभ्य ऊर्द्धाधोमुखाभ्यां कराभ्यां व्यस्ताभ्यां स्पृष्ट्वा अवगाह्य इदमन्नमिमा आप इदं हविरित्यन्नजलघृतादिषु ज्ञेयमिति शम्।

Colophon. इति उपाध्यायश्रीवामदेवकृता स्मृतिदीपिका समाप्ता। समाप्तश्चायं ग्रन्थः।

विषयः। कृत्यविशेषे वर्षगणनाविशेषनिरूपणं। धर्म्मकार्य्येषु पञ्चविधमासनिरूपणादिकं। अत्र सर्व्वत्र नैयायिकसमयानुसारितर्केण दूषणभूषणादिकरणं ज्ञेयं। मलमासविधानं। तिथिस्वरूपकथनप्रसङ्गेन युग्मादितिथिविवेचनं। एकादशीनिर्णयः। पारणनिरूपणं। चैत्रादिमासकृत्यनिरूपणं। जन्माष्टमीनिर्णयः। महाष्टमीविधानादिकं। शिवरात्रिविधिः। यजमानस्य कर्त्तव्यनिरूपणं। जननमरणव्रणाशौच विप्रस्य शिवादिपूजने नित्याधिकारकथनं। स्पर्शं विना शालग्रामशिलायामपि स्त्रीशूद्राभ्यां पूजा कार्य्येति निरूपणं। व्रतपरिभाषाकीर्त्तनं। व्रतपदार्थनिरूपणं।

मन्वन्तरादिनिरूपणं। अर्द्धोदययोगनिरूपणप्रसङ्गेन गौड़देशीयमतदूषणं। पुण्य-कालविवेचनं। विशिष्य कार्त्तवीर्य्यदीपदानविधिकथनं। अहोरात्रकृत्याचारनिरूपणं। तत्र मूत्रपुरीषोत्सर्गादिविधिकथनं। शौचविधिकथनं। आचमनविधिकीर्त्तनं। दन्तधावनविधिकीर्त्तनं। स्नानादिविधिकीर्त्तनं। तर्पणविधिः। सन्ध्योपासनविधिः। पवित्रनिरूपणं। वासःपरिधानविधिः। शिखाबन्धनादिविधिः। पञ्चयज्ञविधिः। देवपूजाविधिः। इष्टदेवतापूजाविधिः। पार्थिवशिवलिङ्गपूजाविधिः। अक्षतदानविचारः। पुष्पविवेचनं। नैवेद्यविधिः। विष्णुपूजाविधिः। वैश्वदेवविधिः। आतिथ्यविधिः। नित्यश्राद्धविधिः। भोजनविधिः। मांसवर्ज्जननिरूपणं। अस्य प्रतिप्रसवकथनं। मत्स्यभोजनविधिः। पक्षिभोजनविधिः। ग्राम्यभिन्नकपोतादिभोजनविधिः। माहिषदुग्धस्य आमिषत्वकथनं। सामान्यतो भक्ष्याभक्ष्यनिरूपणं। शयनादिविधिः। अशौचनिरूपणं। अस्पृश्यनिरूपणं। स्नानाशक्तस्य आर्त्तस्य शौचविधिकीर्त्तनं। आचमनशुद्धिकीर्त्तनं। उच्छिष्टनिरूपणं। जननमरणाशौचनिरूपणं। सापिण्ड्यनिरूपणं। बालाद्यशौचनिरूपणं। विदेशस्थाशौचं। अग्निभृग्वादिभिर्मरणे अशौचकथनं। अशौचापवादकथनं। प्रेतकृत्यनिरूपणं। अस्थिसञ्चयविधिः। फलश्रुतिसहितं दशपिण्डदानविधिकीर्त्तनं। अहाशौचादौ दिनविशेषे पिण्डदानसङ्ख्याकथनं। देशभेदे शौचाद्याचारस्य वैधत्वकथनं। भूजल-तेजसां शुद्धिनिरूपणादिकं। सामान्यतो द्रव्यादिनिरूपणं। स्पर्शदोषापवादकथनं। मुमूर्षुकृत्यकथनं। द्वादशविधश्राद्धलक्षणकथनं। श्राद्धदेशनिरूपणं। श्राद्धकालनिरूपणं। काम्यश्राद्धविधानं। श्राद्धमुहूर्त्तकथनं। श्राद्धे देयादीनि। निमन्त्रणविधिः। सङ्कल्पविचारः। सपिण्डीकरणादिविधिः। आद्यश्राद्धविधानकीर्त्तनञ्च।

No. 1847. सर्व्वदर्शनशिरोमणिः।

Substance, country-made paper, 10 × 4 inches. Folia, 16. Lines, 6 on a page. Extent, 384 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi, Post Madhubani, Darbháṅgá. Paṇḍit Kánáilála Jhá. Appearance, fresh. Prose. Correct.

Sarvadars'ana-s'iromaṇi. An epitome of the various philosophical doctrines current in India, and of the same character as the Sarvadars'ana-sangraha of Mádhava Áchárya. By S'iromaṇi. The personal name of the author does not appear in the codex.

Beginning. अथातः प्रनाणानि। अदोषमितिकरणानि प्रमाणानि तानि चक्षुरादीनि।

तत्र फलाशेराप्तवचनाद्वा अर्थप्रमितिः। तत्र प्रत्यक्षं बलवद् विशेषेण स्वरूपमितिकरणत्वात्। इत्यादि।

End. नापच्छेदन्यायेन श्रुतिबाधः, तस्यानियतपौर्व्वापर्य्यविषयसञ्चारात्, न स्वेष्टार्थसिद्धये,—अतिप्रसङ्गात् द्वयोर्विषयव्यवस्थया विरोधोपशमने अन्यतरबाधस्य अन्याय्यत्वात्—इति शम्।

Colophon. इति शिरोमणिकृतसर्व्वदर्शनशिरोमणिः सम्पूर्णः।

विषयः। सङ्क्षेपेण केषाञ्चित् दर्शनानां तात्पर्य्यकथनं। तत्र प्रथमतः प्रमाणप्रमेययोः स्वरूपनिरूपणं। चार्व्वाकदर्शनमतकीर्त्तनं। माध्यमिकमतकथनं। योगाचारमतकथनं। सौत्रान्तिकमतकथनं। वैभाषिकमतकथनं। आर्हतदर्शनमतं। लैङ्गदर्शनमतकथनं, तत्तु,—स्वतन्त्रास्वतन्त्रभेदेन द्विविधप्रमेयः, स्वतन्त्रो भगवान् महेश्वरः, तदधीनचेष्टावदर्थः अस्वतन्त्रः। स च त्रिविधः,—विद्या, कला, पशुश्चेति। तत्रपशुगुणरूपा विद्या द्विविधा,—बोधरूपा अबोधरूपा चेति। सोऽयं बोधः चेतननिष्ठः, अबोधस्तु अचेतनवृत्तिरिति। चेतनपरतन्त्रा कला द्विविधा,—कार्य्याख्या कारणाख्या चेति। तत्र भूततन्मात्ररूपा कार्य्याख्या, कारणाख्या तु त्रयोदशविधकरणरूपा। अथ पशुत्वसम्बन्धी पशुः,—स च द्विविधः, साञ्जनो निरञ्जनश्चेति,—तत्र शरीरादिसम्बन्धी प्रथमः, तद्रहितो द्वितीयः। तत्र महेश्वरजीवात्मसम्बन्धरूपः क्रियालक्षणः, क्रियोपरमलक्षणश्चेति द्विविधो योगः। तदभ्यासेन हि आत्मवृत्तिदुष्टभावलक्षणस्य मलस्य अपगमे मनोजवित्व-कामरूपित्व-विकरणधर्म्मित्वरूपेयं मुक्तिः सिद्ध्यतीति ज्ञेयं। शैवदर्शनमतं। शाक्तदर्शनमतकथनं,—तत्तु शक्तिरेका प्रमेया, सा च अजड़ा प्रकृतिरित्यभिधीयते। तत्र प्रकृतिरेकापि स्वेच्छया द्विविधा भवति—पराची प्रतीचीभेदात्। पराची खलु परिणामस्वभावा;, तथा अस्वतन्त्राः शिवादयः अजड़परिणामाः। अथेच्छया चित्तादयो जड़परिणामाश्च। अतः शक्तिरेकापि बहुधा अभिधीयते। तन्त्रोक्तयोगानुष्ठानेन जड़त्वनिवृत्तौ सत्यां पराच्यां परिणामस्थैर्य्ये च सति प्रतीचीस्वरूपोत्पत्तौ या सम्पत्तिः सा मुक्तिरित्यवधेयं। कापिलदर्शनमतं। कौमारिलदर्शनमतं। तथा हि,—अस्तु यथाप्रसिद्धि प्रमाणप्रमेयजातं धर्म्मानुष्ठानादेव निःश्रेयसाधिगमः, काम्यप्रतिसिद्धयोरनारम्भात् आरब्धस्य च उपभोगक्षयात् नित्यानुष्ठानेन प्रत्यवायपदवेदनीयप्राप्स्यमानपापस्य पुण्यस्य च अनारब्धकर्म्मणः निःशेषेण विध्वंसात् स्वात्मन्यवस्थानं मोक्ष इति। काणाददर्शनमतं। अक्षपाददर्शनमतं। पातञ्जलदर्शनमतं। पाणिनीयदर्शनमतकीर्त्तनञ्च। (येषां दर्शनानां मतं प्रसिद्धं, नात्र तेषां तात्पर्य्यं विवृतमिति ज्ञेयम्।)

No. 1848. स्मृतिपरिभाषा ।

Substance, country-made paper, 10 × 4 inches. Folia, 56. Lines, on a page. Extent, 1,237 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi, Post Madhubani, Darbhangá, Paṇḍit Kánáilála Appearance, old. Prose and verse. Correct.

Smṛiti-paribhāshá. Dissertations on the principal technical terms used in Smṛiti works and general rules regarding Smṛiti rituals. By Vardhamána Mahámahopádhyáya.

Beginning. साधर्म्यं यत्र सर्व्वेषां वैधर्म्यञ्चापि सर्व्वतः ।
पारेवाङ्मनसं विष्णुं तं कथञ्चिदुपास्महे ॥
अथ सार्व्वत्रिकी परिभाषा । तत्र विष्णुः—
स्नातोऽधिकारी भवति दैवे पैत्र्ये च कर्म्मणि ।
पवित्राणां तथा जप्ये दाने च विधिदेशिते ॥
पवित्राणां मन्त्राणां मन्त्रः पवित्रमुच्यते । इति सूत्रकारवचनात् ।

End. विधिना तु यदा दत्ता पात्रे धेनुः सदक्षिणा ।
दाता तारयते जन्तून् फलानामयुतैः शतैः ॥
अयुतैः शतैरिति सहार्थे तृतीया ।
पात्राण्याध्यात्मिकी मुख्या विशुद्धाश्चाग्निहोत्रिणः ।
देवताश्च तथा मुख्या गोदानं ह्येतदुत्तमं ॥

Colophon. इति महामहोपाध्यायवर्द्धमानकृता स्मृतिपरिभाषा समाप्ता ।

विषयः । स्नानदानजपादौ सार्व्वत्रिकीपरिभाषाकथनं । कर्तुरङ्गादिनियमकथनं । विहित-क्रियानिरूपणं । एतद्विमर्षणञ्च । कार्य्यविशेषमौनताविधानं । ब्रह्मप्राजाप-दितीर्थनिरूपणं । व्रतस्थस्य कदाचित् प्राणरक्षार्थं जलपानादिविधिकीर्त्तनं । उपवासनियमकथनं । कुशनिरूपणादिकं । पवित्रादिलक्षणं । परिमाणनिरू-पणादिकं । सप्तव्रीह्यादिकथनं । श्यामाकादिचतुर्द्दशविधग्राम्यारण्यौषधिकथनं । अष्टादशधान्यकथनं । गन्धादिनिरूपणं । सर्व्वगन्धपारिभाषिकलक्षणं । घ-निरूपणं । मुख्यालाभे प्रतिनिधिविधानं । हविष्यद्रव्यनिरूपणं । स्थालीप-विधिकीर्त्तनं । होमद्रव्यनिरूपणं । होमविधानं । चतुर्व्विधमासनिरूपणानन्तरं कर्म्मविशेषे तन्नियमनं । तत्र मलमासविचारादिकं । सङ्क्रान्तिनिरूपणं । त-विहितकर्म्मविवेचनञ्च । ग्रहणनिर्णयः । ग्रहणस्नानविधानं । तिथिद्वैधे व्य-स्थानिरूपणं । एकादश्युपवासनिरूपणं । पौर्णमासीनिरूपणं । दुमावास्यानिरूप-

[illegible] । अमावस्यानिरूपणं । सर्व्वत्र व्रतेषु इतिकर्त्तव्यतानिरूपणं । [illegible] । भावाभावविषयभेदाद् व्रतस्य द्वैविध्यनिरूपणं । सामान्यव्रतकी-[illegible] । [illegible]मांसादिभोजनादिनियमकथनं । माघस्नानादिविधिः । दानविधिः । [illegible] दानलक्षणादिविवेचनं । विड़ालव्रत-वकव्रतादिलक्षणं । गोदानविधाना-दिकञ्च ।

No. 1849. सङ्ख्यापरिमाणनिबन्धः ।

Substance, country-made paper, 10 × 4 inches. Folia, 53. Lines, 7 on a page. Extent, [illegible]008 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magrauni Post Madhubani, Darbháñgá. Paṇḍit Kánáilála Jhá. Appearance, old. Prose and verse. Correct.

Saṅkhyá-parimáṇa-nibandha. An essay on 'number and weight' with reference to Smṛiti rites and domestic rules and observances. Every injunction in the Smṛitis involving a question of weight, or number, or dimension, or time is taken up and discussed with a view to a settlement of the purport of the injunction. The size of the tooth-brush, the number of days a cow should not be milked, how many days she should be milked partially and when fully, the length and the number of threads meet for a Brahmanical cord, the quantity in which particular offerings are to be made, the number of days for mourning for particular castes, weights, their standard and calculation, periods of time, and how to calculate them, &c., &c., are taken up seriatim and specific rules laid down to prevent misunderstanding and mistakes. By Kes'ava Kavindra. The work was compiled in the city of Benares.

Beginning. [illegible]निपयोधरभूधरधाराधरः कृष्णः ।
[illegible]वल्लीकोमलकमलवनीषट्पदः पायात् ॥
[illegible]गणकिरीटनिष्पतत्पारिजातमकरन्दतुन्दिलौ ।
[illegible]रितमस्तकल्मषौ ढुण्ढिराजचरणौ स्तुवीमहि ॥
[illegible] विश्वेश्वरो दण्डपाणिः श्रीकालभैरवः ।
[illegible] भवानी विघ्नेशः प्रयच्छन्तु समीहितम् ॥
[illegible]भुक्तिमहीपालपरिषण्मुख्यसूरिणा ।
[illegible]शवकवीन्द्रेण निबन्धोऽयं विधीयते ॥

सङ्ख्यामानगुरुत्वादेर्विधायकनिषेधकौ ।
श्रुतिस्मृतिपुराणादिवाक्यैः स्पष्टीकरोम्यहम् ॥
तत्रादौ मूलपरिभाषा । तत्र सङ्ख्यायां तावद् यजुर्व्वेदे । इत्यादि ।

End. उशनाः । द्वौ मासौ पाययेद्वत्सं तृतीये द्विगुणं दुहेत् ।
चतुर्थे त्रिस्तनं दुह्याद् यथान्यायं यथाबलम् ॥

Colophon. इति सन्मिश्रश्रीकेशवविरचितः सङ्ख्यापरिमाणनिबन्धः समाप्तः ॥

विषयः । तत्रादौ मूलपरिभाषायां सङ्ख्यानामकीर्त्तनं । हस्तादिपरिमाणनिरूपणं । कालपरिमाणकथनं । अन्नादिपरिमाणकथनं । तत्र द्रोणाढकादीनां लक्षणं । गुरुत्वनिरूपणं । तत्र त्रसरेण्वादिलक्षणं । अथ शास्त्रे सङ्ख्यापरिमाणयोः विषयप्रदर्शनप्रसङ्गेन 'एका लिङ्गे गुदे तिस्रः' तथा दन्तकाष्ठमधिकृत्य 'द्वादशाङ्गुलन्तु विप्राणाम्' इत्यादिभिः मूत्रपुरीषोत्सर्गशौचदन्तकाष्ठविचारादिकं । पञ्चपिण्डोद्धारपूर्व्वकं स्नानविधानं । तर्पणविचारः । सन्ध्यावन्दनकालविचारः । सन्ध्यावन्दनयोग्यदेशनिरूपणं । प्राणायामविवेचनं । गायत्रीजपव्यवस्थाकथनं । जपमालानिरूपणं । यज्ञोपवीतविवेचनं । शिखाबन्धनविधिकथनं । कुशनिरूपणं । कुशप्रतिनिधिकथनं । गृहे स्थापनयोग्यप्रतिमालक्षणं । तन्निर्म्माणप्रक्रियादिकथनञ्च । देवतास्नाने घृतादिपरिमाणकथनं । गन्धादिनिरूपणं । पुष्पादिविधानञ्च । पञ्चयज्ञनिरूपणं । आतिथ्यविध्यादिकथनं । पञ्चार्द्रलक्षणं । पक्षिजातिषु तित्तिरिमयूरादिषट्कस्य भोज्यत्वकथनं । मत्स्येषु रोहितपाठीनादीनां षण्णां भक्ष्यत्वकथनं । शशकादिपञ्चकस्य भक्ष्यत्वकथनं । पलाण्डुलसुनादीनामभोज्यत्वनिरूपणं ॥ पत्न्या सार्द्धं भोजने दोषकथनं । अप्रजायां कन्यायां जामातृगृहे भोजननिषेधः । दानविधिकीर्त्तनं । प्रतिग्रहविधिः । व्यतिपातगजच्छायादिषु दानमाहात्म्यकीर्त्तनं । मन्वन्तरानिरूपणं । काश्यादिमहातीर्थषट्ककथनं । धान्यादिद्वादशकस्य सर्व्वतो ग्राह्यत्वकथनं । ब्रह्माण्डदानादिषोड़शमहादानविधानं । अष्टकाश्राद्धकालादिनिरूपणं । सर्व्वत्र दक्षिणाविधिकीर्त्तनं । अष्टविधनिधुवनकथनं । शवदाहविधिः । सहमरणविधिः । वृषोत्सर्गफलश्रुतिः । प्रेतश्राद्धानि । तीर्थनिरूपणं । गङ्गादिमाहात्म्यकीर्त्तनं । गङ्गायाः गर्भनिरूपणादिकं । गयायां श्राद्धदेशादिनिरूपणं । काशीप्रयागादौ कर्त्तव्यानि । जगन्नाथक्षेत्रादिनिरूपणं । अयोध्यादिमोक्षपुरीसप्तककथनं । व्रतकालनिरूपणमुखेन मासादिलक्षणकीर्त्तनं । षड्रसादिकथनं । षट्तिलयुक्तकथनं । षोड़शसंस्कारकथनं । विवाहे वरकन्ययोः वयआदिनिरूपणं । ब्राह्मणानां षट्कर्म्मादिनिरूपणं । चतुर्द्दशविधनरककीर्त्तनं । क्रयविक्रयविधिकीर्त्तनं । प्रायश्चित्तविधिः । स्पर्शदोषाभावविषयनिरूपणं । आततायिनिरूपणं । अकृतप्रणामं शूद्रमुद्दिश्य आ-

शीर्व्वादकरणे दोषकथनं। कन्यादिविक्रये दोषाधिक्यकथनं। भस्मस्नानादिदश-विधस्नानकथनं। पञ्चगव्यपञ्चरत्नादिकथनं। केषाञ्चिद् द्रव्याणां मूल्यनिरूपणं। पुष्करिण्यादिखनने पुण्याधिक्यकथनं। निधिलाभे विधानकथनं। व्रीह्यादिगण-कथनं। व्यवहारनिरूपणं। होमद्रव्यप्रमाणादिकथनं। पूर्णपात्रनिरूपणं। अष्टौ वसवः। चतुर्दशविद्याकथनं। सप्तर्षि-सप्तार्णवादिकथनं। देवानां त्रयस्त्रिंशत्कोटि-सङ्ख्यकत्वकथनं। दशविधधर्म्मकथनं। नवविधविषकथनं। राज्याङ्गानि। सन्यास-कृत्यनिरूपणं। प्रतिनिधिविवेचनं। अन्नादीनामस्पृश्यस्पर्शने दुष्टत्वकथनं। गोदोह-नकालनिरूपणञ्च।

No. 1850. दत्तात्रेयतन्त्रं।

Substance, country-made paper, 10 × 4½ inches. Folia, 37. Lines, 7 on a page. Extent, 644 s'lokas. Character, Nágara. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháñgá. Paṇdit Kánáilála Jhá. Appearance, old. Prose and verse. Correct.

Dattátreya Tantra. A Tantra related by S'iva to a sage named Dattátreya, to instruct him in mystic, magic and demoniac rites. Contents: incantations and necromantic rites for bringing on the death of an enemy. Ditto for bringing on dementation. Ditto for bringing on inertness in intelligence, arms, affection, men, clouds, winds, &c. Ditto for bringing on enmity between particular individuals. Ditto for bringing on the ruin of a person. Ditto for securing the good-will and favour of a king, a husband or a woman. Ditto for attracting attention. Ditto for effecting magical exhibitions. Ditto for bringing demons under one's controul. Ditto for alchemical preparations. Ditto for ascertaining the past and the future. Ditto for eating and digesting enormous quantities of food. Ditto for overcoming hunger and thirst. Ditto for producing aphrodisiac effects. Ditto for changing the colour of grey hair. Ditto for bringing on grey hair or baldness. Ditto for finding out hidden treasures. Ditto for bringing on pregnancy. Ditto for preventing abortion, miscarriage and childlessness. Ditto for bringing on success in warfare. Ditto for aphrodisiac medicines. Ditto for alchemical solutions of metals. Ditto for the destruction of manliness. Ditto for overcoming malevolent imps. Ditto for overcoming evils likely to result from ferocious animals. Ditto for preventing mischief from evil dreams and portents.

Beginning. श्रीदत्तात्रेय उवाच । कदाचित् पर्य्यटन् योगी दत्तात्रेयो महामुनिः ।
कैलासगिरिमूर्द्धन्यां गतवान् योगराट् प्रभुः ॥
कैलासशिखरासीनं देवदेवं महेश्वरम् ।
दत्तात्रेयो महायोगी पर्य्यपृच्छत शङ्करम् ॥
कृताञ्जलिपुटो भूत्वा पृच्छति भक्तवत्सलम् ।
भक्तानाञ्च हितार्थाय कल्पतन्त्रं सुनिश्चितम् ॥
कलौ सिद्धिमहाकल्पतन्त्रविद्याविधानकम् । इत्यादि ।

End. रविवारे गृहीत्वा तु श्वेतकरवीरमूलकम् ।
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं न हि ॥

Colophon. इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे सिंहादिभयनिवारणं नाम द्वाविंशः पटलः समाप्तः ।

विषयः । मारणोपायकथनं । तत्र द्रव्यादिनिरूपणं । एवं परत्र ज्ञेयं । मोहनोपायकथनं । स्तम्भनोपायकथनं । तत्र चासनस्तम्भनं । बुद्धिस्तम्भनं । शस्त्रस्तम्भनं । सेनास्तम्भनं । ज्वरस्तम्भनं । मेघस्तम्भनं । गर्भस्तम्भनं । विद्वेषणोपायकथनं । उच्चाटनोपायकीर्त्तनं । वशीकरणोपायकीर्त्तनं । तत्र स्त्रीवशीकरणं । पतिवशीकरणं । राजवशीकरणं । आकर्षणोपायकीर्त्तनं । इन्द्रजालकौतुकप्रदर्शनोपायकथनं । यक्षादिमन्त्रसाधनकथनं । रसायनविधिकथनं । कालज्ञानोपायकथनं । प्रभूताहारकरणोपायकथनं । क्षुधापिपासाजयोपायकथनं । वाजीकरणादिकथनं । केशरञ्जनोपायकथनं । केशपातनविधिकथनं । निधिदर्शनोपायकीर्त्तनं । गर्भाधानविधिकथनं । मृतवत्साकाकबन्ध्यादिदोषशान्त्युपायकथनं । जयवादकथनं । वाजीकरणोपायकथनं । द्रावणविधिकथनं । वीर्य्यस्तम्भनं । भूतग्रहनिवारणोपायकथनं । सिंहव्याघ्रादिभयनाशनं । सर्पाग्निभयनिवारणोपायकीर्त्तनञ्च ।

No. 1851. हरिहरसुभाषितम् ।

Substance, country-made paper, 8 × 3 inches. Folia, 40. Lines, 6 on a page. Extent, 629 s'lokas. Character, Maithilí. Date, Sk. 1641. Place of deposit, Chaturí Gráma, Darbháñgá, Paṇḍit Mañgaládatta Mis'ra. Appearance, old. Verse. Correct.

Harihara-subháshita. Short poems on various subjects. By Harihara. The poems are of high merit.

Beginning. पायाज्जाया पयोजातजन्मनो मन्मनोमुदम् ।
सारदा पारदासारतुल्यधावल्यधारिणी ॥

गोविन्दाख्यानपीयूषस्रवैरिव सितीकृताम् ।
व्यासादिवदनाम्भोजभ्रमरीं भारतीं भजे ॥
गौरीगिरिशयोरेकमङ्गालङ्कारकारिणम् ।
मदवारि+रोद्गारमयं वस्तु वयं स्तुमः ॥ इत्यादि ।

End. तत्तन्नवीनगुणगुम्फनिषक्तसूक्ति-मुक्तावली हरिहरेण चिरेण चीर्णा ॥

Colophon. इति श्रीहरिहरसुभाषिते परमार्थप्रकरणम् ।

विषयः । मङ्गलाचरणप्रकरणं । बालविनयप्रकरणं । सुहृदुपदेशप्रकरणं । प्रवासप्रकरणं । राजप्रशस्तिप्रकरणं । राजोपसेवनप्रकरणं । राजनीतिप्रकरणं । समयवर्णन-प्रकरणं । शृङ्गाररसप्रकरणं । नायकनायिकाप्रभेदवर्णनप्रकरणं । प्रकीर्णक-प्रकरणं । परमार्थप्रकरणं । प्रबन्धेऽस्मिन् सर्व्वत्र श्लोकाः अतीव रमणीयाः ।

No. 1852. श्राद्धचिन्तामणिभावदीपिका ।

Substance, country-made paper, 8 × 3 inches. Folia, 82. Lines, 10 on a page. Extent, 3,158 s'lokas. Character, Maithilí. Date, ? Place of deposit, Chaturí Gráma, Darbháñgá, Paṇḍit Mañgaládatta Mis'ra. Appearance, old. Prose. Correct.

S'ráddha-chintámaṇi-bháva-dípiká. A commentary on Váchaspati Mis'ra's treatise on the S'ráddhas, called *S'ráddha-chintámaṇi.*

Beginning. वाग्देवतां प्रणम्यादौ वामदेवेन धीमता ।
श्राद्धचिन्तामणेर्भावो बालबोधाय तन्यते ॥
पितृदेवताकः पित्रुद्देशकः, द्रव्यपदं स्वरूपकीर्त्तनम् । इत्यादि ।

End. धीरा मदीयां कृतिमाकलय्य विधूतसन्देह+++कारम् ।
निष्कण्टकेनात्र विभावितेन पथा पितॄणां प्रियमाचरन्तु ॥

Colophon. इति महामहोपाध्यायश्रीवामदेवविरचिता श्राद्धचिन्तामणिभावदीपिका समाप्ता।

विषयः । वाचस्पतिमिश्रकृतश्राद्धचिन्तामणेर्व्याख्यानम् ।

No. 1853. द्वैतनिर्णयजीर्णोद्धारः ।

Substance, country-made paper, 10 × 4 inches. Folia, 121. Lines, 7 on a page. Extent, 3,176 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháñgá, Paṇḍit, Kánáilála Jhá. Appearance, fresh. Prose. Correct.

Dvaita-nirṇaya-jirṇoddhára. A commentary on Váchaspati Mis'-ra's Dvaitanirṇaya, on the dualistic theory of the Supreme and the human souls. By Madhusúdana Ṭhakkura.

Beginning. चलानप्यचलीकुर्व्वन्नचलानपि चालयन्।
वृन्दावनविहारी स्तात् तापहारी हरिर्मम ॥
इतिपदस्वरसेनेति। शब्दानामौत्सर्गिकार्थपरत्वमित्यादिपदसमभिव्याहारेण—
इदि।

End. लिखनात् न हृष्टिदिनं निषिद्धमिति गम्यते।

Colophon. इति महामहोपाध्यायश्रीमधुसूदनठकुरकृतो द्वैतनिर्णयजीर्णोद्धारः समाप्तः।

विषयः। वाचस्पतिमिश्रकृतद्वैतनिर्णयस्य व्याख्यानम्।

No. 1854. त्रिलक्षणीभावप्रकाशः।

Substance, country-made paper, 8 × 4 inches. Folia, 37. Lines, 10 on a page. Extent, 1,017 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháṅgá, Paṇḍit Kánáilála Jhá. Appearance, fresh. Prose. Correct.

Trilakshaṇí-bháshya-prakás'a. A commentary on the aphorisms of Sáṇḍilya. The commentator adopts the dualistic theory for his stand-ground.

Beginning. नित्यानुपूर्व्वीदेहाय शुद्धसत्त्वैकमूर्त्तये।
नमोऽस्तु हरये नित्यमचिन्त्यगतये नमः॥
नित्यं सन्निहितं यत्र ब्रह्म सचित्सुखात्मकम्।
तद्भेदनिदानाय तस्मै रागाय ते नमः॥
पाण्डित्यपरिपाकेन शाण्डिल्येन विनिर्म्मिता।
विविच्यते भक्तिपरा शतसूत्री त्रिलक्षणा॥
श्रोतृनवधापयितुं प्रतिजानीते अथातो भक्तिजिज्ञासा। इत्यादि।

End. अर्थापत्तेर्विजातीयत्वेऽपि तर्कोपासनादेरिव न ज्ञानात्मकवृत्तित्वमित्याशयः।

Colophon. इति तृतीयस्य द्वितीयमाह्निकम्। इति तृतीयं लक्षणं समाप्तम्। समाप्ता त्रिलक्षणीमीमांसा। इति त्रिलक्षणीभावप्रकाशः समाप्तः।

विषयः। परात्मजीवात्मनोरभेदमङ्गीकृत्य शाण्डिल्यशतसूत्रीयस्य व्याख्यानम्।

No. 1855. चण्डीसपर्य्याक्रमकल्पवल्ली ।

Substance, country-made paper, 11 × 3 inches. Folia, 75. Lines, 10 on a page. Extent, 1,546 s'lokas. Character, Maithilí. Date, ? Place of deposit, the Library of the Rájá of Darbhângá. Appearance, decayed. Prose and verse. Correct.

Chaṇḍí-saparyá-krama-kalpavallí. A digest of the rituals of the Tantras on the adoration of the Deví in her different forms. By S'rí-nivása Des'ikendra.

Beginning. वन्दे सिन्धुरराजबन्धुरमुखं बन्धूकपुष्पप्रभं
सिन्दूरारुणकुम्भयुग्मविलसच्चन्द्रार्द्धयुक्शेखरम् ।
गण्डद्वन्द्वगलन्मदद्रवमिलन्मौलीन्दुद्वन्द्वं शनैः
कर्णाभ्यां विनिवारयन्तमनिशं प्रत्यूहविच्छित्तये ॥
श्रीदेशिकेन्द्रं शिरसा प्रणम्य श्रीश्रीनिवासो द्रविड़ोद्भवोऽहम् ।
श्रीमत्सपर्य्याक्रमकल्पवल्ल्याः श्रीचण्डिकाया यजनं प्रवक्ष्ये ॥
सर्व्वागमाम्नायरहस्यभूतं सर्व्वेप्सितार्थप्रदमाशु लोके ।
स्कन्दाय यड्डामरतन्त्रसारे प्रोक्तं पुरा पृष्टवते शिवेन ॥
— — — — — — — — ।
तत्र श्रीमार्कण्डेयपुराणे खिले मेधसं प्रति सुरथवाक्यम् । इत्यादि ।

End. श्रीश्रीनिवासेन विनिर्म्मितायां श्रीमत्सपर्य्याक्रमकल्पवल्ल्याम् ॥
गतः किलायं स्तवकस्तु पञ्चमः सुव + + + + टसैारभाढ्यः ॥

Colophon. इति श्रीश्रीनिवासभट्टविरचितायां चण्डीसपर्य्याक्रमकल्पवल्ल्यां पञ्चमस्तवकः ।
समाप्तश्चायं ग्रन्थः ।

विषयः । नवाक्षरमन्त्रनिरूपणमुखेन देव्या माहात्म्यादिकथनं । देवीमाहात्म्यस्य मार्कण्डेयपुराणान्तर्गतत्वेऽपि खिलत्वमिति निरूपणं । एवमध्यायसप्तकमपि देवीमाहात्म्य महामालामन्त्रोपासनायां विनियुक्तमिति निरूपणं । कार्य्यविशेषे वषट्कारादियुक्तस्य एतन्मन्त्रस्य पुष्ट्यादिसाधकत्वनिरूपणं । चण्डीसपर्य्यायां स्नानतर्पणादिविधिकीर्त्तनं । अर्चनाविधिकथनं । तत्र आसनादिनिरूपणं । विविधन्यासकथनादिकं । पीठपूजाविधिः । देवीमाहात्मीयप्रथमादिचरितस्य ऋषिच्छन्दश्चादिनिरूपणं । चण्डीसपर्य्याप्रयोगकीर्त्तनं । मानसपूजाविधिकथनं । तत्प्रक्रियाकीर्त्तनञ्च । नैमित्तिकार्चनविधिः । दमनकपूजाविधिः । मदनवस-

न्मयोः पूजाविधिकथनं। पवित्रारोपणविधिः। काम्यपूजाविधिकथनं। ध्यानभेदे फलभेदकथनं। नित्यचण्डिकाध्यानकथनादिकं। नवदुर्गाविधिकथनं। आश्विने नवदुर्गामहोत्सवादिविधानं। शतचण्डीविधिकथनं। अनावृष्ट्याद्यखिलदुरितशान्त्युपायकथनं। मण्डपरचनार्थं प्राचीसाधनविधिकथनं। कुण्डनिर्म्माणविधिकथनं। अग्निस्थापनादिविधिकथनं। अत्र सर्व्वत्र प्रयोगकथनं। कुमारीपूजाविधिः। पूज्यापूज्यकुमारीलक्षणकथनं। स्रुक्स्रुवादिनिर्म्माणप्रक्रियादिकीर्त्तनञ्च।

No. 1856. श्राद्धप्रदीपः।

Substance, country-made paper, 13 × 4 inches. Folia, 74. Lines, 9 on a page. Extent, 2,646 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magrání, Post Madhubaní, Darbháñgá, Paṇḍit Kánáilála Jhá. Appearance, fresh. Prose and verse. Correct.

S'ráddha-pradípa. A digest of the rules for performing S'ráddhas. By Vardhamána Mis'ra.

Beginning. अभिनवरसवेणिः पादपद्मे मुरारे-
मदनमथनमौलेर्मालतीपुष्पमाला।
जयति जयपताका काप्यसौ मोक्षलक्ष्म्याः।
कलिकलुषनिहन्त्री जाह्नवी नः पुनातु॥
हरिं प्रणम्य सर्व्वज्ञं नीलोत्पलदलत्विषम्।
आलोच्य मुनिवाक्यानि श्राद्धस्य विधिरुच्यते॥
ननु किं श्राद्धं तावत्, पितृदेवताको द्रव्यत्यागः। पिण्डपितृयज्ञे तर्पणे अतिव्याप्तेः, न च ब्राह्मणभोजनपर्य्यन्तत्वेन स एव विशेष्यः, शूद्रकर्त्तृकश्राद्धाव्याप्तेः। इत्यादि।

End. तत्पुत्राद्यभावे सतीति मन्तव्यम्।
स्मृतीः पुराणानि च शास्त्रजातं ज्ञात्वा विचार्य्यापि च शास्त्रयुक्त्या।
श्रीवर्द्धमानेन कृतः प्रदीपः स्वान्ते सतां शर्म्म सनातनोतु॥

Colophon. इति महामहोपाध्यायश्रीवर्द्धमानविरचितः श्राद्धप्रदीपः समाप्तः। शुभमस्तु।

विषयः। अन्याभिमतश्राद्धलक्षणाक्षेपपूर्व्वकं 'वेदबोधितपात्रालम्भनपूर्व्वको द्रव्यत्यागः श्राद्धमिति श्राद्धलक्षणविवेचनं। द्वादशविधश्राद्धभेदनिरूपणं। श्राद्धकालनिरूपणं।

साग्निनिरग्निभेदात् व्यवस्थादिनिरूपणं। काम्यश्राद्धकालनिरूपणं। रात्रौ श्राद्धकरणादिनिषेधः। मलमासविवेचनं। श्राद्धदेशनिरूपणं श्राद्धाधिकारिनिरूपणं। श्राद्धे प्रशस्तब्राह्मणनिरूपणं। निषिद्धकथनञ्च। श्राद्धविहितद्रव्याणि। निषिद्धद्रव्याणि च। कुशविवेचनं। निमन्त्रणविधिः। अर्घ्यदाने पात्रविशेषनिरूपणं। गन्धादिपञ्चकनिरूपणं। गौड़ीयप्रयोगाद् विशेषकथनं। परिवेषणविधिकथनं। तत्र काम्यद्रव्यदानविधिकीर्त्तनञ्च। जपविधिः। श्राद्धपरिभाषाकथनं। पार्व्वणश्राद्धप्रयोगकथनं। आमश्राद्धविधिः। एकोद्दिष्टविधानं। सपिण्डीकरणकालादिनिरूपणं। श्राद्धभोजननिषेधविवेचनं। पुत्रमात्रस्य धनहरत्वात् श्राद्धेऽधिकारः कर्त्तव्यञ्च इति निरूपणं। एकोद्दिष्टश्राद्धप्रयोगकथनं। आभ्युदयिकश्राद्धप्रयोगकथनं। विशेषतः श्रद्धाधिकारिनिरूपणञ्च।

No. 1857. आचारचिन्तामणिः।

Substance, country-made paper, 10 × 3½ inches. Folia, 121. Lines, 10 on a page. Extent, 4,128 s'lokas. Character, Maithilí. Date, A. D. 1437. Place of deposit, Mujná Gráma, Post Tájapura, Darbháñgá, Paṇḍit Bábulála Páṭhaka; two other copies, Post Madhubaṇi, Magráṇi Gráma, Zilá Darbháñgá, Paṇḍits Kánáilála Jhá and Chhoṭilála Jhá. Appearance, new. Prose and verse. Correct.

Áchára-chintámaṇi. A digest of the rules regarding Áchára. By Váchaspati Mis'ra Mahámahopádhyáya. The author compiled a series of digests, under the generic name of Chintámaṇi, on the different topics treated in the Smṛitis, and also wrote commentaries on several philosophical works. The codex is dated in 433 of Lakshmaṇa Sena's era.

Beginning. आभीरदारकमुदञ्चितकिङ्किणीकसाताम्रपाणिचरणं पुरुषं पुराणम्।
मञ्जीरमञ्जुमरणाधरमम्बुजाक्षमद्वैतचिन्मयमनादिमनन्तमीड़े॥
अहोरात्राश्रितो धर्म्म इह वाजसनेयिनाम्।
निबध्यते हरिं नत्वा श्रीवाचस्पतिशर्म्मणा॥
उद्बोधमैत्रशौचानि तथाचमनकारणम्। इत्यादि।

End. यदाह आपस्तम्बः। यावत् सन्निपातश्च सहशय्या। ततो नानासन्निपातः अभिगमः। नाना भिन्नभिन्नेत्यर्थः।

Colophon. इति श्रीमन्महामहोपाध्यायसन्मिश्रश्रीवाचस्पतिविरचित आचारचिन्तामणिः

सम्पूर्णः । लक्ष्मणभूपसम्बन्धित्रयस्त्रिंशदधिकशतचतुष्टयाब्दे कार्त्तिककृष्णसप्तम्यां शुक्रे मिश्रश्रीदेवनाथमहाशयानामाज्ञया मिश्रश्रीहरिशर्म्मणा लिखितमाचारचिन्तामणिपुस्तकमिति ।

विषयः । वाजसनेयिनामाचारादिनिरूपणं । तत्र सदाचारशब्दनिर्व्वचनं । सदाचारलक्षणादिकथनञ्च । उद्बोधानन्तरविधिकथनं । मूत्रपुरीषादित्यागविधिः । पापकर्म्मफलनिवृत्त्युपायकीर्त्तनं । अशुभकर्म्मणा देहचितयप्राप्तिकथनं । तत्र आतिवाहिकभोगवाप्यनुसारिदेहानां लक्षणकथनं । किञ्च नरकानुभूतदुःखानां तिर्य्यग्योनित्वमनुभूय उत्तीर्णानां मनुष्यत्वेऽपि केषाञ्चित् पापानां लक्षणानि जायन्त इति तन्निरूपणं । मार्गादौ मूत्रोच्चारादिनिषेधकथनं । विशेषेण शौचविधिकथनं । मृत्तिकाग्रहणस्थानादिनिरूपणं । कमण्डलुनिर्म्माणतन्मार्ज्जनादिविधिकथनं । विस्तरेण आचमनविधिकथनं । स्त्रीशूद्रयोराचमनविधिः । इन्द्रियमार्ज्जनविधिः । आचमननिमित्तनिरूपणं । द्विराचमननिमित्तनिरूपणञ्च । दन्तधावनविधिः । दन्तकाष्ठनिरूपणं । तदभावे मुखशुद्धिकथनं । प्रातःस्नानादिविधिकीर्त्तनं । स्नानानन्तरं केशप्रसाधनादर्शाञ्जनादिविधानकथनं । मङ्गलाचारलक्षणतद्विधानादिकथनं । वैधनैमित्तिकादिस्नानविधिः । स्नानयोग्यस्थाननिरूपणं । भस्मादिस्नानविधिः । सामान्यतः स्नानप्रक्रियाकथनं । सर्व्वशाखिकसर्व्ववर्णसाधारणस्नानविधिः । स्नानोत्तरकर्म्मविधानं । तिलककरणविधिः । सन्ध्योपासनविधिकीर्त्तनं । तत्प्रयोगकथनादिकं । गायत्रीजपादिविधिः । जपमालानिरूपणं । ब्रह्मयज्ञविधिः । विशेषेण तर्पणविधिकथनं । कातीयतर्पणप्रयोगकथनं । एवं वसिष्ठगोभिलाद्युक्ततर्पणविधिकथनं । तर्पणोत्तरकर्म्मकथनं । तत्र सामान्यतः पूजाप्रकारकथनं । देवपूजाविधिः । पूजाधारनिरूपणं । अर्घ्यदाने विशेषविधिकथनं । पञ्चोपचारविधिकथनं । एवं दश-षोड़शअष्टादश-षट्त्रिंशोपचारविधानकथनं । सूर्य्यपूजाविधिः । अत्र पुष्पविवेचनं । धूपनैवेद्यादिनिरूपणञ्च । दुर्गापूजाविधिः । अत्र पुष्पविवेचनं । शिवपूजाविधिः । अत्र पुष्पाणि । धूपादिविधानञ्च । विष्णुपूजाविधिः । शालग्रामादिपूजायां पुष्पादिविधानं । विष्णुनैवेद्यार्थं मांसादिकमपि दातुमर्हतीति निरूपणं । अष्टाक्षरपूजाविधिः । विष्णोरपराधनिरूपणं । पञ्चमहायज्ञविधिः । एतत्प्रयोगकथनञ्च । तत्र मनुष्ययज्ञविधिः । नित्यश्राद्धविधिः । अतिथिपूजाविधिः । सामान्यतः भोजनविधिः । विशेषेण भोज्याभोज्यनिरूपणं । तत्र शस्येषु भोज्यानि । दुग्धानि । पक्षिणः । पशवः । मत्स्याश्च । मांसभक्षणवर्ज्जनयोः विधिविवेचनं । भोजनोत्तरकर्म्मविधानं । शयनविधिः । दारोपगमविधिः । रजस्वलानिरूपणं । तस्या नियमादिकथनञ्च ।

No. 1858. सिद्धान्तसार्व्वभौमः ।

Substance, country-made paper, 13 × 4 inches. Folia, 48. Lines, 12—13 on a page. Extent, 1,966 s'lokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Madhubaṇi, Darbháṅgá. Paṇḍit S'rínátha Jhá. Appearance, new. Verse. Generally correct.

Siddhánta-sárvabhauma. A digest of the several Síddhántas on Indian astronomy. By Munis'vara Sárvabhauma, son of Raṅganátha. Contents: Measurement of true solar year &c.; duration of Yugas; motions of planets; measures of months and years and the mode of reckoning them; nodes of planetary orbits; measures of bulk; diameter and motions of the earth; equatorial regions; calculation of latitudes and longitudes; calculation of the apparent motion of planets; zenith and nadir; curved motions of planets; nodes; position of the earth; the orbits of the planets; arcs between the vernal equinoctial point and the equator, &c., &c.

Beginning. विश्वं व्याप्य स्थितो यः सकलसुरनरैर्वन्दितः श्रीनिवास-
स्तेजोमूर्त्तिः कृपालुर्मुनिवरनिकरैर्ज्ञानदृष्ट्यैव गम्यः ।
ध्वान्तं हत्वा स बोधं सुखकरममितं सच्चिदानन्दरूपः
स्वान्ते तद्भक्तियुक्ते व्यपगतदुरिते सर्व्वदा मे व्यनक्तु ॥
ब्रह्माद्या विबुधगणाः स्वकार्य्यसिद्ध्यै यं विघ्नद्रुमदलनोद्धुरं प्रणम्य ।
नीयन्ते सपदि कृताखिलार्थसं+तं दन्तावलिवदनं नमामि नित्यम् ॥
यस्याः प्रसादमासाद्य काव्यं लक्षणलक्षितम् ।
कुर्व्वन्त्यपि जड़ाः सा मे मुखाब्जेऽस्तु सरस्वती ॥
मन्दोऽप्यहं यच्चरणाब्जसेवा—संप्राप्तबोधांशवशात् सुधीभिः ।
सिद्धान्ततत्त्वाधिगमैः स्वपक्ष—कृचौ कृतस्ते गुरवो जयन्ति ॥
गूढं स्थूलं स्वसिद्धान्तं मत्वा यस्तच्छिरोमणिम् ।
कृतवान् मनुजव्याजादसौ जयति भास्करः ॥
दैवज्ञवर्य्यगणसन्ततसेव्यपार्श्वः श्रीरङ्गनाथतनयोऽथ मुनीश्वरोऽहम् ।
ग्रन्थान् विभाव्य सकलानपि सार्व्वभौमसिद्धान्तपूर्व्वमपरं स्वधिया करोमि ॥ इत्यादि।

End. इतिसिद्धान्ततत्त्वार्थे मुनीश्वरकृतेऽभवत् ।
सिद्धान्तसार्व्वभौमोऽयं क्रान्तिसाम्याधिकारकः ॥
अयं जगत्यां ग्रहतत्परीक्षाशृङ्गोन्नति+भगयोगभेदात् ।
बलातिरेकात् परपातकर्त्ता श्रीसार्व्वभौमः सुतरां विभाति ॥

Colophon. इति पूर्व्वार्द्धम्।

विषयः। कालमानकथनं। सौरवर्षादिनिरूपणं। युगपादादिनिरूपणं। ग्रहाणां चलोन्नतनिरूपणं। मासादिनिरूपणं। अत्र सर्व्वत्र उपपत्तिकथनं। वर्षकालनिरूपणादिकं। वर्षगणनप्रकारादिकथनं। ग्रहाणां पातानयनप्रकारकथनं। परमाण्वादिपरिमाणकथनं। भूगोलस्य व्यासाद्यानयनप्रकारकथनं। निरक्षदेशादिनिरूपणं। ज्यानयनप्रकारादिकथनमुखेन भुजशिञ्जिनीकोटिशिञ्जिनीप्रभृतीनां लक्षणकथनं। ग्रहाणां स्फुटक्रियोपपत्तिकथनं। प्रतिवृत्तभङ्गीनिरूपणं। नीचोच्चवृत्तभङ्गीकथनं। ग्रहाणां वक्रगत्यादिनिरूपणं। खेटाद्यानयनप्रक्रियाकथनं। भूगोलसंस्थानादिकथनं। विषुवन्मण्डलक्रान्तिवृत्तादिनिरूपणं। अयनांशनिरूपणं। अत्र यवनादीनां मतकथनञ्च। उदयांशनिरूपणं। अत्र सर्व्वत्रोपपत्तिकथनञ्च। त्रिप्रश्नाधिकारः। तत्र ग्रहाणां कलाविम्बाद्यानयनप्रक्रियाकथनं। भौमपूर्व्वकाणांषण्णां ग्रहाणां भानिमित्तकथनादिकं। तेषां भानयनप्रक्रियादिकथनञ्च। खेटभागमप्रकारकथनञ्च। शृङ्गोन्नतिनिरूपणं। तत्र सूर्य्यसमीपे ग्रहाणामवस्थानादिनिरूपणमुखेन उच्चनीचदूरत्वादिज्ञानसाधनकीर्त्तनं। ग्रहाणामस्तोदयज्ञानप्रकारकथनं। चन्द्रग्रहणगणनाप्रक्रियादिकथनं। पाताद्यानयनप्रकारः। स्पर्शादिज्ञानोपायकथनं। एवं सूर्य्यग्रहणगणनाप्रक्रियाकथनं। क्रान्तिसाम्यनिरूपणं। व्यस्तायनांशादिनिरूपणञ्च॥

No. 1859. विवादचन्द्रः।

Substance, country-made paper, 10 × 3 inches. Folia, 60. Lines, 8 on a page. Extent, 2,202 s'lokas. Character, Maithilí. Date, Sn. 1119. Place of deposit, Magráṇi Gráma, Post Madhubaṇi, Darbháñgá, Paṇḍit Chhoṭilála Jhá. Appearance, old. Prose and verse. Correct.

Vivádachandra. A summary of the laws of inheritance, judicature, sale, barter, &c. By Mahádeví, wife of king Chandra Siñha, under the advice of Misaru Mis'ra.—Contents: Laws regarding loans; possession, mortgage, interest, bail, repayment of debts, legal position of the born-blind, loans for trade, ditto contracted under pressing wants, pledges, sale without proprietory right, coparcenary in trade, gift, servants, manumission of slaves, hire, disputes regarding ownership, delivery after sale, purchase, boundary disputes, laws regarding bridges, treasure trove, protection of crops. Law of inheritance, division of

a deceased father's estate, disqualification to inherit, indivisible property, woman's property, lapsed inheritance, estate of childless persons, joint property. Judicature, defence, rejoinder, evidence, documentary evidence, evidence of possession, witnesses, interrogatories, ordeals, judgment, decision, execution. Twelve kinds of sons.

Beginning. वन्दे श्रीकण्ठवैकुण्ठावकुण्ठौ नतनन्दने ।
विघ्नविच्छेदकुशलौ गिरिजाजलजान्वितौ ॥
श्रीचन्द्रसिंहनृपतेर्दयिता लछिमा महादेवी ।
रचयति विवादचन्द्रं मिसरुमिश्रोपदेशेन ॥
विवादे व्यवहारे च व्यवस्था यस्य यादृशी ।
निबन्धृभिः कृता सात्र लिख्यते सूरिणां मुदे ॥
तत्रादौ ऋणादानव्यवस्था । यथा व्यवस्थया अयमृणमधमर्णो गृह्णाति तच्चिरकालं विना तथैव दद्यात् । इत्यादि ।

End. ब्राह्मणस्य क्षत्रियादिषु नौरसत्वापत्तौ परिगणनं मुख्यत्वकल्पनालाघवाय सर्व्वेषां सवर्णायां व्यवहारयोर्विरोधापत्तेरिति ।

Colophon. इति महामहोपाध्याय श्रीमिसरुमिश्रकृतो विवादचन्द्रः समाप्तः । सन् ११११ ।

विषयः । ऋणादानव्यवस्थाकथनं । भोग्याधिनिरूपणं । बन्धकनिरूपणं । वृद्धिनिषेधः । प्रतिभूनिरूपणं । ऋणादानविधिः । जातान्वस्थानव्यवस्थाकथनादिकं । वाणिज्यार्थं ऋणग्रहणे व्यवस्था । कन्याविवाहाद्यापत्कालकृतर्णव्यवस्था । न्यासनिरूपणं । अस्वामिविक्रयः । सम्भूयसमुत्थानविधिः । दत्ताप्रदानिकविधिः । भृतकविधिः । दास्यमोक्षविधिः । भाटकविधिः । स्वामिपालविवादनिरूपणं । विक्रीयासम्प्रदानविधिः । क्रीत्वानुशयविधिः । सीमाविवादनिरूपणं । सेतुविधिः । नष्टाहृतविधिः । शस्यरक्षाविधिः ॥ दायभागनिरूपणं । प्रमीतपितृकविभागः । भागानर्हविधिः । अविभज्यविधिः । स्त्रीधनविधिः । अवलुप्तविभागविधिः । अपुत्रधनविभागः । संसृष्टधनविभागः ॥ व्यवहारविधिः । तत्र उत्तरविधिः । प्रत्याकलितविधिः । सन्धिविधिः । क्रियादानविधिः । भुक्तिविधिविधिः । साक्षिविधिः । प्रश्नविधिः । दिव्यविधिः । जयपराजयावधारणविधिः । निर्णयविधिः । निर्णीतकृत्यविधिः । द्वादशविधपुत्रनिरूपणादिकञ्च ।

No. 1860. तर्कतत्त्वनिरूपणम् ।

Substance, country-made paper, 11 × 4 inches. Folia, 42. Lines, 9 on a page. Extent, 1,476 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi Gráma, Post Madhubaṇi, Darbháñgá, Paṇḍit, Chhotílála Jhá. Appearance, old. Prose. Correct.

Tarkatattva-nirúpaṇa. An enquiry into the principles of dialectics. By Gokulanátha Mahámahopádhyáya.

Beginning. कथं तर्कमनिष्कृष्य तार्किकास्त्वामुपासतां ।
अतो नाथेन हे नाथ तर्कतत्त्वं निरूप्यते ॥
अथ योऽसावश्रद्धामलापहरणद्वारा पुरुषार्थानामसाधारणं साधनं । इत्यादि ।

End. तस्मात् ।
अनाहार्य्याद् व्यापकतानिर्णयाद्यो ह्यबाधिनः ।
तर्क उत्पद्यते किन्तु पर्य्यवस्य विपर्य्ययम् ॥

Colophon. इति महामहोपाध्यायगोकुलनाथविरचितं तर्कतत्त्वनिरूपणं ।

विषयः । तर्कस्वरूपविवेचनं ।

No. 1861. न्यायकौस्तुभे शब्दपरिच्छेदः ।

Substance, country-made paper, 11 × 4 inches. Folia, 268. Lines, 9 on a page. Extent, 3,851 s'lokas. Character, Nágara. Date, Sm. 1841. Place of deposit, Magráṇi Gráma, Post Madhubaṇi, Darbháñga, Paṇḍit Chhotílála Jhá. Appearance, fresh. Prose. Correct.

Nyáya-kaustubha. A commentary on the Tattvachintámaṇi of Gañges'a. By Mahádeva Paṇḍita, surnamed Ponattákara, and son of Mukunda Paṇḍita. The codex contains the chapter treating of S'abda.

Beginning. नत्वा साम्बशिवं मुकुन्दपितरं श्रीकण्ठसंज्ञं गुरुं
भूयः सूक्ष्मधिया विभाव्य च तदुक्तार्थं समस्तं हृदि ।
शब्दे मानवरे विशिष्टविविधव्युत्पत्तिसम्पादके
गूढार्थप्रतिपत्तये वरधियां कुर्व्वे प्रबन्धं वरम् ॥
अथ शब्दो निरूप्यते। अत्र उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणान-
न्तरं शब्दनिरूपणमिति बहवो वदन्ति। इत्यादि ।

End. यथाश्रुतानां मणिगोचराणां निष्कर्षबोधाय बहूक्तियुक्तः ।
अयं महादेवबुधेन यत्नाच्छब्दोदयातो रचितो निबन्धः ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारीणश्रीमन्मुकुन्दपण्डितात्मजपुण्तताकरोपनामक-महादेवपण्डितविरचिते न्यायकौस्तुभे शब्दपरिच्छेदः समाप्तः । संवत् १८४१ ।

विषयः । शब्दचिन्तामणिव्याख्यानं ।

No. 1862. न्यायसिद्धान्तमञ्जरी ।

Substance, country-made paper, 8 × 3 inches. Folia, 53. Lines, 9—10 on a page. Extent, 1,992 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi Gráma, Post Madhubaṇi, Darbháñgá, Paṇḍit Chhoṭíláḷa Jhá. Appearance, old. Prose. Correct.

Nyáyasiddhánta-mañjarí. An elementary treatise on the Nyáya philosophy. By Jánakinátha Bhaṭṭáchárya Chúḍámaṇi. A work of this name by S'ríkṛishṇa has been noticed nnder No. 1408, Vol. IV, p. 31, and a commentary on it under No. 1452 Vol. IV, p. 56.

Beginning. प्रणम्य परमात्मानं जानकीनाथशर्म्मणा ।
क्रियते युक्तिमुक्ताभिर्न्यायसिद्धान्तमञ्जरी ॥
इह किल निखिललोकदिमोचमुख्योपायमात्मनस्तत्त्वज्ञानमामनन्ति । तच्च प्रमाणाधीनं । प्रमाणं निरूप्यते । इत्यादि ।

End. तत्रैव किं मानमिति चेत् । तत् प्रकारिकाप्रक+ + + + इति संक्षेपः ।

Colophon. इति श्रीजानकीनाथभट्टाचार्य्यचूड़ामणिकृता न्यायसिद्धान्तमञ्जरी समाप्ता ।

विषयः । प्रमाणस्वरूपनिरूपणं । करणत्वनिरूपणं । प्रत्यक्षलक्षणं । वैशिष्ट्यानवगाहिज्ञानं (साक्षात्कारः) इतिकथयतो नास्तिकस्य मतखण्डनं । नित्यानित्यभेदाद्द्विविधसाक्षात्कारनिरूपणं । निर्व्विकल्पकसविकल्पकभेदेन अनित्यस्य द्वैविध्यकथनपूर्व्वकं तयोः स्वरूपविवेचनं । वैशिष्ट्यज्ञाननिरूपणं । प्रकारताविशेष्यतादिस्वरूपनिरूपणं । ज्ञातो घट इति प्रतीतेः ज्ञानजन्यो विषयनिष्ठः प्राकट्यापरनामा पदार्थो-ज्ञातता सैव विषयता—इत्यादिभाट्टमतखण्डनं । भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वमितिवादखण्डनं । द्रव्यग्रहप्रक्रियानिरूपणं । उद्भूतत्वलक्षणं । द्रव्यगुणकर्म्मादीनां सामान्यलक्षणं । समवायो न प्रत्यक्ष इति वैशेषिकमतखण्डनं । सन्निकर्षनिरूपणं । द्विविधविशेषणतालक्षणविवेचनं । अभावोऽधिकरणस्वरूप इति कथयतां प्राभाकराणां मतखण्डनम् । अभावविभागतल्लक्षणं । अभावो नेन्द्रियग्राह्य-

इति भाट्टमतखण्डनं। योग्यानुपलब्धिस्वरूपचिन्तनं। इन्द्रियाणां लक्षणं। आत्ममनःसंयोगविवेचनं। अनुमानलक्षणं। व्याप्तिलक्षणादिचिन्तनं। अत्र मीमांसकादिमतखण्डनं। चार्वाकमतनिरूपणं। पक्षधर्म्मतानिरूपणं। परामर्श-निरूपणं। केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकिभेदादनुमानस्य त्रैविध्यनिरूपणं। हेत्वाभासविवेचनं। उपाधिस्वरूपचिन्तनं। अवयवस्वरूपविवेचनं। उपमानलक्षणं। उपमितिस्वरूपकथनं। शब्दप्रमाणलक्षणं। शब्दस्य अनुमानेऽन्तर्भाव इति कथयतां वैशेषिकाणां मतखण्डनं। शक्तिवादः। शक्तिग्रहोपायकथनं। ईश्वरनिरूपणं। गवादिपदानां गोत्वे एव शक्तिः आक्षेपात्तु व्यक्तिलाभ इति कथयतां भाट्टानां मतखण्डनं। आक्षेपस्वरूपकथनञ्च। कार्य्यान्वितशक्तिवादखण्डनं। लक्षणाविचारः। समासवादः। व्यञ्जनावृत्तिखण्डनं। कारकवादः। आख्यातवादः। अत्र न्यायभास्करादिमतखण्डनं। आकाङ्क्षायोग्यतादिनिरूपणं। विधिस्वरूपविवेचनं। अपूर्व्ववादः। अर्थवादादिनिरूपणं। शब्दस्य नित्यत्वमभ्युपगच्छतां गुरूणां मतखण्डनं। प्रवर्त्तकज्ञानविचारः। स्फोटवादनिरसनं। अर्थापत्त्यादीनामनुमानादावन्तर्भावकथनं। प्रामाण्यवादः।

No. 1863. तर्कप्रकाशिका।

Substance, country-made paper, 10 × 4 inches. Folia, 125. Lines, 13 on a page. Extent, 4,551 s'lokas. Character, Nágara. Date, ? Place of deposit, Magráṇi Gráma, Post Madhubání, Darbháṅgá, Paṇḍit Chhoṭílála Jhá. Appearance, old. Prose. Correct.

Tarka-prakásiká. A commentary on the chapter on S'abda in the work noticed under the next preceding No. By S'ríkaṇṭha Díkshita, son of Vis'vanátha Díkshita, of Kás'í.

Beginning. जटाजुटलसद्गाङ्गजलभूषितमस्तकम्।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा॥
उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् शिष्यावधानाय प्रतिजानीते अथेति। इत्यादि।

End. इदं रजततया जानामीत्यनुव्यवसाये+पि शुक्तिगोचररजतत्वप्रकारको+वसेय इति।
अतिकर्कशतर्के यद् यदत्र स्फुरितं मम।
सिद्धेश्वरीपदद्वन्द्ववरस्यैतद्विजृम्भनम्॥

योऽसौ काश्यां समुत्पादि विश्वनाथेन धीमता ।
तस्य श्रीकण्ठकृतिनः कृतिः कलयतां मुदं ॥

Colophon. इति श्रीकाशीगर्भसम्भवदीक्षितविश्वनाथात्मजदीक्षितश्रीकण्ठशर्म्मविरचिता तर्क-प्रकाशिकाभिधा सिद्धान्तमञ्जरीव्याख्या समाप्ता ।

विषयः । जानकीनाथकृतन्यायसिद्धान्तमञ्जरीनामकन्यायप्रकरणान्तर्गतशब्दपरिच्छेदस्य व्याख्यानं ।

No. 1864. शब्दालोकरहस्यं ।

Substance, country-made paper, 10 × 4 inches. Folia, 312. Lines, 14 on a page. Extent, 16,327 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi Gráma, Post Madhubání, Darbháñgá, Paṇḍit Chhoṭílála Jhá. Another copy at Mujaná Gráma, Post Tájapurá, Dvarbháñgá, Paṇḍit Bábulála Jhá. Appearance, old. Prose. Correct.

S'abdáloka-rahasya. A commentary on the S'abdáloka of Pakshadhara Mís'ra. By Gadádhara Bhaṭṭa. The S'abdáloka is itself a commentary on the S'abda Khaṇḍa of Gañges'a's Tattvachintámaṇi.

Beginning. प्रणम्य गीर्व्वाणगणैकवन्द्यं पादारविन्दं पुरुषोत्तमस्य ।
निगूढ़भाविष्कुरुते प्रयत्नाद् गदाधरः पक्षधरस्य भावं ॥
सङ्गत्यप्रदर्शने मूलस्य न्यूनता स्यादित्यथशब्दो निरूप्यत इतिप्रतिज्ञावाक्यादेव सङ्गतिरपि लभ्यते इत्याह अथेति । इत्यादि ।

End. इत्यादिना जातेष्यादेस्तत्फलकलखण्डनमयुक्तमित्याशङ्कां निराकुरुते नत्वित्या-दिना ।

Colophon. समाप्ता चेयमपूर्व्ववादालोकरहस्यगादाधरी ।

विषयः । पक्षधरमिश्रकृतशब्दमण्यालोकस्य व्याख्यानं ।

No. 1865. सिद्धान्ततत्त्वविवेकः ।

Substance, country-made paper, 13 × 4 inches. Folia, 135. Lines, 12—13 on a page. Extent, 3,950 s'lokas. Character, Maithilí, very bad. Date, ? Place of deposit, Rághavapura, Post Madhubaní, Darbháñgá, Paṇḍit S'rínátha Jhá. Appearance, new. Prose and verse. Generally correct.

Siddhánta-tattva-viveka. A summary of the different Siddhántas, or original texts on astronomy. By Kamalákara, son of Nṛisiñha, of Devagiri on the banks of the Godávarí river. Contents: Time defined, cycles of Brahmá, Devas &c., measure of time of day and night, effect of longitude on the duration of day, durations of the Yugas, of various eras, current down to the time of the S'aka era, refutation of the opinion of the author of the Siddhánta-śiromaṇi, science of astronomy, excellence of the Súrya-siddhánta, motion of the stars in space, creation, destruction, refutation of the opinion of Bháskara A'chárya on the subject, the poles, mythical character of the signs of the Zodiac, the positions of the Nakshatras, refutation of the opinion of A'rya Bhaṭṭa regarding the motion of the earth, the blueness of the sky accounted for, (due to the quality of darkness *Tamah*), the shape of the earth (like a Kuthbela fruit,) supported in space by divine power, the opinions of the Yavanas on the subject, equatorial regions, position of the terrestrial sphere, longitudes of different places, eternity of the Meru mountain, diameter and circumference of the earth, calculation of the motions &c., of the earth, solstitial movements, drikkáṇas, coldness of the air in high p[illegible] conversion of vapours into clouds, causes of rainbows, meteorite cause of earthquakes, (action of subterranean vapours on stones), of plagues (foul vapours), orbits of planets, calculation of the [illegible] of heavenly spheres, zenith and nadir, instruments for ascertaining sankrántis, centripetal force, cause of circular motion, of spheres, apparent motion of the celestial spheres, chords of arcs, diagrams, &c., &c.

Beginning. ब्रह्माण्डोदरमध्यगावनिजलाग्न्यर्द्धेन्दुपूर्व्वग्रह-
र्क्षोर्द्धस्थप्रवहान्तगोलरचना सृष्टिर्यथावस्थिता ।
कालेऽस्मिन् गहनेऽव्ययेऽस्ति सततं यस्मादियं + + +
यत्तन्निर्गुणमीशमव्ययपरं ब्रह्मैकतत्त्वं शुभं ॥
यदुत्पत्तिलयौ सान्या सृष्टिर्यस्माच्च देहिनां ।
ब्रह्मादीनां विभुः सोऽयं व्यक्तीभूतः सनातनः ॥
ब्रह्माण्डान्तस्तमोहन्ता भगवांस्तेजसां निधिः ।
नाम्नाऽनिरुद्धः कालात्मा सूर्य्योऽयं सवितेति च ॥
मण्डलान्तरगोऽजस्रं भुवनानि परिभ्रमन् ।
जलगोलग्रहर्क्षाणां भास्करः सर्व्वगोऽव्ययः ॥
शास्त्रप्रवर्त्तको ध्येयः तत्त्वज्ञैः कालबोधकृत् ॥

त्रयीमयः सर्व्ववन्द्यो जयत्येकोऽम्बरस्थितः ।
केचित् प्रत्यक्षसूर्य्याच्च भिन्नोऽयमिति यद्बलात् ॥
वदन्ति मूढवादस्याप्रामाण्यात्तदसद्ध्रुवं ॥
यच्छास्त्रसिद्धानयनानुसारं ब्रह्मेन्दुपूर्व्वा ऋषयोऽपि चक्रुः ।
स्वं स्वञ्च सिद्धान्तमनल्पकार्थं गूढं सतां गोलविदां सुबोधं ॥
अतिचाधमपरम्परावशैः नाशितं तदपि सौरमतं तत् ।
तत्कृतेरनवबोधत एवेत्थं किं लेख्यमधुनातनवर्य्यः ॥
सद्गोलवासनावाक्यैः करणग्रन्थयुक्तितः ।
स्वस्थूलव्यवहारार्थं स्वाचार्य्यत्वप्रसिद्धये ॥
वस्तुतत्त्वमबुद्ध्वैव स्वार्षैः साकं विरोधतः ।
बहुभिर्बहुधा पूर्व्वं सिद्धान्ताः स्वधिया कृताः ॥
अतः सांवत्सराचार्य्यं गुरुं श्रीमद्दिवाकरं ।
नत्वा नृसिंहजोऽर्कस्य मतात् श्रीकमलाकरः ।
कृती तत्त्वविवेकाख्यं पूर्व्वास्पृष्टं सवासनं ॥
सिद्धान्तं गोलवित्तुष्ट्यै करोति स्वधियोत्तमं ॥
ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यं गुरोस्तथा । इत्यादि ।

End. अरुज्जीर्णमाद्योदितं प्रोज्झ्य सूक्तं नवीनन्त्विनानुग्रहाद्गोलयुक्त्या ।
मदुक्तेर्नवीनत्वसर्व्वप्रतीत्यै चिरं प्राक्तनोक्तं सदैवास्तु लोके ॥
यः करोति स्वनाम्ना ज्ञः परस्योत्कृष्टकल्पनां ।
स शीघ्रं क्षयमाप्नोति जनिश्चान्त्यजयोनिषु ॥

Colophon. इति श्रीकमलाकरविरचिते सिद्धान्ततत्त्वविवेके सोत्तरप्रश्नाधिकारः ।
अथात्र सार्द्धाम्बरदस्रसंख्यपलांशकैरस्ति च दक्षिणस्यां ।
गोदावरीसौम्यविभागसंस्थं दुर्गञ्च यद्देवगिरीतिनाम्ना ॥
प्रसिद्धमस्मान्नृप १६ योजनैः प्राग्-याम्यान्तराशास्थितपाथरी च ।
विदर्भदेशान्तरगास्ति रम्या राज्ञां पुरी तद्गतदेशमध्ये ॥
तस्यास्तु किञ्चित् परभाग एव सार्द्धद्वितुल्यैः किल योजनैश्च ।
गोदा वरीवर्त्ति सदैव गङ्गा या गौतमप्रार्थनया प्रसिद्धा ॥
अस्याः सतां सौम्यतटोपकण्ठे ग्रामोऽस्ति गोलाभिधया प्रसिद्धः ।
तथैव याम्ये पुरुषोत्तमाख्या पुरी तयोरन्तरगा स्वयं सा ॥
यस्यां सदानन्दकुले रमन्ते गृहाग्नि++स्वगुणास्तरुण्यः ।
परस्परं शीकरसेचनाद्यै-र्विकोनको भाषणतत्परास्ताः ॥

विषयः। कालस्वरूपादिकथनं। ब्राह्मदैवादिमानकथनं। अहोरात्रमानादिनिरूपणं। भचक्रभ्रमणेन लङ्कादौ दिनरात्रिविभागादिकथनं। कृतादियुगपादनिरूपणं। वर्षनिरूपणं। आद्यपुरुषात् स्वायम्भुवमनोरारभ्य शालिवाहनशाकेन्द्रं यावत् यावन्तो वत्सरा अतीताः तन्निरूपणं। अत्र सिद्धान्तशिरोमणिमताक्षेपः। ज्योतिषशास्त्रागमकथनं। सूर्य्यसिद्धान्तप्रशंसा। प्रवहानिलेन भचक्रभ्रमणकथनं। इति भगणमानाध्यायः। सृष्टिप्रलयचिन्तनं। अत्र भास्कराचार्य्योक्तोदयान्तरवासनानिराकरणं। ध्रुवस्थानादिनिरूपणं। मेषादिराशीनां कल्पितत्वकथनं। नक्षत्रचक्रसंस्थानादिनिरूपणं। प्रवाहमस्वीकुर्व्वतो भूभ्रमणञ्चाभ्युपगच्छत आर्य्यभट्टस्य मतखण्डनं। नीलं नभ इति प्रतीतेर्भ्रमत्वकथनं। अम्बरस्थितं तम एव नीलतया संदृश्यते इति निरूपणञ्च। कपित्थफलवद्वृत्तः स्थिरोऽयं भूगोलः परेशशक्त्यैव व्योम्नि तिष्ठतीतिनिरूपणं। अत्र यावनमतकथनं। निरक्षदेशनिरूपणं। भूगोलसंस्थानं। यमकोटिरोमकसिद्धपुराणामवस्थित्यादिकथनं। मेरुस्थानादिनिरूपणं। भूगोलपरिधिव्यासादिनिरूपणं। गणितप्रक्रियाकथनं। दिनाद्यानयनप्रक्रियाकथनं। दृक्फलनिरूपणं। भूगोलात् ऊर्द्ध्वस्थितस्य वायोः शीतत्वकथनं। तत्र वाष्पादीनां मेघादिरूपेणोत्पत्तिकथनञ्च। इन्द्रचापोल्कापातादीनां कारणकथनं। पाषाणादिभिः कठिनाया भूमेः वाष्पनिःसरणकाले कम्पः शब्दश्च जायते इत्यनेन भूमिकम्पकारणनिरूपणं, भूस्थविषसम्बन्धात दूषिता वाष्पाः न्देहलग्नाः महामारीं जनयन्तीति मारीभयकारणनिरूपणञ्च। ग्रहाणां कक्षामानकथनं। बिम्बज्ञानार्थं गणितप्रक्रियाकथनं। ग्रहाणां नीचोच्चकर्णनिरूपणं। विषुवसंक्रान्त्यादिज्ञानार्थं यन्त्रादिकथनं। ध्रुवाकर्षणतो गोलभ्रमणकथनं। प्रवहवायवशात् भचक्रं गच्छतीति वादाक्षेपः, अक्षांशानयनादिप्रक्रियानिरूपणं। ज्यानयनादिप्रक्रियाकथनं। क्षेत्रदर्शनविधिः। क्षेत्राणामुत्पत्तिकथनं। उत्क्रमशिञ्जिन्यादिप्रक्रियादिकथनं। व्यासाद्यानयनप्रकारकथनं। गणितसाधनप्रकारकथनं। कुण्डविचारः। सवासनग्रहस्फुटनिरूपणं। केन्द्रानयनप्रकारकीर्त्तनं। गोलानां संस्थानादिकथनं। प्रतिमण्डलाख्यगोलनिरूपणं। प्रतिवृत्तगोलादिज्ञानसाधनादिप्रक्रियाकथनं। सूर्य्यस्य बिम्बसञ्चारज्ञानोपपत्तिकथनं। स्फुटार्कसिद्ध्यर्थमाकाशगोलस्वरूपसन्दर्शनप्रक्रियाकथनं। एवं चन्द्रमलादीनां फलोपपत्तिप्रदर्शनं। ग्रहाणामुच्चनीचत्वादिज्ञानसाधनकीर्त्तनं। तेषां वक्रगत्यादिज्ञानप्रक्रियाकथनं। ग्रहाणां पातज्ञानप्रक्रियाकथनं। सृष्ट्याद्यकाले भमण्डलस्य स्थानादिकथनं। अयनांशनिरूपणं। संक्रान्तिनिरूपणं। शिरोमणिसिद्धान्तसार्व्वभौमाद्युक्तकर्णसाधनप्रक्रियादूषणं। ग्रहस्पष्टाधिकारप्रक्रियाकथनं। त्रिप्रश्नाधिकारकथनं। निरक्षदेशादिनिरूपणं। विषुवरेखाद्यानयनप्रक्रियादिकथनं। अर्कादीनां भुजांशाद

नयनप्रक्रियाकथनं । दिग्देशकालानां ज्ञानोपायकथनं । यन्त्रियन्त्रादिस्वरूपकथनं । यन्त्राङ्गतांशानां वैचित्र्यकथनं । सवासनग्रहाणां विम्बस्वरूपकथनं । सूर्य्यविम्बाद्भूगोलकानां ग्रहाणां प्रभाप्राप्तिकथनं । सूर्य्यादीनां व्यासादिनिरूपणं । विम्बक्षेत्रसंस्थानादिप्रक्रियाकथनं । ग्रहविम्बवशेन नक्षत्रविम्बज्ञानोपायनिरूपणं । सूर्य्यकक्षादिज्ञानोपायकथनं । चन्द्रार्कविम्बान्तरसूत्रयुक्तिकथनं । छायाक्षेत्रदर्शनप्रक्रियाकथनं । चन्द्रशृङ्गोन्नत्यधिकारः । ग्रहाणामुदयास्तज्ञानसाधनप्रक्रियाकथनं । चन्द्रार्कयोः ग्रहणसम्भवकथनं । ग्रहणगणनादिप्रकारादिकथनं । स्पर्शविमुक्तिकालाद्यानयनप्रक्रियाकथनं । तत्र लम्बनसाधनार्थमुदयास्तचिन्तितले क्षेत्रसंस्थानादिकथनं । परिलेखाधिकारः । ग्रहनक्षत्रयुत्यधिकारः । विविधचन्द्रादिनाविम्बादिज्ञानसाधनप्रक्रियादिकथनं । प्रश्नादिनिरूपणञ्च ।

No. 1866. मुद्राप्रकाशः ।

Substance, country-made paper, 13 × 4 inches. Folia, 20. Lines, 9 on a page. Extent, 405 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujaná Gráma, Post Tájapurá, Darbháñgá, Paṇḍit Bábuláala Páṭhaka. Appearance, fresh. Prose and verse. Correct.

Mudrá-prakás'a. Descriptions of the various kinds of gesticulation required when worshipping particular divinities. By Rámakis'ora S'armá.

Beginning. इन्दिरहरिहराद्यैर्देवहन्दैर्नमस्यं ददद्भिमतमर्थं भक्तिभाजां जनानां ।
परिहृतसकलार्थैर्योगिभिर्ध्यायमानं हरचरणसरोजं क्षेमकामा भजध्वं ॥
नत्वा गुरुपदं रामकिशोरेणेष्टसिद्धिदं ।
साधकानां मुदे मुद्राप्रकाशोऽयं विरच्यते ॥
देवानां मुदं हर्षं राति ददातीति मुद्रा । तथा च मन्त्रदर्पणे ।
रचनां सम्यग् ज्ञात्वा पूजायां दर्शयेन्मुद्रां ।
तदियं मुद्रा कथिता देवेभ्यो यन्मुदं राति ॥ इत्यादि ।

End. यो जज्ञे सुकृती धरासुरवराद्धीरोत्तमाद्राघवात्
तस्माद्रामकिशोर ईश्वरसमाद्यो रुद्रनारायणात् ।
जातो युग्मशरस्थिताधरधरामाने शकाब्दे गते
तेनासौ त्रिपुरारिराजनगरे मुद्राप्रकाशः कृतः ॥

Colophon. इति श्रीरामकिशोरशर्म्मविरचितमुद्राप्रकाशः समाप्तः।

विषयः। तत्रादौ मुद्राशब्दनिर्वचनपुरःसरं मुद्राणां प्रमाणकथनमुखेन मुद्रालक्षणव्याख्यानं। तत्र अङ्कुशमुद्राकथनं। कुन्तमुद्रा। कुम्भमुद्रा। तत्त्वमुद्रा। कालकर्णीमुद्रा। वासुदेवाख्या मुद्रा। सौभाग्यदण्डिनी मुद्रा। रिपुजिह्वाग्रगा मुद्रा। कूर्म्ममुद्रा। त्रिखण्डा मुद्रा। गालिनी मुद्रा। मत्स्यमुद्रा। आवाहनीमुद्रा। स्थापनीमुद्रा। सन्निधापनीमुद्रा। सन्निरोधनीमुद्रा। सम्मुखीकरणीमुद्रा। सकलीकरणीमुद्रा। अवगुण्ठनीमुद्रा। अमृतीकरणीमुद्रा। धेनुमुद्रा। परमीकरणीमुद्रा। लेलिहानमुद्रा। गन्धमुद्रा। पुष्पमुद्रा। धूपमुद्रा। तत्त्वमुद्रा। प्राणमुद्रा। अपानमुद्रा। व्यानमुद्रा। उदानमुद्रा। समानमुद्रा। ग्रासमुद्रा। लिङ्गमुद्रा। योनिमुद्रा। त्रिशूलमुद्रा। मालामुद्रा। वरमुद्रा। अभयमुद्रा। मृगीमुद्रा। खट्वाङ्गमुद्रा। कपालमुद्रा। डमरुमुद्रा। शङ्खमुद्रा। चक्रमुद्रा। गदामुद्रा। पद्ममुद्रा। वेणुमुद्रा। श्रीवत्समुद्रा। कौस्तुभमुद्रा। वनमालामुद्रा। ज्ञानमुद्रा। विल्वमुद्रा। गारुड़मुद्रा। नृसिंहमुद्रा। वाराहमुद्रा। हयग्रीवमुद्रा। धनुर्मुद्रा। वाणमुद्रा। शरमुद्रा। परशुमुद्रा मोहनीमुद्रा। काममुद्रा। गणेशमुद्रा। दण्डमुद्रा। पाशमुद्रा। अङ्कुशमुद्रा। विघ्नमुद्रा। लड्डुकमुद्रा। वीजपूरमुद्रा। खड़्गमुद्रा। चर्म्ममुद्रा। मुशलमुद्रा। दौगीमुद्रा। संक्षोभमुद्रा। द्रावणमुद्रा। आकर्षणमुद्रा। वशीकरणमुद्रा। उन्मादनमुद्रा। महाङ्कुशमुद्रा। खेचरीमुद्रा। वीजमुद्रा। योनिमुद्रा। अक्षमुद्रा। मालामुद्रा। वीणामुद्रा। भूतिनीमुद्रा। महायोनिमुद्रा। दैत्यधूमनीमुद्रा। लेलिहानामुद्रा। लक्ष्मीमुद्रा। सप्तजिह्वामुद्रा। शूकरीमुद्रा। हंसीमुद्रा। मृगीमुद्रा। प्रार्थणामुद्रा। संहारमुद्रा। अशनिमुद्रा। नादमुद्रा। विस्मयमुद्रा। विन्दुमुद्रानिरूपणञ्च।

No. 1867. गङ्गाभक्तितरङ्गिणी।

Substance, country-made paper, 12 × 3 inches. Folia, 26. Lines, 11 on a page. Extent, 1,322 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujaná Gráma, Post Tájapurá, Darbháñgá, Paṇḍit Bábulála Páṭhaka. Appearance, old. Prose and verse. Correct.

Gañgábhakti-tarañginí. A dissertation on the sanctity of the River Ganges, and the various forms in which it should be adored. By Gaṇapati, a resident of Mithilá, and a scion of the family of the king of Dhárá.

Beginning. रूपं साचात् प्रशमैश्वं द्रवत्वं पुञ्जीभूतं सर्व्वगीर्व्वाणतेजः।
व्यक्तीभूतं ब्रह्मविघ्नं निहन्त्यादारम्भेऽस्मिन् गाङ्गमम्भो मदीयं॥
सद्विद्याकुलयोर्विशेषमखिलं विज्ञाय नान्यो द्दौ
वृत्तिं यस्य पितामहाय मिथिलाभूमण्डलाखण्डलः।
श्रीधारेश्वरसूनुरन्वहमसावभ्यस्य भाट्टं मतं
गङ्गाभक्तितरङ्गिणीं गणपतिर्ब्रूते सतां प्रीतये॥
प्रमाणमात्रं प्रथमं व्यवस्था तदनन्तरं।
ततः प्रयोगः संचेपात् तरङ्गेषूपवर्ण्यते॥
तत्रादौ प्रभवप्रकरणं। विष्णुपुराणे। इत्यादि।

End. व्रते तु यदेव यत्र फलं श्रुतं तदेव तत्र सङ्कल्पवाक्ये योज्यं। सुगममन्यदिति।
नानर्षिवाक्यरचना+परिश्रमेण ग्रन्थस्य गौरवभयान्न कृतः प्रयत्नः।
दिङ्मात्रमेतदुपदर्शितमित्थमेव विज्ञैर्विचिन्त्य वचनान्तरमूहनीयं॥
एतन्नित्यमुपासनाभिरसकृत्किञ्चित् प्रसन्नासि चे-
न्मह्यं देवि तदा कृताञ्जलिरहं त्वामद्य याचे वरं।
श्रीयोगीश्वरसम्भवस्य कृतिनः कीर्त्तिप्रसूर्ज्जायतां
विद्वद्भिः परिशीलिता कृतिरियं कल्पान्तरस्थायिनी।
श्रीगङ्गा विजयतेतराम्॥

विषयः। गङ्गामाहात्म्यकीर्त्तनं। तत्र गङ्गातीरनिवासफलं। गङ्गाभक्तिफलं। जलपानफलं। गङ्गादर्शन-स्तवन-स्नानादिफलकथनं। अयनविषुवसंक्रान्तिमास-तिथिनचत्रादि-स्नानफलकथनं। चन्द्रसूर्य्योपरागादौ स्नानविधिकथनं। दशहराविधिकथनं। देशविशेषे गङ्गास्नानविधिकथनं। उत्तरपश्चिमवाहिन्यादिस्नानफलकथनं। गङ्गासरःसङ्गमस्नानविधिः। एवं गङ्गाकौशिकीसङ्गम-गङ्गागण्डकीसङ्गम-हरिद्वार-प्रयाग-गङ्गासागरस्नानादिविधिकथनं। गङ्गायां मरण-श्राद्धादिफलकथनं। तत्र अर्द्धोदकलचणकथनं। अस्थिप्रचेपादिविधिः। मुण्डनादिविधिकथनं। अर्द्धोदयादियोगविशेषे गङ्गास्नानसङ्कल्पवाक्यादिकथनं। एवं सर्व्वत्र सङ्कल्पवाक्य-कथनञ्च।

No. 1868. स्मृतितत्त्वविवेकः।

Substance, country-made paper, 14 × 4 inches. Folia, 98. Lines, 7 on a page. Extent, 2,758 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose and verse. Correct.

Smṛiti-tattva-viveka. A summary of the Smṛiti rules regarding domestic rites and ceremonies. By Vardhamána Mahámahopádhyáya Mahádharmádhikárí. He was chief judge in the court of some king whose name is not given.

Beginning. पाणिभ्यामुपजातवेपथुतया यत्नेन यः कम्पितो
येन स्वेदजलौघपूरिततया नापेक्षितोऽम्बुग्रहः ।
सन्ध्यार्थत्वमवेक्ष्य यो मुकुलितः सव्ये करे कम्बुना
साहश्यं गतवान् स पातु + + + सायन्तनोर्घाञ्जलिः ॥
अनेकार्थो वेदः प्रतिक्रषिविभिन्नाः स्मृतिगिरो
निबन्धारः स्वं स्वं मतमनुसरन्तो विसदृशाः ।
यथा देशे देशे नरि नरि तथा सम्प्रति पृथक्
सदाचारस्तस्मादनवहतदुःस्थो विधिपथः ॥
तथाभूते चास्मिन् परिमितगिरो यद्यपि वयं
वहिर्द्दोसिद्धान्तस्थितिमनुपपत्त्यारुरुचयितुं ।
तथापि स्वेयानामुभयमतयुक्तिप्रणयना-
दपि स्यादश्लाघ्या इति कुमतिरुत्तम्भयति नः ॥
श्रुत्वा बहुभ्यो बहुधा गुरुभ्यो विचार्य्य बुद्ध्या विविधान् निबन्धान् ।
स्मृतिस्थितिद्वैतनिवृत्तिहेतुः श्रीवर्द्धमानेन कृतो विवेकः ॥
— — — — — — इह यद्यपि श्रुत्यादीनां स्वपरविरोध उपक्षिप्तः तथापि धर्म्मविचारे स एव उपायः तस्य तदेकमानकत्वात् । इत्यादि ।

End. एकः प्रायेण स + ग्वि विपर्य्येति विमुह्यति ।
अतो बहुभिरालोक्य कृतिरेषा मया कृता ॥

Colophon. इति महाधर्म्माधिकारिमहामहोपाध्यायश्रीवर्द्धमानकृतौ स्मृतितत्त्वविवेकः समाप्तः।

विषयः। श्रुत्यादीनां विरोधे बलाबलनिरूपणं। आचारादीनां विरोधे बलीयस्त्वादिकथनं। मूलश्रुत्यनुमानप्रक्रियादिविवेचनं । तुल्यबलविरोधे विकल्पादिकथनं। श्रुतिलिङ्गप्रकरणादीनां विरोधे बलाबलनिरूपणमुखेन तेषां स्वरूपादिकथनं। अवान्तरभेदप्रदर्शनेन प्रत्येकं स्पष्टीकरणञ्च। धर्म्मस्वरूपविवेचनं। तदनुष्ठानफलादिनिरूपणञ्च। नित्यनैमित्तिककाम्यकर्म्मस्वरूपकथनादिकं। अत्र सर्व्वत्र तार्किकसमयानुसारेण अतीव सूक्ष्मानुसन्धानेन विषया निरूपिता इति ज्ञेयं। विधिविचारः। धर्म्मे श्रुतिस्मृतिसदाचाराणां प्रामाण्यप्रदर्शनं। धर्म्मशास्त्रनिरूपणादिकं। तेषां संख्यादिनिरूपणञ्च। शिष्टाचारनिरूपणं। द्वैतविषयकप्रकीर्णककथ-

नमुखेन शस्यादिविधानं। नवान्नश्राद्धादौ व्रीह्यादिविधिचिन्तनं। मलमासनिरूपणं। तत्कृत्यविधानञ्च। अपरपक्षश्राद्धविधिः। सपिण्डनादिश्राद्धनिरूपणादिकं। मासपक्षादीनामुल्लेखकरणावश्यकतानिरूपणं। चान्द्रमासादिलक्षणं। अपरपक्षश्राद्धविधिः। सामान्यतः श्राद्धवेलानिरूपणं। प्रतिमानिर्म्माणविधानकीर्त्तनं। संक्षेपतो मन्त्रोपदेशप्रकारकथनञ्च।

No. 1869. प्रत्यक्षमणिरश्मिचक्रं।

Substance, country-made paper, 11 × 4 inches. . Folia, 156. Lines, 10 on a page. Extent, 6,265 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭiláḷa Jhá. Appearance, fresh. Prose. Correct.

Pratyaksha-maniras'mi-chakra. A commentary on the 'Pratyaksha-khaṇḍa' of the 'Tattva-chintámaṇi' of Gáñges'a. By Gokulanátha Upádhyáya.

Beginning. दिवि वक्षःस्थले विष्णोर्गङ्गेशवदने+वि।
चिन्तामणीशवन्द्यस्य रश्मिचक्रं प्रकाश्यते॥
गुणातीत इति। गुणपदस्य प्रकृतितत्त्वपरिणामेषु—इत्यादि।

End. पुरोवर्त्तिरजतमिति व्यवसायादिवत् ततो न प्रवृत्तिरित्यर्थः। बाधेनेति सन्देहविशेषः। भ्रान्तिनाशादिति शम्।

Colophon. इति महोपाध्यायश्रीगोकुलनाथोपाध्यायविरचितं प्रत्यक्षमणिरश्मिचक्रं समाप्तं।

विषयः। गङ्गेशोपाध्यायकृततत्त्वचिन्तामण्यन्तर्गतप्रत्यक्षखण्डस्य व्याख्यानं।

No. 1870. प्रामाण्यालोकटिप्पनी।

Substance, country-made paper, 11 × 3 inches. Folia, 24. Lines, 9—10 on a page. Extent, 892 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭiláḷa Jhá. Appearance, fresh. Prose. Correct.

Prámáṇyáloka-ṭippaṇí. A gloss on the 'Prámányáloka' of Paksha-dhara Mis'ra. By Gokulanátha Mahámahopádhyáya.

Beginning. परीचिच्छिषमाणस्य प्रमाणमणिसागरं।
नाथस्य मङ्गलानाथ नामैव तव मङ्गलं॥

स्वलक्षणसत्त्वावादिनां मते स्वसम्वेद्यमेव मद्विषयत्वलक्षणं प्रामाण्यमिति शून्यता-वादिशिरसि भारं निक्षिपति माध्यमिक इति । इत्यादि ।

End. तदा भवतु सकलाभावसाधारणमभावत्वमज्ञातं स्वरूपेण प्रकारादिति दिक् ।

Colophon. इति महामहोपाध्यायश्रीगोकुलनाथविरचिता प्रत्यक्षप्रामाण्यालोकटिप्पनी समाप्ता । श्रीरस्तु ।

विषयः । पक्षधरमिश्रकृतप्रामाण्यवादालोकनामकटीकाया व्याख्यानं ।

No. 1871. द्वैतपरिशिष्टं ।

Substance, country-made paper, 12 × 4 inches. Folia, 232. Lines, 8 on a page. Extent, 3,535 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭilála Jhá. Appearance, old. Prose and verse. Correct.

Dvaita-paris'ishṭa. A digest of Hindu Law. By Kes'ava Mahá-mahopádhyáya, of the clan of Sanmis'ra. The work treats of all the leading topics of the Smṛiti, dwelling at great length on the S'rád-dhas.

Beginning. चलानप्यचलीकुर्व्वन्नचलानपि चालयन् ।
वृन्दावनविहारी स्यात् तापहारी हरिर्मम ॥
तत्रादौ व्यवहारो निरूप्यते । इत्यादि ।

End. धनूराशिस्थितसूर्य्ययोगात् पौषादिप्रवृत्तौ सकलानुशासनविरोधात् । अत एव प्रकृते सौरपौषादिभ्रमो हेय इति दिक् ।

Colophon. इति महामहोपाध्यायसन्मिश्रकेशवविरचिते द्वैतपरिशिष्टे द्वितीयः परिच्छेदः । समाप्तश्चायं ग्रन्थः ।

विषयः । चतुष्पाद्व्यवहारनिरूपणं । तत्र पक्षाः । उत्तराणि । साक्षिणः । क्रियाद्वैधादौ अनेकार्थाभियोगविधिः । सपणविवादविधिः । जयपत्रलक्षणादिनिरूपणं । सन्ध्यागर्ज्जनादिव्यवस्था । विवाहानधिकारिणः ! कन्याविवाहकालादिनिरूपणं । नामकरणादिव्यवस्थाकीर्त्तनं । दानलक्षणादिकं । यज्ञादौ दक्षिणादिनिरूपणं । तड़ागविधिः । एकादशीव्रतविधिः । पुत्रस्य प्रथमविवाहे कर्त्तव्यतानिरूपणं । स्ववर्णजातिनिरूपणं । कन्यादानविधिः । स्त्रीणां मृतभिषास्नानविधिः । शूद्रस्य शुचित्वनिरूपणं । दिनरात्रिशुद्धिनिरूपणं । गृहस्थस्य शौचानुष्ठानविधिः । दन्तधावनस्नानादिविधिः । पञ्चयज्ञादिविधिः । उदकपात्रादौ तर्पणनिषेधः । गाय-

विषयः। होजपादिविधिः। तर्पणेतिकर्त्तव्यता। पञ्चदेवतापूजा। पूजायां सर्व्ववर्णाधिकारकथनं। पुष्पग्रहणादिनियमः। सिद्धान्नेन विश्वदेवकर्म्मविधानं। नित्यश्राद्धादिविधिः। पशुहननविधिः। अङ्गुल्या दन्तधावनादौ दोषविधिः। शूद्रैः कपिलादुग्धं न पेयमितिकथनं। कस्तूरीभक्षणादिविधिः। प्रेताधिकारे पिण्डदानादिविधिः। पूर्णिमायां मत्स्यमांसादिभोजननिषेधकथनं। अशौचनिरूपणं। शूद्रेणापि पायसेन पिण्डा देया इति निरूपणं। रात्रौ पिण्डदाननिषेधः। सपिण्डने प्रेतपदोल्लेखकर्त्तव्यता। स्वाशौचविधिः। देशान्तरलक्षणादिकथनं। परिवापनादिविधिकथनं। सपिण्डतालक्षणादिनिरूपणं। शरदि शुक्लपक्षपार्व्वणविधिः। हैमन्तिकपार्व्वणविधिः। श्राद्धविधिः। पाकादिविधिः। निषिद्धनक्षत्रे सपिण्डनाकर्त्तव्यताविधिः। श्राद्धोत्तरं विश्वदेवबलिविधिः। पाकस्य श्राद्धाङ्गतानिरूपणं। शेषान्नभोजनविवेचनं। श्राद्धदिने जाताशौचविधिकथनं। भ्रातृपुत्रसत्त्वे नान्यः कृत्रिमः पुत्रः कार्य्य इति निरूपणं। स्त्रीणां वैधस्नानविधिः। तासां वैधकर्म्मणि द्विवासस्त्वविधिकथनं। उपनयनादौ पित्रादिना आभ्युदयिकं कर्त्तव्यमितिनिरूपणं। साग्नोरसक्षेत्रजाभ्यां मृताहे पार्व्वणमेव कार्य्यमितिकथनं। त्र्यहाशौचे चतुर्थदिने आद्यश्राद्धं त्रिपक्षादौ सपिण्डनमितिव्यवस्थापनं। तीर्थश्राद्धविधिः। एकाहे मृतयोरपि पित्रोः शय्यादानादौ विशेषकथनं। नीलवृषलक्षणं। कात्यायनोक्तवृषोत्सर्गविधिः। अन्त्यजन्मपदविवरणं। शूद्रस्य असन्त्रवत्कर्म्मविधानं। अपरपक्षश्राद्धविधिः। शस्त्रहतादिश्राद्धविधिः। पार्व्वणानन्तरं नित्यश्राद्धकर्त्तव्यता। श्राद्धे पशुघातो न दोषायेतिनिरूपणं। दत्तकस्य सपिण्डनविधिः। कार्त्तिक्यादौ वृषोत्सर्गविधानं। आभ्युदयिके पिण्डदाने विशेषकथनं। प्रजापतिहोमो मनसैव कर्त्तव्य इति कथनं। सायमग्नौ होमविधिः। अनुपनीतेन वैश्वदेवहोमो न कार्य्य इति निरूपणं। पित्राद्यर्च्चने ज्येष्ठाधिकारकथनं। कुसीदलक्षणादिकथनं ऋणदानादिविधिः। आत्मविक्रयादिनिरूपणं। दायग्रहणविवेचनं। अकालवृष्ट्यादिविधिकथनं। मलमासक्षयमासादिविचारः। व्रते सङ्कल्पस्य अङ्गत्वकथनं। तत्र दन्तधावनादिविधिकथनं। उपवासादौ जलादिविधिः। स्त्रीणां रजोयोगे पुत्रादिना पूजादिकं। कारयितव्यमितिकथनं। यवश्राद्धविधिः। हरिशयनविधिः। अशून्यशयनव्रतकथनं। भागवतनिरूपणं। महाष्टमीकृत्यं। पूर्णिमाकृत्यं। पतिव्रताधर्म्मनिरूपणं। मन्वन्तरायुगाद्यादिनिरूपणं। संक्रान्तितत्कृत्यनिरूपणं। ग्रहणे पुण्यकालादिविवेचनं। कल्पपादपकामधेन्वादिमहादानविधिकथनं। कुण्डलक्षणकथनं। प्रयागे मुण्डननिर्णयः। प्रोक्षणकुशोत्पाटनादिविधिः। सावनमासस्य द्वैविध्यकथनं। संक्रान्त्यादिषु श्राद्धनिरूपणं। स्नानसन्ध्यातर्पणादिक्रमकीर्त्तनं। मन्त्राद्यविवेचनं। उभयदिने-

विषयः। क्षयाहलाभे व्यवस्थाकथनं। मलमासश्राद्धविचारः। श्राद्धकालदेशनिरूपणादिकं। गयाश्राद्धाधिकारे पुत्रपदशक्तिविचारः। जलपानानन्तरं नित्यकर्म्मानधिकारकथनं। प्रपादिजलपानविचारः। अशौचसङ्करविधिः। एकभक्तादिव्रतकथनं। पुत्रिकापुत्रेण मातुः सपिण्डनविधिकथनं। कृत्रिमपुत्रकर्त्तृकसपिण्डनविधिकथनं। दत्तकस्य सपिण्डनादिविवेचनं। चतुर्थीहोमात् प्राक् स्त्रीमरणे तत् पितृगोत्रेणैव पत्या सपिण्डनान्त कार्य्यं एकोद्दिष्टन्तु स्वगोत्रेणेतिनिरूपणं। पर्णनरदाहविधिः। सौवर्णादिपात्रेण तर्पनविधिः। आभ्युदयिककालनिरूपणादिकं। तर्पणेतिकर्त्तव्यता। पञ्चमहायज्ञविधिकथनं। भगवन्नैवेद्यविधिः। अपुत्रस्त्रीपुंसयोरपरपक्षस्तयोरेकोद्दिष्टं न तु पार्व्वणमितिनिरूपणं। अनुपनीतकर्त्तृकश्राद्धविधिः। समयाशुद्धिविवेचनं। पार्व्वणाधिकारिणः। नित्यश्राद्धादिलक्षणं। प्रातःस्नानादिकालनिरूपणं। केशवपनवापनयोर्भेदकथनं। स्त्रीणां प्रयागे मुण्डनविधिकथनं। अर्द्धोदययोगविधिः। द्विराषाढ़शब्दार्थनिरूपणं। अशौचान्तशब्दार्थकथनं। जयस्नानविचारः। सपिण्डनापकर्षमासिकापकर्षविधिः। सन्न्यासिकर्त्तृकं नात्मीयश्राद्ध कर्त्तव्यमितिनिर्णयः। सपिण्डतालक्षणादिकथनं। गजच्छायाश्राद्धविधिः। पाकयज्ञे शूद्रस्याप्यधिकार इति कथनं। पाकयज्ञसंख्यादिनिरूपणं। सप्तवित्तागमा धर्म्मा इत्यादिविवेचनञ्च। इति।

No. 1872. सिद्धान्ततत्त्वं।

Substance, country-made paper, 12 × 3 inches. Folia, 32. Lines, 9 on a page. Extent 997 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháṅgá, Paṇḍit Chhoṭílála Jhá. Appearance, fresh. Prose. Correct.

Siddhánta-tattva. The philosophy of Grammar. By Jagannátha Mahámahopádhyáya.

Beginning. सुब्विभक्तिः प्रथमादिभेदेन सप्तविधा। प्रथमार्थश्च संख्याद्वेकयोर्द्विवचनैकवचन इत्यनुशासनात् प्रातिपदिकार्थे प्रथमाविधानेन अर्थान्तराभावाच्च। इत्यादि।

End. इनधातोर्गतौ शक्तितोऽप्यपि न सर्व्वत्र सारसिकः प्रयोगः।

Colophon. इति महामहोपाध्यायश्रीजगन्नाथविरचिते सिद्धान्ततत्त्वे स्फोटादिनिर्णयः सम्पूर्णः।

विषयः। प्रथमादिविभक्त्यर्थनिरूपणं। आख्यातार्थनिरूपणं। समासशक्तिनिरूपणं। उपसर्गार्थनिरूपणं। पदार्थनिरूपणं। नञर्थनिरूपणं। स्फोटनिरूपणञ्च।

No. 1873. कुसुमाञ्जलिविवरणं ।

Substance, country-made paper, 13 × 3½ inches. Folia, 68. Lines, 10 on a page. Extent, 1,340 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭílála Jhá. Appearance, old. Prose. Correct.

Kusumánjali-vivaraṇa. A commentary on the 'Kusumáṉjali' of Udayana A'chárya. By Jayaráma Nyáya-paṉchánana.

Beginning. नत्वेशं जयरामोऽसौ न्यायपञ्चाननः कृती ।
विवृणोति बुधप्रीत्यै कुसुमाञ्जलिकारिकाः ॥
विघ्नहतये विहितं मङ्गलं व्याख्यातृश्रोतृणामनुषङ्गतोऽपि मङ्गलाय च निबध्नन्
प्रयोजनाभिधेयसम्बन्धग्रन्थनामान्याह । सत्पक्षप्रसर इत्यादि ।

End. स एवानेन प्रीतो भविष्यतीति ध्वनितं ।
कुसुमाञ्जलिकारिकाः समाप्ता विवृताः श्रीजयरामेण
कुसुमाञ्जलिमञ्जसाधिगच्छेद्यदि पश्येदिदं हेलयापि चित्ते ।

Colophon. इति कुसुमाञ्जलिविवरणं सम्पूर्णं ।

विषयः । उदयनाचार्य्यकृतकुसुमाञ्जलिकारिकाभागस्य व्याख्यानं ।

No. 1874. हरिभक्तिदीपिका ।

Substance, country-made paper, 10 × 3 inches. Folia, 84. Lines, 10 on a page. Extent, 3,133 s'lokas. Character, Maithilí. Date, Sk. 1700. Place of deposit, Magráṇi, Post Madhubaní, Dárbháñgá, Paṇḍit Chhoṭílála Jhá. Appearance, very old. Prose and verse. Correct.

Haribhakti-dípiká. On the philosophy of the Bhakti doctrine, and the duties enjoined to the followers of that doctrine. By Gaṇes'a Mahámahopádhyáya. This is a text book for Vaishṇavas.

Beginning. सकलपुमर्थासारं श्रुतिकलकण्ठीविहारसहकारं ।
अद्वैतराजहंसीकमलाकरमेकमच्युतं वन्दे ॥
वेणौव + + रन्ध्रं घनघटितलघुन्याससोलाङ्गुलीकं ।
भाव्याभव्यासदेशे(?)श्रितरति + टयन्तिर्य्यगावर्ज्जितास्यं ॥
एकार्थे + स्य चैकं पदमितरपदे भङ्गिभव्यञ्चिकश्रीः ।
कश्चिद्दर्हाभिरामो विहरतु हृदये नीलिमा कौस्तुभी वः ॥

किमिह पदार्थविचारैर्गमयथ समयं मुधा विबुधाः।
कुरुत पुमर्थचतुष्टयसाधनमाराधनं विष्णोः॥
तथाच प्रह्लादवचनं। इत्यादि

End. तस्मात् कर्म्मकाण्डब्रह्मकाण्डयोरुपासनाक++पयिकत्वमिति सिद्धं मुक्तेः परमपुरुषार्थत्वमिति।

Colophon. इति महामहोपाध्यायश्रीगणेशकृता हरिभक्तिदीपिका समाप्ता। शाके १७००।

वषयः। भगवद्भक्तिनिरूपणं। भक्त्यङ्गानि। विष्णुपूजायां सर्व्ववर्णानामधिकारकथनं। स्त्रीशूद्रयोः भगवद्द्वास्पर्शननिषेधः। विष्णुपूजारतानां शूद्राणां मद्यपानादिनिषेधकथनं। स्त्रीशूद्रयोः षोड़शोपचारेण विष्णुपूजानिषेधकथनं। विष्णुपूजनेनैव तत्तद्देवतापूजानिर्व्वाहात् न पृथक् करणमावश्यकमिति निरूपणं। विष्णुपूजाफलं। अर्घ्याादिपरिमाणकथनं। दक्षिणावर्त्तशङ्खमाहात्म्य। गरुड़ोपरिपूजाफलं घण्टामाहात्म्य। प्रतिमास्नाने घृतादिपरिमाणनिरूपणं। पूजाकर्म्मणि तिलकावश्यकता। गङ्गामृत्तिका-तुलसीमृत्तिकादिफलकीर्त्तनं। शालग्राममाहात्म्य। शिलाचक्रपरीक्षा। तत्र वर्णपरीक्षा। पूजायां अनुलेपन-पुष्प-धूप-दीप-नैवेद्यादिनिरूपणं। दत्तनैवेद्यभक्षणविचारः। पादोदकमाहात्म्य। कीर्त्तनध्यानादिमाहात्म्यकीर्त्तनं। मालायां मणिसंख्या। जपमालासंस्कारः। अहिंसामाहात्म्य। वैष्णवलक्षणं। विष्णारपराधाः। तुलसीमाहात्म्य। तुलसीस्तोत्रं। रामनवमीव्रतं। नृसिंहचतुर्द्दशीव्रतं। एकादशीव्रतनिरुपणं। उपवासानुकल्पनिरूपणं। विष्णूत्थानकृत्यनिरूपणं। अनन्तचतुर्द्दशीव्रतं। द्वादशीव्रतं। अशून्यशयनव्रतं। धरणीव्रतं। मत्स्यद्वादशीव्रतं। कूर्म्मद्वादशीव्रतं। वराहद्वादशीव्रतं। नरसिंहद्वादशीव्रतं। वामनद्वादशीव्रतं। परशुरामद्वादशीव्रतं। कृष्णद्वादशीव्रतं। बुद्धद्वादशीव्रतं। कल्किद्वादशीव्रतं। पद्मनाभद्वादशीव्रतं। योगीश्वरद्वादशीव्रतं। तीर्थयात्रादिविधिः। तत्र यात्राप्रयोगविधिः। अयोध्यादिसप्तपुरीयात्रादिविधिः। चक्रतीर्थयात्रादिविधिः। अग्नितीर्थविधिः। वृहस्पतिकुण्डविधिः। ब्रह्मकुण्डविधिः। सप्तर्षितीर्थविधिः। बालखिल्यतीर्थविधिः। विष्णुमुद्राधारणविधिः। जगन्नाथक्षेत्रमाहात्म्य गङ्गादर्शनादिफलं। गोदावरीमाहात्म्य। सिंहस्थवृहस्पतौ गौतमीमाहात्म्य। सरस्वतीमाहात्म्य। कुरुक्षेत्रमाहात्म्य। कोकामुखमाहात्म्य। कौशिकीमाहात्म्य। तड़ागारामादिविधिः। कूपविधिः। आरामप्रतिष्ठाविधिः। विष्णुप्रतिष्ठाविधिः। सूर्य्यप्रासादफलं। प्रासादनिर्म्माणविधिः। प्रतिमाविधानं प्रतिष्ठाप्रयोगकीर्त्तनञ्च।

No. 1875. व्यवहाररत्नं ।

Substance, country-made paper, 13 × 4 inches. Folia, 46. Lines, 6 on a page. Extent, 844 s'lokas. Character, Maithili. Date, ? Place of deposit, Pilkhayáḍ, Post Madhbaní, Darbaháñgá, Paṇḍit Bábu Jháñjhá. Appearance, new. Verse. Correct.

Vyávahára-ratna. Civil astrology, domestic rites, omens, portents, divinations. By Bhánunátha Daivajña, son of Upadhyáya.

Beginning. नत्वा मुकुन्दस्य पदारविन्दं स्वर्गापवर्गद्रुमराजकन्दं ।
श्रीभानुनाथः कृतचारुयत्नं करोम्यहं सद्व्यवहाररत्नं ॥
स्वकृतपरकृताभ्यां सङ्ग्रहोऽयं मदीयः
सुललितपदरम्यः सर्व्वलोकाभिगम्यः ।
निखिलवरकुलानां मैथिलानामिदानीं
जनयति परितोषं त्यक्तनिःशेषदोषं ॥
काव्यं श्रीभानुनाथस्य प्राचीनगणकस्य च ।
माधुर्य्यमनयोर्ज्ञेयं शर्कराचीरयोरिव ॥
दुर्ज्जनैरपि चन्तव्यमपराधद्वयं मम ।
सज्जनानां विनोदाय यतो ग्रन्थं करोम्यहं ॥
विनोपदेशं खलु बालकानां चेतोविशुद्धिर्न विधानपूर्व्वा ।
यतस्तुतः प्रागुपदेशमेव क्रमेण वच्यामि हितञ्च तेषां ॥
एकस्मिन् वत्सरे मासाश्चैत्राद्या द्वादशैव हि ।
तेपि नाम्नः प्रभेदेन चत्वारः स्युः प्रकारकाः ॥ इत्यादि ।

End. नाधीतं शब्दशास्त्रं नवरसरुचिरं काव्यरत्नादिकं वा
कोषो वालङ्कृतिर्व्वा स्मृतिरपि सकला तन्त्रविद्यापि नैव ।
वाणीमात्रप्रसादादविकलमनसा शास्त्रसारं निरुक्तं
प्रध्वस्तं तत्र यद् यत् खलजनकुधिया सज्जनैः चम्यतां तत् ॥

Colophon. इति मैथालकुलानन्दचन्दनानन्दोपाध्यायसुतश्रीभाणुनाथदैवज्ञविरचिते व्यवहाररत्ने गृहगमनादिप्रकरणं सम्पूर्णं । शुभमस्तु श्रीरस्तु ॥

विषयः । मासनिरूपणं । तिथियोगादिनिरूपणं । भद्रादिविचारः । नक्षत्रविचारादिकं । ताराविचारः । दुष्टताराशान्तिः । चन्द्रावस्थितिविवेचनं । चन्द्रायनचन्द्रवर्ण-ज्ञानादिकथनं । वारविचारः । प्रहरार्द्धविवेचनं । समयाशुद्धिनिरूपणं । मन्वा-दियगादिविचारः । वास्तुभूमिज्ञानकथनं । राशीनां वासस्थानकथनं । नामरा-

विषयः। शिला ग्रामराशिज्ञाननिरूपणं। गृहारम्भे मासपक्षतिथिनक्षत्रादिविवेचनं। गृहे शिल्पादिक्रियाविचारः। गृहप्रवेशविधिः। गृहे देवीस्थापनविधिः। गृहसमीपे शुभाशुभवृक्षरोपणादिविधानं। हलप्रवाहे तिथ्यादिनिरूपणं। नवान्नभक्षणादिविचारः। गृहादौ धान्यादिस्थापनविधिः। संक्रान्तिश्च वस्थानिरूपणं। क्रयविक्रयविचारः। अश्वादियानारोहणदिनकथनं। गजदन्तच्छेदनदिननिरूपणं। दीक्षाग्रहणे नक्षत्रादिनिरूपणं। बन्धुलकरणदिनकथनं। पाणिग्रहणे तिथ्यादिनिरूपणं। द्विरागमनादिविचारः। नवीनशय्याद्यारोहणदिनकथनं। तैलाभ्यङ्गादिविधिः। वस्त्रादिपरिधानदिनकथनं। स्त्रीणां केशबन्धनादिविचारः। प्रथमरजोदर्शने परिधानवस्त्रफलं। शोणितवर्णफलं। स्नानादिफलकथनञ्च। गर्भाधानादिकथनं। पुंसवनसीमन्तोन्नयनादिदिनकथनं। सूतिकागृहनिर्म्माणादिदिनकथनं। जातस्य स्तनपाननामकरणदोलाद्यारोहणदिनकथनं। अन्नप्राशनं। आद्यक्षौरं। विद्यारम्भकर्णवेधोपनयनादिकालविचारः। यात्रिकतिथ्यादिनिरूपणं। शकुननिरूपणं। नौकायानराजदर्शनादिदिनकथनं। परदेशगः कदा समागमिष्यति इति प्रश्नोत्तरकथनं। पुष्करिणीखननदेवतागठनतत्प्रतिष्ठादिदिनविचारः। रोगोत्पत्तौ क्लेशादिदिवसविचारः। निधनकारकरोगनिरूपणं। उत्पातनिरूपणं। भैषज्यारम्भादिकालकथनं। निषिद्धदिनाद्युत्पन्नरोगप्रतीकारकथनञ्च।

No. 1876. दूर्गाभक्तितरङ्गिनी।

Substance, country-made paper, 12 × 3½ inches. Folia, 61. Lines, 10 on a page. Extent, 2,250 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭílála Jhá. Appearance, old. Prose and verse. Correct.

Durgábhakti-tarañginí. A guide-book for the Durgá Pújá. By Narasiñha Deva, a Rájá of Mithilá.

Beginning. अभिवाञ्छितसिद्ध्यर्थं वन्दितो यः सुरासुरैः।
सर्व्वविघ्नच्छिदे तस्मै गणाधिपतये नमः॥
भक्त्या नम्रसुरेन्द्रमौलिमुकुटप्राग्भारतारस्फुर-
न्माणिक्यद्युतिपुञ्जरञ्जितपदद्वन्द्वारविन्दाश्रया।
देव्यास्तत्क्षणदैत्यदर्पदलना + + प्रक्षयामर

स्वाराज्यप्रतिभूभविष्णुकरुणागम्भीरदृक्पातु वः ॥
स्वस्ति श्रीनरसिंहदेवमिथिलाभूमण्डलाखण्डलो
भूभृन्मौलिकिरीटरत्ननिकरप्रत्यर्च्चिताङ्घ्रिद्वयः ।
आपूर्व्वापरदक्षिणोत्तरगिरिप्राप्तार्थिवाञ्छाधिक-
स्वर्णक्षौणिमणिप्रदानविजितश्रीकर्णकल्पद्रुमः ॥
— — — — — — — —।
देवीभक्तिपरायणः श्रुतिमुखप्रारब्धपारायणः
सङ्ग्रामे रिपुराजकंसदलनप्रत्यक्षनारायणः ।
विश्वेषां हितकाम्यया नृपवरोऽनुज्ञाप्य विद्यापतिं
श्रीदुर्गोत्सवपद्धतिं वितनुते दृष्ट्वा निबन्धस्थितिं ॥
तत्रादौ देवीपूजागृहनिर्म्माणं। रत्नाकरादिनिबन्धेषु देवीपुराणं ।

End. सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्व्वकामार्थसिद्धये ॥

Colophon. इति दुर्गाभक्तितरङ्गिणी समाप्ता ।

विषयः । देवीपूजागृहनिर्म्माणविधिः। प्रतिमानिवेशनविधिः । प्रतिमालक्षणं। चण्डिकारूपकथनं। चामुण्डारूपकथनं। सर्व्वमङ्गलारूपकथनं। प्रतिमाभ्यङ्गव्यवस्था। पञ्चोपचारकथनं। अनुलेप-पुष्पधूपदीपादिकथनं। देवीमहोत्सवपूजाविधानं। आश्विनकृष्णनवम्यादिपूजाकल्पकथनं। आश्विनशुक्लप्रतिपदादिकल्पकथनं। प्रतिपदादिप्रतिदिनकृत्यं। तत्र तिथिनक्षत्रबलाबलनिरूपणं। स्वस्त्ययनविधिः। पूजाप्रयोगकीर्त्तनं।

No. 1877. न्यायतत्त्वपरीक्षा ।

Substance, country-made paper, 14 × 3 inches. Folia, 72. Lines, 7 on a page. Extent, 922 s'lokas. Character, Maithilí. Date, Sn. 1187. Place of deposit, Magráṇí, Post Madhubaní, Darbháṅgá. Paṇdit Chhoṭi Jhá. Appearance, fresh. Prose. Correct.

Nyáyatattvaparíkshá. A commentary on Gotama's aphorisms of the Nyáya doctrine. By Vaṅs'adhara, nephew of Jagannátha, under whom he had studied the subject.

Beginning. स्वर्गे गोकुलनाथतस्तदनुजाद्यो+जगन्नाथतः
++प्रापि मयाक्षपादवचनव्याख्याविधिर्मातुलात् ।

तत्त्वं गूढ़मपि स्वभावगहने न्याये परीक्षिप्सोः
श्रीमद्वंशधरस्य मेऽत्र शरणं सर्व्वार्थचिन्तामणिः ॥
मातुलश्रीजगन्नाथाद्धीत्य न्यायदर्शनं ।
श्रीमद्वंशधरस्तत्र तत्त्वं सम्यक् परीक्ष्यते ॥
शास्त्रादौ तावत्प्रयोजनोपायतावगमादेव प्रवर्त्तन्ते प्रेक्षावन्त इति । शिष्याणां प्रवृत्त्यर्थं भगवान् महर्षिः गोतमः प्रयोजनाभिधेयसम्बन्धानाह-प्रमाणप्रमेयेति । इत्यादि ।

End. अन्वीक्षाः प्रथमाध्याये द्वितीयाह्निकगोचराः ।
तत्त्वैः परीक्षिताः सम्यक् श्रीवंशधरशर्म्मणा ॥

Colophon. इति न्यायतत्त्वपरीक्षायां प्रथमोऽध्यायः । सन् ११८७ ।

विषयः । न्यायसूत्रस्य प्रथमाध्यायान्तं व्याख्यानं ।

No. 1878. दुर्गाभक्तितरङ्गिणी ।

Substance, country-made paper, 10 × 3 inches. Folia, 22. Lines, 9 on a page. Extent, 594 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhâṅgá, Paṇḍit Chhoṭí Jhá. Appearance, old. Prose and verse. Correct.

Durgábhaktitaraṅginí. A manual for the performance of the Durgá Pújá. By Mádhava Mahámahopádhyáya.

Beginning. दुर्गादेवीं नमस्कृत्य सुखसौभाग्यदायिनीं ।
क्रियते माधवेनेयं दुर्गाभक्तितरङ्गिणी ॥
तत्राश्विनशुक्लप्रतिपदि कलशस्थापनं । तत्र वृहस्पतिः । इत्यादि ।

End. ततः शान्तिकलशजलेन आत्मानमभिषिच्य दक्षिणां दद्यादिति नवरात्रविधिः ।

Colophon. इति महामहोपाध्यायश्रीमाधवकृता दुर्गाभक्तितरङ्गिणी समाप्ता ।

विषयः । सप्रमाणं नवरात्रपूजाविधिकीर्त्तनं ।

No. 1879. भेददीपिका ।

Substance, Palm-leaf, 11 × 2 inches. Folia, 60. Lines, 5 on a page. Extent, 1,143 s'lokas. Character, Maithilí. Date, L. S. 502. Place of deposit, Magráṇi, Post Madhubaní, Darbhâṅgá, Paṇḍit Chhoṭí Jhá. Appearance, old. Prose. Correct.

Bheda-dípiká. A refutation of the non-dual theory of the Vedánta in course of which most of the leading systems of philosophy are discussed. By Mádhava Miśra, Mahámahopádhyáya.

Beginning. अन्योन्यतात्त्विकभिदाश्रयविश्वभेदि
जीवातिरेकनिधिरीशपदाभिधेयः।
सत्याभिरामगुणधाम स रामचन्द्रः
सत्यप्रपञ्चसविता जयतां सदा नः॥
यं श्रीमती श्रीरपरा गधाधरादसूत शास्त्राम्बुधिपारदृश्वनः।
श्रीमाधवो न्यायमहाटवीतटे प्रविश्य सिद्धान्तपथे स खेलति॥
माधवेन हरिभक्तिभञ्जिताशेषकिल्विषभारेण तन्यते।
भेदवर्त्मनि विवेकदीपिका मायिमोहतिमिरापनुत्तये॥
अथ केचिदूचुरनिर्व्वचनीयं मिथ्यैवेदमाविद्यकं ब्रह्मविवर्त्तो जगत् इत्यादि।

End. सर्व्वशून्यता च स्वशून्यताशून्यतायां व्याहतिमादधती पूर्णतामेव विश्वस्य आदधती—इत्यलमतिविस्तरेण।

Colophon. इति महामहोपाध्यायश्रीमाधवमिश्रकृता भेददीपिका समाप्ता। लं सं ५०२। भाद्रकृष्ण १४।

विषयः। मायावादविज्ञानवादादीनामुपन्यासपूर्व्वकं प्रत्येकं खण्डनं। मिथ्यात्वसाधन-मिथ्याशब्दव्युत्पत्त्यादिविरोधविवेचनं। अन्यथाख्याति—असत्ख्याति—अख्याति—अपरोक्षख्याति—परोक्षख्यातिवाददूषणं। सद्विलक्षणत्वमेव असत्त्वमितिनिरूपणं। यस्य हि यद्रूपं परैरभ्युपगतं तन्निषेधेनैव तस्य मिथ्यात्वसिद्धिः रूपान्तरस्य मानाभावादेवासिद्धेरित्यादिना मिथ्यात्वस्वरूपकथनं। अत्यन्ताभावस्वरूपविवेचनं। सप्रकारकप्रमित्यविषयत्वमनिर्व्वचनीयत्वमितिवाददूषणं। चिद्विषयत्वं दृश्यत्वमिति पक्षाक्षेपकीर्त्तनं। फलव्याप्यत्वं वेद्यत्वं, फलञ्च विषयावच्छिन्नान्तःकरणवृत्तिप्रतिफलितचैतन्यमिति मतनिरसनं। एवं जड़त्वादीनां स्वरूपविवेचनं। भिन्नत्वलक्षणादिचिन्तनं। प्रपञ्चसत्यत्वे प्रमाणनिरूपणं। प्रमातृत्वादीनां स्वरूपविवेचनं। प्रमादिनिरूपणं। प्रपञ्चस्य सत्यत्वसंस्थापनं। अत्र वाचस्पतिमिश्रकृतभामत्या दूषणादिकं। न च प्रत्यक्षमपि-व्यावहारिकसत्त्वविषयत्वात् सावकाशं व्यावहारिकसत्त्वं हि सत्त्वावान्तरभेदो वा सत्त्वानधिकरणत्वे सति प्रतीयमानत्वं वा इत्यादिना व्यावहारिकसत्त्ववादखण्डनं। तत्त्वमस्यादिश्रुतिवाक्यानां द्वैतपरत्वेन तात्पर्य्यनिरूपणं। प्रत्यक्षानुमानोपमान शब्दप्रपञ्चसत्यत्वे प्रमाणानां वाधापेक्षया मिथ्यात्वप्रमाणत्वाभिमतकतिपय वेदान्तवाक्यनामेव अन्यपरत्वकल्पनं न्यायः 'तथाहि' एकमेवाद्वितीयं ब्रह्मेति

विषयः । श्रुतौ एकमेव इत्यनेन ब्रह्मनानात्वनिषेधः. एक एव राजा इत्यनेन राजनानात्व-निषेधवदित्यादिना अद्वैतवादखण्डनं। निर्व्विशेषवादखण्डनं। विश्वस्य मिथ्यात्वमपि सत्यं मिथ्या वा आद्ये अपसिद्धान्तः। अन्त्ये मिथ्यात्वाभावे सत्यत्वमवर्ज्जनीयमित्यादिना विश्वस्य सत्यत्वनिरूपणं। जीवादीनां लक्षणादिविवेचनं। एकजीववादखण्डनं। लिङ्गशरीरस्य अजन्यत्वे अनादिभावत्वेन नित्यत्वापत्तौ मुक्तावपि सत्त्वप्रसङ्गः, तादृशशरीरे मानाभावश्चेत्यनेन लिङ्गशरीराभ्युपगमाक्षेपकीर्त्तनं। निर्गुणवादखण्डनं। अतिरिक्ताज्ञानवादखण्डनं। ईश्वरोपादानकमित्यत्र किमुपादानत्वं न तावत् समवायिकारणत्वं स्वतोऽप्रसिद्धेः समवायस्यैवानभ्युपगमाच्च। नापि परिणामित्वं निर्व्विकारत्वश्रवणबाधादित्यादिना ब्रह्मोपादानत्ववादखण्डनं। लक्षणाविचारः। खण्डनखण्डखाद्यकारमताक्षेपः। ज्ञानस्वरूपविवेचनं अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वमित्यभ्युपगमदूषणमुखेन स्वप्रकाशवादखण्डनं। किञ्च नित्यज्ञानानन्दरूपस्य स्वप्रकाशत्वे ज्ञानत्वे इव नित्यानन्दादिरूपत्वे संशयादिकमावरणञ्च न स्यात्—इत्यनेन तन्मताक्षेपकीर्त्तनञ्च। आत्मा वारे श्रोतव्य इत्यादीनां तात्पर्य्यकथनमुखेन विधिस्वरूपादिविमर्शनं। मिथ्याज्ञानस्वरूपचिन्तनं आत्मख्यात्यादीनां स्वरूपनिरूपणं। शून्यतावादनिरसनञ्च।

No. 1880. स्फोटवादः।

Substance, country-made paper, 11 × 3 inches. Folia, 19. Lines, 9 on a page. Extent. 512 s'lokas. Character, Maithilí. Date, Sk. 1720. Place of deposit, Magráni, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose. Correct.

Sphoṭaváda. On the philosophy of grammar. By Nágésa Bhaṭṭa, son of S'iva Bhaṭṭa. 'Descriptive Catalogue of Sañskṛit Grammars in the Library of the Asiatic Society of Bengal,' p. 123.

Beginning. ननु कः स्फोटनामेति चेत्—शृणु। वर्णस्फोटः पदस्फोटः वाक्यस्फोटः इत्यादि।

End. इदञ्च सूत्रादिप्रत्याहाराह्निकान्तादिस्थभाष्यकैयटादिषु तत्र तत्र आकरग्रन्थादिषु सूक्ष्मदृशां स्फुटा एव।

Colophon. इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतनागेशभट्टविरचितः स्फोटवादः सम्पूर्णः। शकाब्दा १७२०।

विषयः। स्फोटशब्दनिर्व्वचनं। वर्णस्फोटनिरूपणं। पदादिस्फोटनिरूपणं। व्यक्तिस्फोटनिरूपणमुखेन न्यायमीमांसादिमतखण्डनं। जातिस्फोटनिरूपणञ्च।

No. 1881. मासमीमांसा ।

Substance, country-made paper, 11 × 4 inches. Folia, 18. Lines, 9 on a page. Extent, 452 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose. Correct.

Másamímañsá. A dissertation on months, and their relation to religious rites. By Gokulanátha Upádhyáya.

Beginning. सोमं समन्ततं नत्वा साभिसोमावतंसिनं(?) ।
समासान्मासमीमांसामस्मि वक्तुं व्यवस्थितः ॥
मासस्तावच्चतुर्द्धा भवति । चान्द्रः सौरः सावनो नाचत्रश्चेति । इत्यादि ।

End. तथा मलमासवति वर्षे ह्रासवृद्धी कल्पनीये इति सिद्धं ।

Colophon. इति महामहोपाध्यायश्रीगोकुलनाथोपाध्यायप्रणीता मासमीमांसा परिपूर्णा । समाप्तश्चायं ग्रन्थः ।

विषयः । चान्द्रादिमासानां स्वरूपादिचिन्तनपुरःसरं कर्म्मविशेषे तन्नियोजनं । तत्तन्मासकृत्यनिरूपणञ्च ।

No. 1882. परिभाषाविवेकः ।

Substance, country-made paper, 13 × 4 inches. Folia, 102. Lines, 7 on a page. Extent, 2,828 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose and verese. Correct.

Paribháshá-viveka. A dissertation on the different observances and rites which form parts of sacrificial ceremonies. By Varddhamána Mahámahopádhyáya.

Beginning. एकस्थं प्रणमन्ति नाकपतयस्तातेति चाम्बेति च
प्रस्थातुं पदमादधाति युगपद्भद्रे च सिंहे च यः ।
रूपं ताण्डवलास्ययोरभिनयत्येकेन यत्नेन यो-
व्यालुप्तव्यतिभेदमुग्रशिवयोस्तं देहबन्धं नुमः ॥
परितो व्याप्यताभाषा परिभाषाप्रदीपवत् ।
प्रकाशयत्येकदेशस्थितापि सकलं हि सा॥
तस्मात् साधारणीमेनां विवे + + कृजूक्तिभिः ।
यात्रा साधारणी या स्यात् प्रविवे + स्मि तत्र तां ॥

इह त्रिविधं कर्म्म काम्यं नित्यं नैमित्तिकमिति। इत्यादि।

End. वज्रञ्च मौक्तिकञ्चैवं माणिक्यं नीलमेव च।
तथा मरकतं ज्ञेयं महारत्नानि पञ्चधा॥
श्रीविल्वपञ्चकमहाकुलसम्भवेन विद्वन्महाकविभवेशतनूद्भवेन।
श्रीवर्द्धमानविदुषाऽविदुषां परेषामिष्टैषिणा विविविचे परिभाषितोऽर्थः॥

Colophon. इति महामहोपाध्यायमहाकविश्रीभवेशात्मजश्रीवर्द्धमानकृतौ परिभाषाविवेकः समाप्तः।

विषयः। नित्यनैमित्तिककाम्यानां लक्षणादिकथनपूर्व्वकं तत्तत्कर्म्मनिरूपणं। कर्कोपाध्यायमतेन द्विविधकर्म्मस्वरूपविवेचनं। कर्म्माधिकारिनिरूपणं। प्रवृत्तकर्म्मकथनं। निवृत्तकर्म्मनिरूपणं। कर्म्मकालनियमादिनिरूपणं। शिखासूत्रविधिचिन्तनं। शिखाबन्धनवत् केशबन्धनमपि कर्म्माङ्गमिति तन्निरूपणं। आचमनविधिः। सङ्कल्पवाक्यविवेचनादिकं। स्नानादिविधिविवेचनं। दैवे कर्म्मणि मातृपूजनादिकरणावश्यकताकथनं। सामान्यतः पूजास्थाननिरूपणं। पूजाविधानञ्च। वसुधारादानविधिः। श्राद्धविधिविवेचनं। निमन्त्रणादिविधिः। पाकादिविधिः। अनुपनीतद्विजातीनां स्त्रीणाञ्च शूद्रकल्पविधानं। मधुपर्कविधिनिरूपणं। मन्त्रपाठादौ ऋष्यादिज्ञानावश्यकताकथनं। छन्द आदिकथनं। तद्देवतादिकथनञ्च। होमपरिभाषानिरूपणं। होमद्रव्यपरिमाणकथनं। प्रदक्षिणविधिकथनं। अग्निनामानि। जपेतिकर्त्तव्यता। मालासंस्कारविधिः। दानपरिभाषाकथनं। तत्र दानस्वरूपादिविवेचनं। ब्राह्मणादीनां धनादिनिरूपणं। द्रव्यदोषादग्राह्यताकीर्त्तनं। द्रव्यदेवतानिरूपणं। देशकालादिकथनञ्च। दानविधिः। प्रतिग्रहविधिः। कन्यादानादिविधानकथनञ्च। युगादियुगान्तरमन्वन्तरादिव्यवस्थानिरूपणं। व्रतपरिभाषाकथनं। तत्र व्रतस्वरूपादिनिरूपणं। व्रतारम्भधर्म्मादिकथनं। एकादश्यादिव्रतव्यवस्थाकथनं। शिवादिपूजनविधिः। प्रायश्चित्तव्रतेषु विशेषकथनं। अक्रियादिषु व्यवस्थानिरूपणं। हस्तमध्ये तीर्थादिनिरूपणं। दर्भादिनिरूपणं। प्रतिनिधिस्वरूपादिविवेचनं। पूर्णपात्रनिरूपणमुखेन मानपरिभाषाकथनं। दक्षिणास्वरूपकथनादिकं। भूमिमानादिनिरूपणं। सप्तदशविधव्रीहिकथनं। चतुःसम-सर्व्वगन्धयक्षकर्द्दमादिगन्धगणकथनं। सर्व्वधातुगणनिरूपणं। कलशादिनिरूपणं। पञ्चभङ्गनिरूपणं। पञ्चामृतपञ्चगव्यादिनिरूपणं। पञ्चरत्नादिकथनञ्च।

No. 1883. अधिकरणकौमुदी ।

Substance, country-made paper, 15 × 4 inches Folia, 52. Lines, 7 on a page. Extent, 1,562 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post, Madhubaní, Darbháñgá, Paṇḍit Chhoṭi Jhá. Appearance, new. Prose. Correct.

Adhikaraṇa-kaumudí. A dissertation on the philosophy of sacrifices. By Devanátha Ṭhakkura, pupil of Soma Bhaṭṭa.

Beginning. पुराणमजरं देवं कामदं कामरूपिणं।
अनिद्रानं निद्रानन्तं योगिनं भोगिनं नुमः ॥
आस्ते देवः स्मरपरवशः स्मेरतारुण्यन्दत्य
प्रौढोत्तुङ्गस्तनभरलसत्कामिणीकामकेलिः ।
अस्मत्सेवापरवशमनाः किं जगन्नाथ तावद्-
भावी भावस्मरणकमले तावके मामकीनः ॥
धर्म्मशास्त्रेऽधिकरणं विचारेषूपकारकं ।
विदुषा देवनाथेन निर्व्वन्धेन निबध्यते ॥
परिसंख्यानियमयोस्तथा विध्यनुवादयोः ।
भेदकं कथ्यते सम्यक् पर्य्युदासनिषेधयोः ॥ इत्यादि ।

End. रत्नाकरे कल्पतरौ श्रीदत्तहरिनाथयोः ।
वाचस्पतौ निगूढं यत् तन्नाबन्धि गुरुक्रमात् ॥
सोमभट्टोपदिष्टेन पथा रुचिरतो मम ।
मीमांसाविषयारण्ये शरणं बत भारती ॥

Colophon. इति महामहोपाध्यायश्रीदेवनाथठक्कुरनिर्म्मिता अधिकरणकौमुदी समाप्ता ।

विषयः । अधिकरणस्वरूपविवेचनं । आत्माश्रयान्योन्याश्रयचक्रकानवस्था-व्याघात-प्रतिवन्धि-विनिगमनाविरह-उत्सर्ग-अनौचिती-कल्पनादीनां प्रत्येकं लक्षणनिरूपणं। तर्कप्रशंसा । धर्म्मलक्षणनिरूपणादिकं। वेदलक्षणादिनिरूपणं । आचारादीनां-लक्षणं । विधिस्वरूपविवेचनं । एवं परिसंख्यानियमानुवादानां स्वरूपादिचिन्तनं । अर्थवादस्वरूपचिन्तनं । पर्य्युदासनिषेधनिरूपणं । प्रसङ्गतन्त्रयोः स्वरूपादिकथनं । साहित्यमहत्वयोः लक्षणादिकीर्त्तनं । श्रुतिलिङ्गादिनिरूपणं । एषां बलाबलनिरूपणञ्च । विकल्पादिस्वरूपकथनं । इच्छाविकल्पे अष्टविधदोषनिरूपणादिकं। यागसिद्धिनिरूपणं । परिषदधिकरणस्वरूपादिविवेचनं । नक्ताधिकरणं । चमसाधिकरणं । अर्थवादविशेषयोः वैषम्यादिनिरूपणं । पाशाधि-

करणं। सर्व्वशक्त्यधिकरणं। कपालाधिकरणं। गवामयने गेद्दाधिकरणं। निषादस्थपतौ वीजविवेचनं। हविरुभयत्वाधिकरणं। विश्वजिन्न्यायनिरूपणं। अर्थवादाद्विधिकल्पनाधिकरणं। तद्याद्यन्तापकर्षन्यायकथनं। सर्व्वशाखाप्रत्ययाधिकरणं। प्रायणीयोदयनीयाधिकरणं। श्रुतिस्मृत्योः विरोधे श्रुतेर्गरीयस्त्वाधिकरणं। रात्रिसत्राधिकरणं। कपिञ्जलाधिकरणं। स्रुक्स्रुवाकादिवद्वाक्यभेदाधिकरणं। आरम्भसिद्धान्ताधिकरणं। पदावनीयाधिकरणं। खलेवालीयूपाधिकरणं। आर्थक्रमेण शब्दक्रमबाधाधिकरणं। आरुणीन्यायः। पदपांशुन्यायविवेचनं। सामान्यविशेषन्यायः। आश्रयिन्यायः। शंय्वधिकरणं। प्रतिनिध्यधिकरणं। अभ्युदितेष्ट्यधिकरणं। क्रमणाधिकरणं। देवताधिकरणं। सामान्यविधिकल्पनाधिकरणं। सत्राधिकरणं। अधिकारबलाबलाधिकरणं। संयोगपृथक्त्वन्यायः। गौणमुख्याधिकरणं। गुणलोपे मुख्यलोपाधिकरणं। आश्विनग्रहाधिकरणं। स्फ्यास्त्रिष्टेज्याधिकरणं। तत्राधिकरणं। अधिकरणादीनां प्रत्येकं स्वरूपकथनपूर्व्वकमुदाहरणप्रदर्शनञ्च।

No. 1884. पातञ्जलसूत्रभाष्यं।

Substance, country-made paper, 11 × 5 inches. Folia, 44. Lines, 10 on a page. Extent, 1,211 s'lokas. Character, Nágara. Date, Sm. 1852. Place of deposit, Magráṇi, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose. Correct.

Pátañjala-sútra-bháshya. A commentary on Pátañjala's aphorisms of the Yoga system. By Bhavadeva Miśra, Mahámahopádhyáya, son of Kṛishṇadeva Miśra. The work is very scarce, but not much quoted.

Beginning. पतञ्जलिं नमस्कृत्य योगिनोऽन्यांश्च भोगिनः।
भवदेवेन तत्सूत्रव्याख्यानं क्रियतेऽधुना।
मङ्गलं कुर्व्वन्नेव शिष्यावधानाय प्रतिजानीते अथेति।

End. इदमभिनवभाष्यं पूर्व्वभाष्यात् प्रसूतं
दिशि दिशि खलु दीपाद्दीपवच्चाकसीति।
सुगममिति सुधीभिर्दृश्यतामीशप्रसादाद्
भवतु च भवभीतिध्वान्तहारि त्रिलोक्याः॥
गङ्गातटे पट्टनपत्तनेऽस्मिन् विश्वं वपुर्विश्वसृजः समीक्ष्य।
निरीक्ष्य भाषादिकृतं प्रवीणै- रन्यैर्मया भाष्यमिदं व्यधायि॥

Colophon. इति मैथिलमिश्रश्रीकृष्णदेवतनयमहामहोपाध्यायमिश्रश्रीभवदेवकृतपातञ्जलसूत्रभाष्ये कैवल्यनिरूपणे चतुर्थचरणव्याख्या सम्पूर्णा। शुभमस्तु। संवत् १७५२।

विषयः। योगसूत्रस्य व्याख्यानं।

No. 1885. सिद्धान्ततत्त्वविवेकः।

Substance, country-made paper, 16 × 4 inches. Folia, 172. Lines, 9 on a page. Extent, 5,776 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. A second copy at Magráṇí, Post Madhubaní, Darbháñgá, Paṇdit Chhoṭí Jhá. Appearance, old. Prose. Correct.

S'iddhánta-tattva-viveka. A disquisition on the eternity of matter. By Gokulanátha Mahámahopádhyáya.

Beginning. प्रवहपवनवेगघट्टितोऽपि स्खलति नयज्जगदण्डपिण्डभारः।
लघुगुरुतुलनातुलाप्रकाण्डद्रढिमगुणः स भवद्गुणत्रयस्य॥
हिरण्यगर्भस्य गुरुः शरीर- संख्यालघुर्यः पुरुषः पुराणः।
अणोरणीयान् महतो महीयान् पश्यत्यचक्षुः स शृणोत्यकर्णः॥
सकलाङ्कुरकारिवीजानुगतं तदकारिव्यावृत्तं कुर्व्वद्रूपत्वं नाम सामान्यं न कल्पयितुमुचितं गौरवात्। इत्यादि।

End. अनन्यसूचिता मार्गास्तर्काणामुपदर्शिताः।
अनेन सम्प्रदेचेन्न दूरे तत्त्वविनिर्णयः।

Colophon. इति महामहोपाध्यायगोकुलनाथविरचितः सिद्धान्ततत्त्वविवेको नाम न्यायनिबन्धविशेषः समाप्तः।

विषयः। सामान्यादिनिरूपणमुखेन लाघवगौरवस्वरूपविवेचनं। दिक्कालयोः स्वरूपविवेचनं। अत्र दिक्कालौ नेश्वरादतिरिक्ताविति तथा ज्ञानप्रकारणभावस्येश्वरस्यैव शब्दसमवायित्वमिति शिरोमणिमतखण्डनं। द्रव्यपदार्थविवेचनं। द्रव्यसाक्षात्कारप्रकारकथनमुखेन इन्द्रियादिलक्षणविवेचनं। अन्तरिन्द्रियसाधनञ्च। प्रत्यासत्तिस्वरूपविवेचनं। परिमाणनिरूपणं। प्रत्यक्षप्रक्रियासाधनं। यदेव मूर्त्तत्वं तदेव भूतत्वमिति भट्टाचार्य्यमतखण्डनं। पृथक्त्वस्य गुणत्वमनङ्गीकुर्व्वतां मतखण्डनं। परत्वापरत्वस्वरूपविवेचनं। विशेषपदार्थविवेचनं। नीलादीनां सर्व्वेषां गुणानां अवच्छिन्नवृत्तिकत्वनिरूपणं द्रव्यनाशे कारणकथनं।

धात्वर्थविवेचनं। शाब्दबोधप्रक्रियाविवेचनं। संस्कारानुभवादिस्वरूपविवेचनं। अभावप्रत्यक्षतामनङ्गीकुर्व्वतां मतखण्डनं। कारणतास्वरूपनिरूपणं। यागादिध्वंसेनैव स्वर्गादिकमुपपादयतां धर्म्माधर्म्माभावविद्वेषिणां मतखण्डनं। संशयकारणकथनमुखेन चित्सुखादिमतखण्डनं। अनुगतलक्षणव्यवहारकारणनिरूपणं सत्त्वस्वामित्वादिलक्षणविवेचनं। संख्या-स्वत्व-शक्तिप्रभृतीनां पदार्थान्तरत्ववादखण्डनं।

No. 1886. कृत्यमहार्णवः।

Substance, country-made paper, 12 × 4 inches. Folia, 122. Lines, 7 on a page Extent, 3,811 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbhañgá, Paṇḍit Chhoṭi Jhá. Appearance, old. Prose and verse. Correct.

Krítya-mahárṇava. A philosophical disquisition on sacrificial rites. By Váchaspatí Mis'ra,—compiled under the patronage of Mahárájá Harináráyaṇa, of Tirhut.

Beginning. आभीरदारकमुदञ्चितकिङ्किणीकमाताम्रपाणिचरणं पुरुषं पुराणं।
मञ्जीरमञ्जुमरुणाधरमम्बुजाक्षमद्वैतचिन्मयमनादिमनन्तमीडे॥
आसीन्मैथिलमेदिनीशतमखः प्रत्यर्थिसीमन्तिनी-
नित्योद्गीतभुजप्रतापतपनप्रोत्तप्तसप्तार्णवः।
राजत्कीर्त्तिकुमुद्वतीपरिमलप्राग्भाविभूमण्डलो
राजा श्रोत्रियवंशभूषणमणिः श्रीमान् भवेशः कृती॥
अस्यान्ववायममलं विमलीकरिष्यन् कीर्त्त्या दिशो दश मुकुर्धवलीकरिष्यन्।
संग्रामसीमनि भटांस्त्रिदशीकरिष्यन् आविर्बभूव तनयो हरसिंहदेवः॥
एतस्माद्द्विजवंशभूषणमणिः सर्व्वार्थचिन्तामणिः।
षट्तर्कासरणिः प्रतापतपनप्रारब्धशृङ्गारणिः॥
प्रत्यर्थिक्षितिपान्धकारतरणिः श्रीदर्पनारायणो।
राजासीदवनीविभूषणमणिर्भूपालचूड़ामणिः॥
आनन्दयन् द्विजकुलं पितृकुलमुन्मीलयन्नखिलं।
एतस्मादजनि कृती श्रीहरिनारायणो नृपतिः॥

— — — — —

श्रीवासुदेवभक्तः श्रीसारदायां प्रसादमासाद्य।

श्रीमानयं नरेन्द्रः श्रीकृत्यमहार्णवं तनुत॥ इत्यादि।

End. मिथिलावलयविभाजः श्रीहरिनारायणस्य कीर्त्तिरेषा।
तावद्विकसतु भुवने यावद्विष्णुर्विरोचनो गगने॥

Colophon. इति सप्रक्रियमहाराजाधिराजश्रीहरिनारायणनिदेशान्महामहोपाध्यायसन्मिश्र श्रीवाचस्पतिविरचितः कृत्यमहार्णवः समाप्तिमगात्।

विषयः। धर्म्मस्वरूपविवेचनं। धर्म्मशास्त्रनिरूपणं। सामान्यतः परिभाषाकथनं। मलमासादिस्वरूपकीर्त्तनं। वैशाखकृत्यनिरूपणं। तत्र विशेषेण अक्षयतृतीयाकृत्यकथनं। ज्यैष्ठकृत्यं। आषाढ़कृत्यनिरूपणं। चातुर्म्मास्यव्रतक्रमनिरूपणं। श्रावणकृत्यनिरूपणं। तत्र विशेषेण अशून्यशयनव्रतनिरूपणं। भाद्रकृत्यनिरूपणं। तत्र कृष्णपक्षे पुष्यनक्षत्रे छन्दोगानामुत्सर्गाख्यकर्म्मविधानकीर्त्तनं। महालक्ष्मीव्रतनिरूपणं। आश्विनकृत्यनिरूपणं। हस्तादित्ये खञ्जनदर्शनविधिकथनं। देवीपक्षकृत्यनिरूपणं। पूर्णिमाकृत्यनिरूपणं। कार्त्तिककृत्यं। मार्गशीर्षकृत्यनिरूपणं। पौषकृत्यनिरूपणं। माघकृत्यनिरूपणं। फाल्गुणकृत्यं। विशेषेण शिवरात्रिविधानकीर्त्तनं। चैत्रकृत्यं। तत्र महावारुणादिविधानं। भोजनचतुर्द्दशीविधिः। सामान्यतः वारकृत्यनिरूपणं। विजयादियोगकृत्यनिरूपणं। गणेशव्रतविधानं। अविघ्नव्रतनिरूपणं। देवीव्रतानि। सौरव्रतानि। सामान्यव्रतानि। शिवव्रतानि। विष्णुव्रतानि। काम्यैकादशीव्रतानि। द्वादशीव्रतानि। तत्र कूर्म्मद्वादशीव्रतं। वराहद्वादशीव्रतं। वामनद्वादशीव्रतं। परशुरामद्वादशीव्रतं। राघवद्वादशीव्रतं। बुद्धद्वादशीव्रतं। कल्किद्वादशीव्रतं। पद्मनाभद्वादशीव्रतं। धरणीव्रतं। जन्मदिनकृत्यं। षष्ठीपूजाविधानं। सर्व्वगन्धगणकथनं। सर्व्वरत्नगणकथनं। सर्व्वधातुगणकथनं। सर्व्वौषधिगणकथनं। अष्टादशधान्यकथनं। कार्त्तिके दीपदानविधिकथनं। तिथिद्वैधव्यवस्थाकथनं। संक्रान्तिनिर्णयः। ग्रहणादिनिरूपणञ्च।

No. 1887. न्यायरत्नमाला।

Substance, country-made paper, 12 × 3½ inches. Folia, 95. Lines, 7 on a page. Extent, 1,985 s'lokas. Character, Nágara. Date, ? Place of deposit, Ujána, Post Madhubaní, Darbhañgá, Paṇḍit Yogadatta Jhá. Appearance, fresh. Prose and verse. Incorrect.

Nyáyaratna-málá. A metrical epitome of the Mímáñsá doctrine inculcated in the *Tantra-vártika* alias *Nyáyaratna* of Bhaṭṭa Kumárila

Svámí. By Párthasárathí Mís'ra. A corrupt codex of this work has been noticed under No. 1557. (IV, p. 134). The description there given is incorrect. Hall's 'Contributions,' pp. 170-172.

Beginning. आनन्दमव्ययं ज्ञानमजं साक्षिणमीश्वरं ।
ब्रह्म सर्व्वमसर्व्वञ्च वन्दे देवं हरिं विभुं ॥
मीमांसार्णवसम्भूतैः कुमारस्वामिनोद्धृतैः ।
न्यायरत्नैरहं मालां संग्रथ्नामि मनोरमां ॥
तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते ।
आचार्य्यदृष्टिमाश्रित्य प्रतिपक्षनिरासतः ॥
तत्र तावदिमं केचित् पूर्व्वपक्षं प्रचक्षते ।
आचार्य्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः ॥
प्रथमावगतत्वेन तद्धि युक्तं प्रयोजनं ।
तच्च वाक्यार्थविज्ञानं तद्धि पश्चात् प्रतीयते ॥
तेन विवक्षितार्थत्वाद्वेदस्यार्थविचारणं ।
न कर्त्तव्यमतः शास्त्रं मीमांसार्थमनर्थकं ॥
आचार्य्यकरणकविधिप्रयुक्तस्य हि स्वाध्यायाध्ययनस्य प्रयोजनापेक्षायां पुरुषान्तरगामित्वेन इत्यादि ।

End. तस्मात् सिद्धः काम्यनित्ययोर्विशेष इति ।
पार्थसारथिना सम्यग् विशेषे नित्यकाम्ययोः ।
आचार्य्यमतमाश्रित्य न्यायलेशः प्रदर्शितः ॥

Colophon. इति पार्थसारथिमिश्रविरचितायां न्यायरत्नमालायां नित्यकाम्यादिविवेकः ।

विषयः । प्रथमतः स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिचर्च्चा । मीमांसाशास्त्रारम्भस्य प्रयोजनादिनिरूपणं । अध्ययनविधौ फलाश्रुतेस्तत्र विश्वजिन्न्यायेन न स्वर्गार्थतेतिनिर्णयः । तत्र अर्थज्ञानार्थत्वादध्ययनस्य तस्य च विचारमन्तरेणासम्भवात् तदनन्तरं धर्म्मजिज्ञासा कर्त्तव्येतिनिरूपणञ्च । विज्ञानस्य स्वतःप्रामाण्यं न तु परत इति निरूपणं । तत्र प्रामाण्यादिलक्षणविमर्शनं । वेदस्य उभयवादिसिद्धप्रामाण्याभावेन विचाराविषयान्नास्य स्वतःप्रामाण्यं सिद्ध्यतीति केषाञ्चिन्मतकथनं । वेदप्रामाण्यनिरूपणं । परत एव अर्थतथात्वरूपं प्रामाण्यं निश्चीयते इति परमतखण्डनञ्च । विधिस्वरूपविवेचनं । तत्र प्रवर्त्तकज्ञानादिनिरूपणं । भावनादिस्वरूपकथनं । अन्यान्यमतखण्डनपुरःसरं तदिदं कर्त्तव्यतारूपं प्रवर्त्तनारूपं, वा समीहितसाधनत्वमेव लिङादिभिरभिधीयते इति लिङाद्यर्थनिरूपणञ्च । व्या-

त्निवादकथनं। अत्र कार्य्यकारणभावादविनाभावनिश्चयस्तथा स्वभावात् कार्य्यकारणभावादविनाभावनियम इत्यादिकाणाद-शाक्यादिसिद्धान्तदूषणपूर्व्वकं व्याप्तिग्रहोपायकथनञ्च। वाक्यार्थनिरूपणं। तत्र शक्तिवादकथनं। आकाङ्क्षायोग्यतादीनां स्वरूपादिनिरूपणं। अन्यान्यमतखण्डनपुरःसरमभिहितान्वयवादसंस्थापनं। अपि च न वाक्यं पदानि वा साक्षाद्वाक्यार्थबुद्धिं जनयन्ति किन्तु पदस्वरूपाभिहितैः पदार्थैः वाक्यार्थः संलक्ष्यते इति मीमांसकमते वाक्यार्थोलाक्षणिक इति संस्थापनञ्च। नित्यकाम्ययोः वैषम्यं नास्तीति केषाञ्चिन्मतखण्डनपूर्व्वक तयोरन्योन्यं वैषम्यनिरूपणं।

No. 1888. पारिजातहरणं। (नाटकं)।

Substance, country-made paper, 10 × 3 inches. Folia, 20. Lines, 5 on a page. Extent, 237 s'lokas. Character, Maithilí. Date, ? Place of deposit, Dharmmapura, Post Madhubaní, Darbhañgá, Paṇḍit Gopála Ṭhákura. Appearance, old. Prose and verse. Correct.

Párijáta-haraṇa. A drama of the class called Rúpaka, founded on an incident in the life of Krishṇa. By Umápatidhara Upádhyáya. The story runs that on one occasion Krishṇa was engaged in a picnic with his family when Nárada paid him a visit, and presented him a celestial flower called *Párijáta,* which he had brought from the Nandana garden of Indra. Krishṇa gave the flower to his chief queen Rukmiṇí. Satyabhámá, another queen, who was present at the place, took this as a slight upon her, and was offended. To pacify her, Krishṇa sent for another flower, but Indra declined to give it. Thereupon Krishṇa, with the aid of Arjuna, assailed Indra, overcame him in battle, and brought away a number of the rare flower from his garden. The author was a poet of high rank in the court of Lakshmaṇa Sena of Bengal, and Jayadeva, in his Gitagovinda, eulogizes him highly. An inscription composed by the author is still extant.

Beginning. क्षौणी यस्य रदे म्रणालशकलं मूलार्णवः पल्वलं
स्वर्गङ्गा वसनं विभाति गगनं कस्तूरिका लेपनं।
चन्द्रश्चारुललाटचन्दनमुडुश्रेणी गतां माल्यतां
तेन श्रीधरणीधरेण हरिणा हिन्दूपतिः पाल्यतां॥

अपि च।

यस्यास्यं पूर्णचन्द्रं सुवचनममृतं दिग्जयश्रीश्च लक्ष्मी-
र्दोस्तम्भः पारिजातो भ्रुकुटिकुटिलिका सङ्गरे कालकूटः॥
तीव्रं तेजोऽग्निरौर्व्वः पदभजनपरा राजराज्यस्तटिन्यः।
पारावारो गुणानामयमतुलरसः पातु हिन्दूपतिर्वः॥

नान्द्यन्ते सूत्रधारः।

अलमतिविस्तरेण। आर्य्ये इहागम्यतां। प्रविश्य नटी। अज्ज आणवेदु। सूत्र। आदिष्टोऽस्मि यवनवनच्छेदनकरालकरवालेन विच्छेदगतचतुर्व्वेदपथप्रकाशकप्रतापेन भगवतः श्रीविष्णोर्दशमावतारेण हिन्दूपतिहरिहरदेवेन। यथा उमापत्युपाध्यायविरचितं नवपारिजातमङ्गलमभिनीय वीररसावेशं शमयन्तु भगवन्तो भूपालमण्डलस्य। इत्यादि।

End.

उर्व्वीं शस्येन गुर्व्वीं विलसतु सुखिनः सन्तु सर्व्वे च लोकाः।
क्षौणीपालः समन्तात् प्रवितरतु गुणं भावयित्वा वसूनि॥
साधूनां सन्निवासः सहपिशुनजनैरे + + केपि माभू-
दाशूद्धान्तं कवीनां भ्रमति भगवती भारती भङ्गिभेदैः॥

Colophon. इति महामहोपाध्यायकविपण्डितमुख्यश्रीमदुमापत्युपाध्यायविरचितं पारिजातहरणाख्यनाटकं समाप्तं।

विषयः। एकदा मधुमासे रुक्मिण्या सह वसन्तोत्सवमाधुर्य्यमनुभवन् श्रीकृष्णः प्रमदोद्याने समुपस्थित आसीत्। अथ तत्र सुमुखीसहाया सत्यभामापि समुपस्थाय तमुत्सवं संवर्द्धयामास। अत्रान्तरे पारिजातमञ्जरीसनाथकरेण नारदेन भगवन्तमभ्युपेत्य सङ्गीतालापेन भगवतः प्रीतिं जनयता पारिजातमञ्जरीयं रुक्मिण्याः करे समर्पिता। अथ सत्यभामा तद्दर्शनेन नितरां सन्तोषमापन्नापि, सुमुख्यास्तिरस्कारेण सन्धुक्षिताभिमानानला अलङ्करणादिकं विहाय रोषागारं प्रविवेश। अथ विदितवृत्तान्तो भगवानपि चरणसंवाहनादिना तस्याः प्रीतिं संजनयन्नेव पारिजातमञ्जरीलाभार्थं नारदमेव पुरन्दरपुरं प्रेरयामास। अथ नारदमुखात् अमरेशदुश्चेष्टितमाकर्ण्य अर्ज्जुनसहायेन उपेन्द्रेण इन्द्रं पराभूय पारिजातमञ्जरी समानिन्ये। वृत्तान्तमिममवलम्ब्य विरचितमिदं रूपकं।

No. 1889. न्यायनिबन्धप्रकाशः । (चतुर्थाध्यायः) ।

Substance, palm-leaf, 12 × 1⅓ inches. Folia, 71. Lines, 5 on a page. Extent, 1,312 s'lokas. Character, Maithilí. Date, L. Sen's, E. 355. Place of deposit, Ujána, Post Madhubaní, Darbhañgá, Paṇḍit Yogadatta Jhá. Appearance, old. Prose. Correct.

Nyáya-nibandha-prakás'a. A commentary on the *Nyáyanibandha*, alias *Nyáyavártika-tátparya*, of Uddyotakara. By Vardhamána Upádhyáya, son of Ganges'vara Upádhyáya. The work is exceedingly rare, and of high repute. The codex contains only the fourth chapter.

Beginning. अनादिभवसम्भूततापत्रयविनाशकृत् ।
तत्त्वज्ञप्तिर्मदीया तं कार्य्यमेयं शिवं नुमः ॥
नमस्कारस्तुतेरपि मङ्गलत्वान्मोचहेतुतत्त्वज्ञानविषयमीश्वरं स्तौति ।
यानासनेति । न्टणां पतिमीश्वरमथ राजानं नुमः स्तुमः, ईश्वरपचे यानं गमनं चेष्टा । इत्यादि ।

End. न तु स एवैतदाकार इत्यत आह इत्येवमिति ।
यस्तर्कतन्त्रशतपत्रसहस्ररश्मिर्गङ्गेश्वरः सुकविकैरव + + + + ॥
+ + + + पितुरधीत्य निबन्धमित्थं प्राकाशयत् कृतिमुदे बुधवर्द्धमानः ।

Colophon. इति महामहोपाध्यायश्रीगङ्गेश्वरात्मजमहोपाध्यायश्रीवर्द्धमानविरचिते न्यायनिबन्धप्रकाशे चतुर्थोऽध्यायः समाप्तः । शुभमस्तु । ल-सं । ३५५ । आश्विन शुदि ।

विषयः । न्यायनिबन्धस्य व्याख्यानं ।

No. 1890. गृह्यपद्धतिः ।

Substance, country-made paper, 10 × 5 inches. Folia, 60. Lines, 8 on a page. Extent, 1,534 s'lokas. Character, Nágara. Date, ? Place of deposit, Ujána, Post Madhubaṇí, Darbhañgá, Paṇḍit Gosáiñ Jhá. Appearance, new. Prose. Correct.

Gṛihya-paddhati. Detailed descriptions of the domestic rites enjoined in the Gṛihya Sútra of Páraskara. By Vásudeva Dîkshita.

Beginning. अथातो गृह्यसूत्रविहितानामाधानादिसर्व्वकर्म्मणां साधारणो विधिरुच्यते ।
तत्रावसथ्याधानादिषु वक्ष्यमाणेषु सर्व्वकर्म्मसु यजमानस्यैव कर्तृत्वं । इत्यादि ।

End. चक्षुः श्रोत्रं यशो बलं। यन्मे श्रुतमधीतं यन्मे मनसि तिष्ठतु तिष्ठत्विति ॥

Colophon. इति श्रीदीक्षितवासुदेवविरचितायां गृह्यपद्धतौ तृतीयं काण्डं समाप्तं।

विषयः। अत्र पारस्करगृह्योक्तानां सर्व्वेषां कर्म्मणां पद्धतिकथनं। तत्र पञ्चभूसंस्कारविधिकथनं। आवसथ्याधानविधिकथनं। मधुपर्कविधिकथनं। विवाहविधानं। राज्ञो रथाचभेदकर्म्मविधिकथनं। चतुर्थीकर्म्मकथनं। ऋतुकालाभिगमनविधिकथनं। पुंसवनविधिकथनं। सीमन्तोन्नयनविधिकथनं। जातकर्म्मविधिः। निष्क्रमणविधिः। अन्नप्राशनविधिः। चूड़ाकरणविधिः। व्रतबन्धविधिः। वेदारम्भविधिः। व्रतविसर्गविधिः। स्नातकस्य यमनियमादिविधिः। पञ्चमहायज्ञविधिः। उपाकर्म्मविधिः। उत्सर्गविधिः। लाङ्गलयोजनविधिः। श्रवणाकर्म्मविधिः। इन्द्रयज्ञविधिः। वृषातकाकर्म्मविधिः। सीतायज्ञविधिः आग्रहायणीकर्म्मविधिः। स्तरारोहणविधिः। चतुर्व्विधाष्टकाविधिः। शालाकर्म्मविधिः। मणिकावधानविधिः। शीर्षरोगभैषज्यविधिः। शूलगवविधिः। गोयज्ञविधिः। वृषोत्सर्गविधिः। उदककर्म्मविधिः। अर्घ्यपशुविधिः। सभाप्रवेशनविधिः। रथारोहणविधिः। हस्त्यारोहणविधिकथनञ्च।

No. 1891. गृह्यसूत्रविवरणं।

Substance, country-made paper, 10 × 4 inches. Folia, 64. Lines, 8 on a page. Extent, 1,270 s'lokas. Character, Nágara. Date, ? Place of deposit, Ujána, Post Madhubaní, Darbháṅgá, Paṇḍit Gosáiṅ Jhá. Appearance, new. Prose. Generally correct.

Gṛihya-sútra-vivaraṇa. A commentary on Páraskara's aphorisms on domestic rites. By Karka Upádhyáya.

Beginning. पारस्करकृतस्मार्त्तसूत्रव्याख्या गुरूक्तितः।
कर्क्कोपाध्यायकेनेयं तेने नत्वा जगद्गुरुं ॥
श्रौताधानादीनि कर्म्माणि उक्तानि।
तदनन्तरं स्मार्त्तानि अनुविधीयन्ते ॥
तत्रैतदादिमं सूत्रं।
अथातो गृह्यस्थालीपाकानां कर्म्म। व्याख्यास्यते—इति सूत्रशेषः। इत्यादि।

End. अथातः सभाप्रवेशनमित्यादि यत् तत्सर्व्वं निगदव्याख्यातमत्र।

Colophon. इति कर्क्कोपाध्यायकृतं गृह्यसूत्रविवरणं समाप्तं।

विषयः। शुक्लयजुर्व्वेदीयपारस्करगृह्यसूत्रस्य व्याख्यानं।

No. 1892. नान्दीमुखनिरूपणं ।

Substance, country-made paper, 10 × 2 inches. Folia, 15. Lines, 5 on a page. Extent, 148 s'lokas. Character, Maithilí. Date, ? Place of deposit, Ujána, Post Madhubaní, Darbháñgá, Paṇḍit, Bholi Jhá. Appearance, new. Prose and verse. Generally correct.

Nándímukha-nirúpaṇa. On the propriety of performing a S'ráddha on joyous occasions, such as marriages, initiations &c., to invoke the blessings of the manes, and the details thereof. By Hṛidayanátha S'armá, of Mithilá.

Beginning. गिरिजाङ्घ्रिरजोलेशपूता सुरतरङ्गिणी ।
तनोतु मे भवानीशकपर्द्दोत्तापहारिणी ॥
अथाभ्युदयिकश्राद्धं निर्णीयते ।
मातृकापूजापूर्व्वकमाभ्युदयिकं सर्व्वत्र ।
कर्म्मादिषु च सर्व्वेषु मातरः सगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥
अभीष्टसम्पादनेन अनुगृह्णन्ति—इत्यर्थः ॥
अत्र पूजयन्तीति फलश्रवणात् प्रधानमेव मातृपूजनमिति । इत्यादि ।

End. अत एव दयाशीलाः सन्तः सर्व्वोपकारकाः ।
इत्येव हृदये नूनमवलम्बनमस्ति मे ॥

Colophon. इति सोदहपुरकुलसमुद्भवमैथिलश्रीहृदयनाथशर्म्मकृतनान्दीमुखनिरूपणं समाप्तं ।

विषयः । आभ्युदयिकश्राद्धस्य सप्रमाणेतिकर्त्तव्यतानिरूपणं ।

No. 1893. द्वैतनिर्णयः ।

Substance, country-made paper, 12 × 4 inches. Folia, 52. Lines, 8 on a page. Extent, 1,596 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sarvasímá, Post Madhubaní, Darbháñgá, Paṇḍit S'rínandan Ṭhákura. Appearance, old. Prose and verse. Correct.

Dvaita-nirṇaya. Dissertations on Smṛiti rites. By Narahari Mahámahopádhyáya. Contents: names of Bráhmans. Occasions when the nominative and when the genitive affix should be put after proper names in forming mantras. Philosophy of Dakshiṇá at religious rites. Do. of

gifts. S'ráddha before marriage. Weights. Lunar months. Intercallary months. Rites during such months. Mourning. Rites on the day after mourning. Persons entitled to perform S'ráddhas. Rules regarding S'ráddhas. Adoption. The rite of Vṛishotsarga. Bathing and offering of water to the manes. Use of Darbha grass. Time meet for S'ráddha. S'ráddhas during the wane. S'ráddhas on the day of Navánna. Do. during eclipses. The fast of Janmáshṭamí. The fast of Ekádas'í. Purifications. Rules regarding Sapiṇḍas. Inheritance.

Beginning. अनादावाचारे वज्ञतरविचारोज्ज्वलतरे।
परेषां केषाञ्चित् प्रसरति वृथा दूषणगणः॥
मुहुर्न्नत्वा तत्त्वावगतिशरणं तातचरणं।
हरेर्भक्त्या युक्त्या परिहरति तं श्रीनरहरिः॥
तत्रादौ नामनिर्णयः। शुभङ्करेत्याद्येव शर्म्मादिविनिर्मुक्तं नाम द्व्यक्षरं चतुरक्षरमित्यादि गृह्यदर्शनात्।

End. सा चावश्यं निरस्यैव इति प्रकाशव्याख्यैव श्रेयसीति रत्नाकरः। पतिपुत्रद्वारापि-मातृसंक्रान्ते सौदायिकतया आकाङ्क्षातौल्याद्वाक्यमिदं जागर्त्ति॥

Colophon. इति महामहोपाध्यायश्रीनरहरिकृतो द्वैतनिर्णयः समाप्तिमगात्।

विषयः। ब्राह्मणादीनां नामनिरूपणं। कर्म्मविशेषे नाम्नि प्रथमाषष्ठ्यादिविभक्तिप्रयोगनियमनं। दक्षिणादिस्वरूपादिविवेचनं। दानादिलक्षणनिरूपणं। आभ्युदयिकनिर्णयः। व्यवहारोपयोगिमाननिरूपणं। चान्द्रादिमासनिरूपणं। मलिम्लुचे शुक्लादिमासरीत्यैव व्यवस्थाकथनं। अधिमासादिनिरूपणं। तत्र कृत्यनिरूपणं। अशौचनिरूपणं। अशौचान्तदिने क्षतादिना दूषिते ज्येष्ठे कनिष्ठेनापि प्रेतश्राद्धानि कार्य्याणीतिव्यवस्थाकथनं। श्राद्धाधिकारिपरम्पराकथनं। श्राद्धविधिकथनं। दत्तकपुत्रग्रहणविधिकथनं। वृषोत्सर्गाधिकारिकथनं। एतद्विधानकथनं। स्नानतर्पणादिविधिकथनं। दर्भनिरूपणं। देवपूजाविधिकथनं। श्राद्धवेलानिरूपणं। अपरपक्षश्राद्धादिविधानकथनं। हैमन्तिकनवान्नश्राद्धविधिकथनं। ग्रहणनिमित्तकश्राद्धनिरूपणं। जन्माष्टमीव्रतविधानादिकथनं। एकादशीव्रतविधानादिकथनं। शुद्धिनिरूपणं। तत्र सापिण्ड्यादिविवेचनं। दायविभागकथनञ्च। ग्रन्थेऽस्मिन् सर्व्वत्र द्वैधविषये एव समीचीनव्यवस्थाकथनमिति ज्ञेयं।

No. 1894. कृष्णार्चनचन्द्रिका ।

Substance, country-made paper, 12 × 3 inches. Folia, 48. Lines, 5 on a page. Extent, 646 s'lokas. Character, Maithilí. Date, ? Place of deposit, Ujána, Post Magaraṇí, Darbháñgá, Paṇḍit Bholí Jhá. Appearance, Fresh. Prose and verse. Incorrect.

Kṛishṇárchana-chandriká. Directions for the worship of Kṛishṇa. By Rátnapáni. Compiled by order of a king of Mithilá.

Beginning. विघ्नारण्यदवं नवं युगयुगे भक्तानुकम्पाकरं ।
जन्यादिचितनुच्च तारकमनुं ध्यात्वाग्रये भक्तितः ॥
श्रीकृष्णार्चनचन्द्रिकां चि कलये श्रीमैथिलेशाज्ञया ।
प्रोद्यत्पण्डितमण्डलीषु विनतः श्रीरत्नपाणिः सुधीः ॥
अथ प्रासादाग्रे सतोरणं चतुर्द्वारं षोड़शस्तम्भं मण्डपं । इत्यादि ।

End. अप्रधानप्रतिमायाः सहस्नानं प्राणप्रतिष्ठाञ्च कृत्वा पूजनं कुर्य्यादिति बोध्यं ॥

Colophon. इति कृष्णार्चनचन्द्रिका समाप्ता ।

विषयः । विष्णुप्रासादविग्रहादिप्रतिष्ठाविधानकथनं । तच्च प्रयोगकथनञ्च ।

No. 1895. तिथिनिर्णयः ।

Substance, country-made paper, 12 × 4 inches. Folia, 20. Lines, 7 on a page. Extent, 515 s'lokas. Character, Maithilí. Date, ? Place of deposit, Dharmmapura, Post Madhubaní, Darbháñgá, Paṇḍit Gopála Ṭhákura. Appearance, old. Prose and verse. Correct.

Tithi-nirṇaya. A dissertation on the lunar days and the religious duties appertaining thereto. By Subbañkara. This is different from the work described under No. 1837, p. 149.

Beginning. अद्वैताद्बोधगम्याय निर्गुणस्थितिहेतवे ।
जगतामादिभूताय नमस्ते परमात्मने ॥
विलोक्य मुनिवाक्यानि मन्द + + नुसारतः ।
तिथिद्वैधविधौ यत्नात् क्रियते तिथिनिर्णयः ॥
विप्रतिपन्नानां परस्परविरोधपरिहारो निर्णयः । इत्यादि ।

End. एतद्देव सुजनस्य लक्षणं दूषणेऽपि गुणमेव पश्यति ।
एतद्देव पिशुनस्य लक्षणं दूषणं किल गुणेऽपि पश्यति ॥

Colophon. इति श्रीशुभङ्करकृततिथिनिर्णयः समाप्तः शुभमस्तु ।

विषयः । निर्णयलक्षणं । तिथिद्वैधे व्यवस्थाकथनं । तत्र पञ्चदशतिथिषु पक्षादिभेदेन युग्माद्यादरादिविशेषनिरूपणं । क्षयाहतिथिव्यवस्था । नक्तव्रततिथिव्यवस्था । उपवासे नियमादिकथनं । अनध्यायतिथ्यादिलक्षणकीर्त्तनञ्च ।

No. 1896. जातकतिलकं ।

Substance, country-made paper, 9 × 4 inches. Folia, 124. Lines, 10 on a page. Extent, 3,078 s'lokas. Character, Nágara. Date, ? Place of deposit, Ujána, Post Madhubaní, Darbháñgá, Paṇḍit, Yogadatta Jhá. Appearance, old. Verse. Correct.

Játaka-tilaka. A comprehensive treatise on the casting of horoscopes. By Kamalákra Acháryá.

Beginning. महादेवहृषीकेशलोकेशाखण्डलादयः ।
स्मरन्ति यं विजयते स देवो वारणाननः ॥
प्रबोधवृत्तिशयनैर्यदधीनमिदं जगत् ।
स एक एव विश्वात्मा विभाति रविरीश्वरः ॥
वराहमिहिराचार्य्यः श्रीमानार्य्यभटः कृती ।
ब्रह्मगुप्तोऽतिमतिमान् जयन्ति गणकेश्वराः ॥
विश्वेश्वरं गुरुं वन्दे मन्देतरमहामतिं ।
गम्भीरगणनाम्भोधिसुधिन्धयमहाशयं ॥
प्रणम्य वनचामुण्डां विट्ठलं कुलदेवतं ।
होराशास्त्रमतिस्पष्टं कुरुते कमलाकरः ॥
पुराणमतशास्त्राणां रहस्यं यत्नाकुलं ।
भूयोऽनुभवसंशुद्धं तत्पूर्व्वमिह कथ्यते ॥
वृषभो मिथुनः कर्कः सिंहः कन्या तुलाधरः । इत्यादि ।

End. मेषान्त्यः कपिलः क्रूरश्चण्ड उद्यतदण्डदोः ।
लग्नवृत्तकलाभिज्ञः क्रियार्थी लोहितांशुकः ॥

Colophon. इति कमलाकराचार्य्यविरचिते जातकतिलके द्रेक्काणाध्यायः । श्रीरस्तु शुभं भवतु ॥

विषयः । राशिकथनं। तत्र वृषवृश्चिकसंक्रमे विषुवकाले दिनयामिन्योः समानमानताकथनं। सिंहराशिप्रवेशे सर्व्वेषां ग्रहाणां दक्षिणायनकथनं। तथा कुम्भप्राप्तानाञ्च तेषामुत्तरायणकथनं। पुलिशादीनामाचार्य्याणां मते ग्रहाणां गतिकथनं। अश्विन्यादीनान्तु गतेरल्पात्वात् सा नास्तीति पूर्व्वाचार्य्योक्ताभिप्रायकथनं। अत आधुनिकानां मतखण्डनं। वादरायणगर्गादीनां समये विषुवसंक्रमस्य कालवैषम्यप्रदर्शनं। राशीनां मूर्त्त्यादिनिरूपणं। इदानीन्तनविषुवादिकालविवेचनं। होरांशादिनिरूपणं। ग्रहाणामुच्चनीचत्वादिकथनं। भावकल्पनाविधिकथनं। द्वादशभावसाधनविधिकथनं। क्रूरसौम्यादिविवेचनं। सूर्य्यादीनां रूपकथनपूर्व्वकं तेषां प्रत्येकं प्रकृतिवर्णनं। द्रव्यविशेषे सूर्य्यादीनां अधिपत्वकथनं। बलाबलनिरूपणं। खेटादिनिरूपणं। शुभाशुभनिरूपणञ्च। स्त्रीणां प्रथमरजोदर्शने शुभाशुभनिरूपणं। गर्भग्रहणकालनिरूपणादिकं। निषेकादिनिरूपणं। कन्यापुत्रज्ञानकथनं। यमजमूकपङ्ग्वादिज्ञानोपायकथनं। तत्र तत्र कारणकथनञ्च। जन्मादिलग्ननिरूपणं। अरिष्टादिनिरूपणं। परमायुर्निरूपणं। अरिष्टभङ्गनिरूपणं। नाभसयोगादिनिरूपणं। आयुर्द्दायनिरूपणं। दशानिरूपणं। दशाफलकथनं। अन्तर्द्दशानिरूपणं। क्रमेण सूर्य्यादीनामन्तर्द्दशानिरूपणं। तनुभावफलनिरूपणं। धनभावफलनिरूपणं। सहजभावफलनिरूपणं। सुखभावफलनिरूपणं। सुतभावनिरूपणं। शत्रुभावफलनिरूपणं। जायाभावफलनिरूपणं। मृत्युभावफलनिरूपणं। धर्म्मभावफलनिरूपणं। कर्म्मभावफलनिरूपणं। लाभभावफलनिरूपणं। व्ययभावफलनिरूपणं। सूर्य्यादीनां भावफलनिरूपणं। तनुभावः। सहजभावः। सुहृच्चिन्तनं। सुतचिन्ता। शत्रुचिन्ता। जायाचिन्तनं। आयव्ययचिन्तनं। लग्नकेन्द्रभावफलनिरूपणं। द्यूनकेन्द्रभावफलनिरूपणं। भाग्यविचारः। अनफादियोगचतुष्टयबलकथनं। चन्द्रयोगः। सूर्य्ययोगः। द्विग्रहयोगकथनं। एवं त्रिग्रहचतुर्ग्रहादियोगकथनञ्च। प्रव्रज्याचिन्तनं। लग्नफलनिरूपणं। होरागुणकथनं। द्रेक्काणगुणकथनं। नवांशद्वादशांशादिकथनं। त्रिंशफलकथनं। रव्यादिराशिफलकथनं। लग्ने ग्रहदृष्टिफलकथनं। रव्यादिदृष्टिचारः। उच्चाद्याश्रयफलकथनं। कर्म्माजीवादिनिरूपणं। राजयोगादिनिरूपणं। राजभङ्गादिनिरूपणं। अशुभयोगादिनिरूपणं। स्त्रीजातके विशेषकथनं। निर्य्याणादिनिरूपणं। नष्टजातकविवेचनं। सूर्य्याद्यष्टवर्गफलनिरूपणं। वियोनिजन्मनिरूपणं। द्रेक्काणफलकीर्त्तनञ्च।

No. 1897. केशवपद्धत्युदाहरणं ।

Substance, country-made paper, 11 × 4½ inches. Folia, 44. Lines, 9 on a page. Extent, 1,790 s'lokas. Character, Maithilí. Date, ? Place of deposit, Ujána, Post Madhubaní, Darbháñgá, Paṇḍit Yogadatta Jhá. Appearance, old. Prose. Correct.

Kes'avapaddhatyudáharaṇa. Exercises for the illustration of the rules laid down in Kes'ava's treatise on the casting of horoscopes. By Vis'vanátha Daivajña, son of Divákara Daivajña.

Beginning. श्रीगणेशं नमस्कृत्य केशवीनामपद्धतेः ।
गणितं विश्वनाथेन क्रियते बालबुद्धये ॥
नत्वा विघ्नेति । अहं केशवः जातकपद्धतिं कुर्व्वे । जातस्येदं जातकं जातस्य बालकस्य जन्मान्तरार्ज्जितसद्सत्कर्म्मजनितशुभाशुभफलनिरूपकं शास्त्रं जातकमित्युच्यते ॥ इत्यादि ।

End. अस्या वक्तृणां श्रोतृणाञ्च शुभं भवतु । ये सुबोधानितिस्पष्टार्थः । इति ग्रन्थपाठकस्य फलश्रुतिद्वारा ग्रन्थप्रशंसा ।

Colophon. इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिते केशवपद्धत्युदाहरणेऽन्तर्दशाध्यायः । समाप्तोऽयं ग्रन्थः ।

विषयः । केशवकृतजातकपद्धतेर्व्याख्यानं ।

No. 1898. शिशुबोधिनी ।

Substance, country-made paper, 11 × 4½ inches. Folia, 108. Lines, 12—14 on a page. Extent, 5,919 s'lokas. Character, Maithilí. Date, Sm. 1788. Place of deposit, Ujána, Post Madhubaní, Darbháñgá, Paṇḍit Yogadatta Jhá. Appearance, old. Prose. Correct.

S'is'ubodhiní. A commentary on Nílakaṇṭha's 'Tájíkábhidhána,'—a work on horoscopy. By Mádhava Jyotirvit, son of Govinda Jyotirvit. Nílakaṇṭha was the son of Ananta of the Gárgya clan. An astrological work of this name occurs under No. 420, (I, p. 239) but it is totally different, and by a different author.

Beginning. हेरम्बं भुवनस्थशीर्षमधुलिट्संसक्तपादाम्बुजं ।
गौरीहृत्कमलप्रसारतरणिं विघ्नाटवीपावकं ॥

इष्टदैरिकुलान्तकं सुमनसां सिद्धि × + द्विप्रदं ।
सिन्दूरारुणगण्डयुग्ममनिशं भालौषधीशं भजे ॥
— — — — — — — —।
तत्र तावत् सकलमुनिश्रेष्ठगार्ग्यवंशतिलको निखिलदैवज्ञमुकुटहीरः अनन्त ज्योतिर्व्वित्तनूजः श्रीनीलकण्ठज्योतिर्व्वित्संज्ञातन्त्रवर्षतन्त्रप्रश्नतन्त्ररूपप्रकरण-त्रयात्मकस्य जीर्णताजिकशास्त्रस्य प्रथमं प्रकरणं संज्ञाविवेकनामक— — ताजिकग्रन्थमुपजातिकया प्रतिजानीते प्रणम्येति ॥

End. शाक्तपचगश्चौ शिवपूर्य्यां ग्रन्थपूर्त्तिमगात्। तस्मान्मह्यमिष्टफलदो गणनायक इति ।

Colophon. इति विद्वद्दैवज्ञमुकुटभूषणगोविन्दज्योतिर्व्वित्सुतमाधवज्योतिर्व्विद्विरचिता शिशु-बोधिनी समाप्ता ।

विषयः । नीलकण्ठकृतताजिकाभिधानज्योतिर्न्निबन्धस्य व्याख्यानं ।

No. 1899. हरिश्चन्द्रचरित्रं ।

Substance, country-made paper, 11 × 3½ inches. Folia, 40. Lines, 6 on a page. Extent, 570 s'lokas. Character, Maithilí. Date, ? Place of deposit, Ujána, Post Madhubaní, Darbháñgá, Paṇḍit Yogadatta Jhá. Appearance, old. Verse. Correct.

Haris'chandra-charita. An epic poem on the life of Haris'chandra, a pious king of remote antiquity, who was, for his virtues, translated along with all his subjects to heaven, and there recounting his munificence and liberality in a vaunting style, was hurled to mid-air, where he exists with his subjects. The story is given in the Vishṇu Puráṇa. The codex breaks off at the end of the 5th canto, and the author's name has not been made out.

Beginning. जयति जगतत्रयरचाद्चस्त्राचः स दत्तयज्ञाधिः ।
अर्द्धाङ्गे गिरिकन्या गनेशिता यस्य तनयस्य ॥
शारदनीरदशशधरचन्दनघनसारकाशनीकाशा ।
दिशाज्जनताजड़तादलिनी नः सारदा धिषणाः ॥
आसीदशेषश्रिय एकगेहं रत्नाकरः शीलनिशाकरस्य ।
अनन्यसाधारणराजचिह्नधारी हरिश्चन्द्र इति चितीन्द्रः ॥ इत्यादि ।

End. इदानीमृषिजातानां कार्य्यं किञ्चन दृश्यते।
धनेन तदिदं राजन्नत्र मनञ्च तिष्ठतात्॥
तथेति नागइद्राजा शिरस्कृततदङ्गिकः!
— — — — — — —।

Colophon. इति हरिश्चन्द्रचरित्रे धीरचिह्ने पञ्चमः सर्गः। इतः परं खण्डितं!

विषयः। प्रथमे सर्गे हरिश्चन्द्रस्य शौर्य्यगाम्भीर्य्यादिगुणवर्णनं। तस्य रूपवर्णनं। प्रजार-ञ्जनवर्णनं। वैभववर्णनं। दैनिककृत्यवर्णनञ्च। द्वितीये सर्गे,—अकृतपरिणयस्य तस्य पुरतः चराणां शशिलेखाभिधानाया राजपुत्र्याः रूपवर्णनं। तया सह तस्य परिणयसम्बन्धवर्णनं। विवाहोत्सववर्णनं। पुरकामिनीनां विभ्रमवर्णनं। तृतीये सर्गे,—विलासस्थाननिर्म्माणादिवर्णनं। शशिलेखाया मौग्ध्यादिवर्णनं। केलिव-नादौ विलासवर्णनं। षड्ऋतुविहारवर्णनं। जलक्रीड़ावर्णनञ्च।
चतुर्थे सर्गे,—हरिश्चन्द्रसन्दर्शनाय समागतानां राजन्यानामाप्यायनादिवर्णनं। हरिश्चन्द्रस्य पुत्रजन्मोत्सववर्णनं। विश्वामित्रसमागमवर्णनञ्च।
पञ्चमे सर्गे,—हरिश्चन्द्रस्य सभाजनार्थं नारदस्यागमनवर्णनं। तयोरन्योन्यं सम्भाषणादिवर्णनं। नारदोपदेशेन हरिश्चन्द्रस्य यज्ञानुष्ठानविधिवर्णनञ्च। इतः परं नास्ति।

No. 1900. कारकवादः।

Substance, country-made paper, 10 × 3 inches. Folia, 20. Lines, 7 on a page. Extent, 349 s'lokas. Character, Maithilí. Date, ? Place of deposit, Dharmmapura, Post Madhubaní, Darbháñgá, Paṇḍit Gopála Ṭhákura; a second copy at Guptipáḍá, Paṇḍit Khudiráma Nyáyabhúshaṇa. Appearance, old. Prose. Correct.

Kárakaváda. A philosophical dissertation on the use of the case-affixes. By Krishṇa Bhaṭṭa.

Beginning. कारुण्यवर्षजलदं फलदं तपसां सतां।
नीलोत्पलदलश्यामं निर्म्मायं धाम कामदे॥
तर्कव्याकृतिमीमांसापरिशीलनशालिना।
मौलिश्रीकृष्णभट्टेन विभक्त्यर्थो विरच्यते॥
तत्र सुब्विभक्तीनामर्थो विरच्यते।

End. प्रकृतिविकृत्युभयकर्म्मस्थले तु स्वाद्युत्पत्तेर्यथोक्तिप्रसङ्गवारणाय दर्शितदिशा बोध्यं

Colophon. इति कारकवादः समाप्तः।

विषयः। कारकविभक्त्यर्थकथनं।

No. 1901. कर्क्कानुगपदार्थदीपिका, पौर्णमासेष्टिः ।

Substance, country-made paper, 10 × 4 inches. Folia, 44. Lines, 6—7 on a page. Extent, 577 s'lokas. Character, Nágara. Date, ? Place of deposit, Ujána, Post Madhubaní, Darbháñgá, Paṇḍit Yogadatta Jhá. Appearance, fresh. Prose. Correct.

Karkánuga-padártha-dípiká. A manual for the performance of Vedic rites according to the rules of Karka Upádhyáya, who explains the Sútras of A'pastambha on the rituals of the Black Yajur Veda. By Náráyaṇa, son of Rámachandra Yájñika Páṭhaka, and younger brother of Gangádhara. The codex is incomplete, and contains only the section on the Full-moon rites, Púrnamáśeshṭi.

Beginning. प्रणम्य विघ्नहर्त्तारं गुरुञ्च पितरं तथा ।
कर्क्कानुगपदार्थानां दीपिका तन्यते मया ॥
कृताग्न्याधेय उदगयने मलमासगुरुशुक्रमौढ्य-वार्द्धक्य-शैशव-सूतकादिरहितायां प्रथमपौर्णमास्यां इत्यादि ।

End. स्वाह वल्मीयोपस्थाने वा कर्त्तव्यमनेनैव मन्त्रेण स्वाहाकारस्त्वत्रापि ॥

Colophon. इति श्रीमन्महायाज्ञिकपाठकरामचन्द्रसुतश्रीमत्सकलयज्ञशास्त्रविशारदपाठकगङ्गाधरानुजनारायणकृतौ कर्कानुगपदार्थदीपिकायां पूर्णमासेष्टिः समाप्ता ।

विषयः । पूर्णमासेष्टिप्रयोगकथनं ।

No. 1902. तिथितत्त्वचिन्तामणिः ।

Substance, country-made yellow paper, 10 × 4 inches. Folia, 95. Lines, 6 on a page. Extent, 1,701 s'lokas. Character, Maithilí. Date, ? Place of deposit, Vehaṭ, Post Mádhápura, Darbháñgá, Paṇḍit Phanídhara Mis'ra. Appearance, new. Prose and verse. Generally correct.

Tithi-tattva-chintámaṇi. A calendar of fasts and festivals on the different days of the moon from month to month. By Mahes'a Ṭhakkura, Mahámahopádhyáya.

Beginning. कलयतु शुभवृन्दं कालिका कामदात्री
विशदयतु यशो मे सर्व्वदेशे मुकुन्दः ।

रमयतु कमला-मे सद्मनि प्रीतिजालै-
र्हरिचरणरजोभिश्चालितं मे मनोऽस्तु ॥
— — — — — — ।
वाणीप्रसादमासाद्य शास्त्रयुक्तिं विलोक्य च ।
मासि मासि तिथेस्तत्त्वं महेशेन विविच्यते ॥
स्मार्त्ताः पश्यन्तु मात्सर्य्यमुत्सार्य्य विधिसम्मतं ।
असाधवो विषीदन्तु सत्पण्डितकुतूहलैः ॥
शुद्धा विद्धा तिथिः प्रोक्ता द्विविधा धर्म्मशासनैः ।
संशयस्यापनोदाय विशेषोऽस्मिन् प्रदर्श्यते ॥
तत्र तिथिर्हि इत्यादि ।

End. भोच्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयां इति नक्तव्रतत्वात् सायाह्नव्यापिनी ग्राह्येति ।

Colophon. इति महामहोपाध्यायश्रीमहेशठक्कुरकृतौ तिथितत्त्वचिन्तामणिः समाप्तः ।

विषयः । तिथिस्वरूपकथनं । चान्द्रादिमासनिरूपणं । पक्षभेदेन तिथिव्यवस्थाकथनं । ग्राह्याग्राह्यतिथिज्ञापनविभागनिर्णयः । प्रातःसङ्गवादीनां लक्षणादिनिरूपणं । अरुणोदयकालविवेचनं । सामान्यतः कर्म्मयोग्यकालनिरूपणं । तत्र शुद्धाविद्धाभेदेन द्विविधतिथिकथनं । श्रावणमासादारभ्य प्रतिपदादिषु सर्व्वासु तिथिषु विहितानां कर्म्मणां क्रमेण व्यवस्थानिरूपणं । अत्र सर्व्वत्र गौड़दाक्षिणात्यमतसमालोचनपूर्व्वकं व्यवस्थाकथनमिति ज्ञेयं । तत्र श्रावणे गणेशचतुर्थी । नागपञ्चमी । हयग्रीवपूर्णिमा । संक्रान्तिव्यवस्था । भाद्रे कज्ज्वली तृतीया । वहुला चतुर्थी । शीतलाव्रतं । जन्माष्टमी कुशोत्पाटनविधिः हरितालिकाव्रतं । रम्भाव्रतं । सङ्कटचतुर्थीव्रतं । गौरीचतुर्थीव्रतं । नष्टचन्द्रदर्शनविधिः । ऋषिपञ्चमी । सूर्य्यषष्ठी । दूर्व्वाष्टमीव्रतं । नवमीप्रसङ्गेन रामनवमीव्यवस्थानिरूपणं । तथा दशमीप्रस्तावेन दशहराव्यवस्थाकीर्त्तनञ्च । विस्तरेण एकादशीव्यवस्थानिरूपणं । नक्तव्रतव्यवस्था । एकादशीव्रताशक्तस्य कर्त्तव्यताकथनं । एकादशीव्रतविधिः । अनन्तव्रतं । अगस्त्योदयविधिः । आश्विने अश्वयुक्कृष्णपक्षव्यवस्था । चन्द्रषष्ठी । महालक्ष्मीव्रतं । अन्वष्टकाश्राद्धं । मघात्रयोदशी । विषशस्त्रादिहतानां श्राद्धविधिः । शुक्लप्रतिपदि मातामहश्राद्धकर्त्तव्यता । नवरात्रविधिः । चण्डीपाठविधिः । विजयादशमीकृत्यं । कोजागरविधिः । प्रातःस्नानविधिः । कार्त्तिके तीर्थविशेषदर्शने फलविशेषकथनं । मालाधारणविधिः । पुष्पविशेषमाहात्म्यकथनं : आकाशदीपदानं । उल्कादानविधिः । अमावास्याकृत्यं । प्रतिपदि गोक्रीड़नविधिः ।

द्यूतप्रतिपत्। भ्रातृद्वितीया। युगाद्याकृत्यं। भीष्मपञ्चकव्रतविधिः। हरेरुत्थान-कृत्यं। वैकुण्ठचतुर्द्दशी। मार्गशीर्षे,—कालाष्टमीकृत्यं। नागपञ्चमी। दत्तात्रेयपूजाविधिः। अष्टकाश्राद्धं। पौषे,—मन्वादिकृत्यं। अर्द्धोदयकृत्यं। माघे,—स्नानविधिः। गणेशचतुर्थी। यमतर्पणं। तिलचतुर्थी। कुन्दचतुर्थी माघी सप्तमी। भीष्माष्टमी। महामाघीकृत्यं। फाल्गुने,—अन्वष्टकाविधिः। शिवरात्रिः। होलिकोत्सवः। चैत्रे,—वसन्तोत्सवकृत्यं। वारुणीविधिः। गौरीश्वरतृतीया। गौरीव्रतं। दशावतारकालादिनिरूपणं। अशोकाष्टमी। लौहित्यस्नानविधिः। श्रीरामनवमी। कामदैकादशी। अनङ्गव्रतं। वैशाखे,—घटोत्सर्गविधिः। अक्षयतृतीयाकृत्यं। ज्यैष्ठे,—दशहराकृत्यं। निर्ज्जलैकादशीकृत्यं। सावित्रीव्रतं। आषाढे,—योगिनीव्रतं। रथयात्राविधिः। हरिशयनविधिः। चातुर्म्मास्यव्रतं। तत्र वर्ज्यावर्ज्यनिरूपणञ्च।

No. 1903. वसिष्ठसिद्धान्तः, वा विश्वप्रकाशः।

Substance, country-made yellow paper, 12 × 4 inches. Folia, 205. Lines, 10 on a page. Extent, 705 s'lokas. Character, Nágara. Date, ? Place of deposit, Vehaṭ, Post Mádhápura, Darbhañgá, Paṇḍit Phanídhara Mis'ra. Appearance, new. Verse. Incorrect.

Vasishṭha-siddhánta alias *Viśvaprakáśa.* An original treatise on astronomy and astrology. By Vasishṭha. A work of great repute and antiquity, but very rare. Vasishṭha was one of the patriarchs, but the work must be of a much later date. The work has a Pauráṇic style, and treats of the subject in the form of a dialogue between Vámadeva and Vasishṭha.

Beginning. नमस्ते चित्स्वरूपाय पराय परमात्मने।
योगिध्येयाय शान्ताय कालरूपाय विष्णवे॥
नैमिषे निमिषक्षेत्रे वामदेवो द्विजोत्तमः।
अभिवाद्य सुखासीनं वसिष्ठं परिपृच्छति॥
गुरो धर्म्मज्ञ शान्तात्मन् त्रिकालज्ञ दयानिधे।
सर्व्वशास्त्राण्यधीतानि त्वत्प्रसादान्महामुने॥
तानि सर्व्वाणि शास्त्राणि वृथारूपाणि भान्ति मे।
वेदनेत्रं विना तस्माज्ज्योतिःशास्त्रं प्रयच्छ मे॥

वसिष्ठ उवाच। साधु साधु महाभाग यन्मां त्वं परिपृच्छसि।

विस्तरेण प्रवक्ष्यामि यथाज्ञातं पितामहात्॥ इत्यादि।

End. सायनं तद्दहोराचं सूर्य्यादेरंशुसञ्चयं।

ज्ञेयं मध्यमानेन वामदेव द्विजोत्तम॥

Colophon. इति श्रीब्रह्मर्षिदेववसिष्ठप्रणीते विश्वप्रकाशे ग्रहकक्षाध्यायस्त्रयोदशः। श्रीरस्तु।

विषयः। वामदेवेन सह वसिष्ठस्य संवादेन ज्योतिश्चक्रसंस्थापनकालकथनं। ग्रहाणां भ्रमणकथनं। प्राण-पल-नाड़ीप्रभृतीनां लक्षणकथनं। चतुर्युगमानकथनं। मनुसन्धितिनिरूपणं। जलप्लावनकालनिरूपणं। एतत्तु सत्ययुगस्य १७२८००० वर्षमिते—इति ज्ञेयं। ग्रहाणां पातादिनिरूपणं। तेषामहोराचादिनिरूपणं। राशिनिरूपणं। चान्द्रमासादिनिरूपणं। पृथिव्याः परिधिनिरूपणं। लङ्का-यमकोटि-सिद्धपुर-रोमकाणां सन्निवेशनिरूपणं। सूर्य्योदयकालनिरूपणं। अधिमासनिरूपणं। क्षयमासनिरूपणं। ग्रहाणां परिधिनिरूपणं। ग्रहाणां मृदुचलपातनिरूपणं। खेटनिरूपणं। तदानयनप्रक्रियाकथनञ्च। आकर्षणेन ग्रहाणां वक्रा गतिर्भवतीतिनिरूपणं। क्रान्त्यानयनप्रकारकथनं। अयनांशानयनप्रकारकथनं। दिक्साधनप्रक्रियाकथनं। उदयास्तमयनिरूपणं। कालज्ञानोपायकथनं। शङ्कुच-न्द्रविधिकथनं। कालज्ञानार्थं मयूर-नर-वानर-कीरयन्त्रादिविधिकथनं। ग्रहण-ज्ञानोपायकथनं। अत्र सर्व्वत्र उपपत्तिकथनञ्च। सूर्य्यादीनां बिम्बानयनप्रकार-कथनं। परिलेखानिरूपणं। मीलनोन्मीलनकथनं। ग्रामविशेषे वर्णविशेषोत्-पत्तिकथनं। ताराग्रहाणां युद्धकथनं। तत्र अंशुमर्द्दनादीनां लक्षणकथनञ्च। नक्षत्राणां खखराशिवलये स्थितिनिरूपणं। ताराग्रहाणामुदयास्तमयज्ञानकथनं। शृङ्गोन्नतिकथनं। व्यतिपातस्य उत्पत्तिः। तन्माहात्म्यकथनञ्च। ब्रह्माण्डसंस्था-नादिकथनं। व्योम्नि निश्चलायाः पृथिव्या अवस्थानादिकथनं। यमकोटि-सिद्ध-पुरादीनां दूरत्वादिनिरूपणं। निरक्षदेशादिनिरूपणं। भूगोलविवरणं। दिन-रात्रिह्रासवृद्धिकारणकथनं। ग्रहाणां कक्षादिनिरूपणञ्च।

No. 1904. सोमसिद्धान्तः।

Substance, country-made paper, 11 × 3½ inches. Folia, 14. Lines, 9 on a page. Extent, 329 s'lokas. Character, Nágara. Date, Sm. 1857. Place of deposit, Vehaṭ, Post Mádhápura, Darbháñgá, Paṇḍit Phanídhara Mis'ra. Appearance, old. Verse. Incorrect.

Soma-siddhánta. An original treatise on astrology. Attributed to Soma, the moon. The codex is defective.

प्रथमपत्रं नास्ति ।

Beginning. — — — तं विज्ञेयं तच्चतुर्युगं ।

कृतादीनां व्यवस्थेयं धर्म्मपादव्यवस्थया ।

चतुर्युगानां सैका स्यात् सप्ततिर्म्मनुसम्भवः ॥ इत्यादि ।

End. तदेव देव तद्ब्रह्म वेदचक्षुः परं शुभं ।

अध्येतव्यं सदा विप्रैरुत्तमैर्वेदवादिभिः ॥

Colophon. इति श्रीसोमसिद्धान्ते चतुर्थे गोलाध्यायोऽष्टमः । समाप्तिमगमदयं ग्रन्थः ।

संवत् १८५७—

विषयः । युगधर्म्मादिनिरूपणं । मन्वादिनिरूपणं । जलप्लावनकालकथनं । कालादिपरिभाषा । ग्रहाणां पातकथनं । लङ्कादियमकोट्यादिषु सूर्य्योदयकालनिरूपणं । सूर्य्यादीनां परिधिकथनं । ग्रहभुक्तिकथनं । क्रान्त्यानयनप्रकारादिकथनं । ज्यानयनादिप्रकारकथनं । करणनिरूपणं । अयनादिनिरूपणं । दिक्साधनादिविधिकथनं । बिम्बादिकथनं । ग्रहणनिरूपणं । परिलेखादिनिरूपणं । ग्रहाणामुदयास्तसमयादिनिरूपणं । शृङ्गोन्नतिकथनं । व्यतिपातादिनिरूपणं । ब्रह्माण्डसंस्थानादिकथनं । आकाशे भूगोलस्यावस्थानादिकथनं । निरक्षदेशादिनिरूपणं । ध्रुवसंस्थानादिकथनं । ग्रहाणां गतिनिरूपणादिकं । ग्रहाणां चक्रगमनादिकारणकथनं । दिक्साधनयन्त्रादिकथनञ्च ।

No. 1905. भृगुसंहिता, वा योगसागरः ।

Substance, country-made yellow paper, 11 × 4 inches. Folia, 35. Lines, 8 on a page. Extent, 850 s'lokas. Character, Maithilí. Date, ? Place of deposit, Vehaṭ, Post Mádhápura, Darbhángá, Paṇḍit Phanidhara Mis'ra. Appearance, new. Verse. Correct.

Bhṛigu-sañhitá alias *Yogasára.* A treatise on astrology, like the last. It professes to give the substance of a conversation between S'ukra and Bhṛigu. In its present form it must be much later than the sages named.

Beginning. प्रणम्य केशवं शक्तिं ब्रह्माणं गणनायकं ।

पूर्व्वोक्तमनसास्थाय क्रियते योगसागरः ॥

त्रिंशद्वर्षसहस्राणि सप्तलक्षशतत्रयं ।
त्रेतायुगगते वर्षे योगसागरसम्भवः ॥

भृगुरुवाच । युगवेदाकृतिः संख्या जन्मतः प्रश्नतोऽपिवा । इत्यादि ।

End. पञ्चकृष्णलको माषो हाटकं सप्तमाषकं ।
अष्टकृष्णलको माषो रजतं दशमाषिकं ॥

Colophon. इति भृगुसंहितायां भृगुशुक्रसंवादे नानायोगफलं सम्पूर्णं ।

विषयः । शुक्रेण सह भृगोः संवादेन लोकानां शुभाशुभज्ञानसाधनयोगनिरूपणं । तत्र योगफलकथनं । तत्प्रतिकारकीर्त्तनञ्च । अथ योगाः,—मनोज्ञयोगः । विभवयोगः । सौम्ययोगः । यातुधान्ययोगः । भीष्मयोगः । जीमूतयोगः । विजययोगः । आनन्दयोगः । पिङ्गलयोगः । विकलयोगः । समयोगः । महोदधियोगः । पिशाचयोगः । दामिनीयोगः । वाग्भवयोगः । श्रीमुखयोगः । क्रूरयोगः । गजयोगः । षड्भवयोगः । अर्द्धाद्भुतयोगः । निपातयोगः । विलासयोगः । महिषयोगः । देवेन्द्रयोगः । राजयोगः । शूलयोगः । भास्करयोगः । चन्द्रान्तयोगः । दारुणयोगः । चन्द्रयोगः । चतुःसागरयोगः । सागरयोगः । आढ्हा योगः । त्रिष्वहा योगः । छत्रयोगः । वज्रयोगः । जगत्पतियोगः । कलापयोगः । मानसयोगः । अनुत्तरयोगः । शुक्रयोगः । शुभयोगः । वैजातिकयोगः । अद्भुतयोगः । शून्ययोगः । नन्दयोगः । जीवयोगः । श्रीपुष्टयोगः । कार्म्मुकयोगः । उन्नतयोगः । ऊर्द्धयोगः । आकृत्ययोगः । कार्य्ययोगः । विगतयोगः । कर्म्मूरयोगः । चन्द्रयोगः । मुद्रितयोगः । यवयोगः । साधारणयोगः । श्रीवत्सयोगः । राक्षसयोगः । सौरयोगः । भीषणयोगः । नहुषयोगः । केन्द्रयोगः । कुलयोगः । मातङ्गयोगः । पूजकयोगः । पावकयोगः । सर्व्वयोगः । धूम्रयोगः । चतुरयोगः । वर्द्धमानयोगः । वीरयोगः । प्रभायोगः । वर्व्वरयोगः । गोलयोगः । ध्वजयोगः । कुवेरयोगः । केदारयोगः । कारकयोगः । भृङ्गिरीटयोगः । ब्रह्मयोगः । समरयोगः । वज्रयोगः । शत्रुयोगः । लोहितयोगः । अनलयोगः । पाशयोगः । प्रजापतियोगः । विलासहानियोगः । खेटाक्षयोगः । मालायोगः । प्रमोदयोगकथनञ्च ।

No. 1906. प्रायश्चित्तपारिजातः ।

Substance, palm-leaf, 12 × 4 inches. Folia, 84. Lines, 6 on a page. Extent, 1,680 s'lokas. Character, Maithilí. Date, ? Place of deposit. Dharmmapura, Post Madhubaṇí, Darbháñgá, Paṇḍit, Gopála Ṭhakkura. Appearance, old. Prose and verse. Correct.

Práyaśchitta-párijáta. A dissertation on expiations or Práyaśchitta for accidental or voluntary transgressions of the rules of the Smṛiti. By Gaṇeśa Miśra, Mahámahopádhyáya.

Beginning. नत्वा रामपदद्वन्द्वं संसारार्णवतारणं ।
प्रायश्चित्तपारिजातो गणेशेन वितन्यते ॥
तत्र हारीतः। प्रयतत्वाद्वोपचितमशुभं नाशयतीति प्रायश्चित्तं। अस्यार्थः। इत्यादि।

End. अथ रहःकृतेषु सङ्कीर्णोपपातकानुपातक-महापातकेषु शतम + + मतं स्वचगायत्रीजपः। इति सर्व्वमवदातं।

Colophon. इति महामहोपाध्यायश्रीगणेशमिश्रकृतः प्रायश्चित्तपारिजातः समाप्तः।

विषयः। प्रायश्चित्तलक्षणं। उपपातकानुपातक-महापातकनिरूपणं। संसर्गविधिकथनं। धेनुमूल्यव्यवस्थाकथनं। प्रायश्चित्तपूर्व्वाह्नकृत्यनिरूपणं। व्रतनिरूपणं। गोवधप्रायश्चित्तकथनं। पञ्चविधवधनिरूपणं। अस्थिभङ्गादिप्रायश्चित्तं। चान्द्रायणशिशुचान्द्रायणादिनिरूपणं। प्रायश्चित्तपरीक्षणविधिः। क्षत्रियादिवधप्रायश्चित्तं। स्त्रीवधप्रायश्चित्तं। चाण्डालाद्यन्नभोजनादिप्रायश्चित्तं। अगम्यागमनादिप्रायश्चित्तं। भार्य्यायां मातृसम्बोधनादिप्रायश्चित्तं। गोमांसादिभक्षणप्रायश्चित्तं। रेतोमूत्रादिपानप्रायश्चित्तं। गवादिषु गमनप्रायश्चित्तं। भार्य्यानभिगमप्रायश्चित्तं। रजस्वलागमनप्रायश्चित्तं। पितृस्वस्रादिगमनप्रायश्चित्तं। सुवर्णमणिमुक्तादिस्तेयप्रायश्चित्तं। ब्रह्मवधप्रायश्चित्तं। सुरापानप्रायश्चित्तं। असत्यभाषणप्रायश्चित्तं। शपथपूर्व्वकसाक्ष्यदानादिप्रायश्चित्तकथनञ्च।

No. 1907. शब्दपरिच्छेदालोकः।

Substance, palm-leaf, 11 × 1½ inches. Folia, 151. Lines, 6 on a page. Extent, 3,825 s'lokas. Character, Maithilí. Date, L. Sen's E. 435. A. D. 1542. Place of deposit, Sarvvas'ímá, Post Madhubaṇí, Darbháṅgá, Paṇḍit S'rínandana Ṭhákura. Appearance, old, decayed. Prose. Correct.

A'loka. A commentary on the Chintámaṇi of Gaṅgeśa. By Jayadeva. The codex contains only the chapter on S'abda. It is three hundred and thirty-nine years old.

Beginning. न जाने श्रीजाने विहरितुमिह यन्यगहने
सम + नैवार्थानधिगमयितुं निर्म्मितिरपि।

तथाप्येतावत्यामपि किलविगत्यामद्द्भिह

— — — — — — — ॥

अथेति। इहायशब्दस्यानन्तर्य्यवचनत्वेन तत्त्वावधित्वेन उपस्थितस्य उपमान-निरूपणस्यैव इत्यादि।

End. तदेव विभाजकोपाधित्वेन उच्यतामतो न विभागव्याघात इत्यपि निरस्तं सति प्रमाणभेदे अनुगमकगवेषणादिति ॥

Colophon. इति महामहोपाध्यायमिश्रश्रीजयदेवकृतः शब्दपरिच्छेदालोकः समाप्त इति। लसं ४३५। श्रावणवदि।

विषयः। तत्त्वचिन्तामण्यन्तर्गतशब्दखण्डस्य व्याख्यानं।

No. 1908. लीलावतीटीका।

Substance, palm-leaf, 11 × 1½ inches. Folia, 190. Lines, 6 on a page. Extent, 5,244 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sarvvasímá, Post Madhubaṇí, Darbháñga, Paṇḍit S'rínandana Ṭhákura. Appearance, old, decayed. Prose. Correct.

Lílávatí-ṭíká. A commentary on the Nyáya-lílávatí of Vallabha A'chárya. By Bhagiratha Miśra. The codex is defective.

Beginning. सद्योदलितदैत्येन्द्रदलद्दयदिदृक्षया।
विस्फारितं चतुर्द्दिक्षु नरसिंहं नमाम्यहं ॥
आसेविता गुणवतापि निगूढ़भावा
लीलावती गुणवती न मुदं तनोति।
एतत्प्र + + + + + गुणतस्तदस्या-
भावं भगीरथसुधीः सरलीकरोति ॥
ग्रन्यारम्भे विघ्नविघाताय कृतं मङ्गलं तत्र शिष्याणां शिष्टाचारविषयत्वरूपलिङ्ग-ज्ञानाय निबध्नाति—एकत्रेति।

End. अनुव्यवसायातिरिक्तस्थले सामान्ययोगजभिन्नस्य संस्कारस्यैव प्रत्यासत्तित्वमित्य-भिमान—

Colophon. इत्यतः खण्डितत्वात् परिसमाप्तिसूचकं वाक्यं नास्ति।

विषयः। न्यायलीलावत्या व्याख्यानं।

No. 1909. कण्टकोद्धारः ।

Substance, palm-leaf, 12 × 1½ inches. Folia, 174. Lines, 6 on a page. Extent, 5,579 s'lokas. Character, Maithilí. Date, L. S. 459. Place of deposit, Sarvasímá, Post Madhubaní, Darbháñgá, Paṇḍit S'ŕínandana Ṭhákura. Appearance, old. Prose. Correct.

Kaṇṭakoddhára. A gloss on Jayadeva's commentary on the 'Anumána-khaṇḍa' portion of the 'Tattva-chintámaṇi' of Gañges'a. By Madhusúdana Ṭhakkura. The codex is over three hundred years old.

Beginning. मधुसूदनसद्युक्तिसमुत्सारितकण्टकाः ।
आलोकयन्तमार्गेण मणिं गृह्णन्तु पण्डिताः ॥
अथ शब्दसूचनीयां सङ्गतिमाह प्रत्यक्षेति । यद्यप्युद्देशेन प्रसङ्गादिष्वपाठतस्त-थापि यथोद्देशं जिज्ञासौचित्यात् । इत्यादि ।

End. तत् स्वार्थानुमानश्रवणपरार्थानुमाने तत्र साध्यविशेषणत्वस्यापि — —

Colophon. इति महामहोपाध्यायसट्ठकुरश्रीमधुसूदनकृतो व्यतिरेककण्टकोद्धारः सम्पूर्णः ।
लसं ४५९ चैत्रशुदि ।

विषयः । तत्त्वचिन्तामण्यन्तर्गतानुमानखण्डस्य जयदेवमिश्रकृता आलोकनाम्नी या टीका तस्या व्याख्यानं ।

No. 1910. दण्डविवेकः ।

Substance, Palm-leaf, 14 × 2 inches. Folia, 187. Lines, 5 on a page. Extent, 3,963 s'lokas. Character, Maithilí. Date, L. S. 555. Place of deposit, Sáño, Darbháñgá, Paṇḍit Mádhava Jhá. Appearance, old. Prose and verse. Correct.

Daṇḍa-viveka. Penal offences, the propriety of inflicting punishment, and the different forms of punishment to be inflicted. By Vardhamána Mahámahopádhyáya, son of Bhaveśa. The author was a native of the village of Vilvapañcha, and the Chief Justice in the court of one of the chiefs of Tirhut. He says his work is founded principally on the Kalpataru, Kámadhenu, Háláyudhí, Dharmakosha, Smṛitisára, Kirtyaságara, Ratnákara, Párijáta, Vyavahára, Tilaka, Pradipiká, Pradipa and the original texts of Manu and Yájñavalkya with their commentaries. The codex is 223 years old.

Beginning. पाणिभ्यामुपजातवेपथुतया यत्नेन यः कल्पितो-
येन खेदजलौघपूरिततया नापेक्षितोऽम्बुग्रहः ।
सन्ध्यार्थत्वमवेत्य यो मुकुलिते सव्ये करे कम्बुना
सादृश्यं गतवान् स पातु शिवयोः सायन्तनोऽर्घ्याञ्जलिः ।
सार्द्धं राधिकया वनेषु विहरन्नस्याः कपोलस्थले
घर्म्माम्भोविसरं प्रसारिणमपाकर्त्तुं करेण स्पृशन् ।
तत्र प्रत्युत सात्त्विकाम्बुमिलनाद्वै जायमाने जवा-
दव्याद्वो विफलप्रयासविकलो गोपालरूपो हरिः ॥
दण्डस्यादौ परिकरस्ततः षट्तस्य हेतवः ।
उक्ता दण्डविवेकेऽस्मिन् परिच्छेदेषु सप्तसु ॥
तत्र दण्डप्रशंसायां मनुः । इत्यादि ।

End. न शक्यमन्योन्यविरुद्धधर्म्मिणो गणे + णैर्व्वक्तुमसौ प्रकीर्णकाः ।
उदाहृतास्तत्तदुपाधिकल्पनात्तथाप्यभीष्टार्थ + चित्यवाप्तये ॥

Colophon. इति महामहोपाध्यायधर्म्माधिकरणिकश्रीवर्द्धमानकृतौ दण्डविवेके प्रकीर्णकदण्डपरिच्छेदः सप्तमः ।
श्रीविल्वपञ्चान्वयसम्भवेन श्रीमद्भवेशस्य तनूद्भवेन ।
श्रीवर्द्धमानेन विदेहभर्त्तुः कृते कृतो दण्डविधौ विवेकः ॥
परकृतिमपि दृष्ट्वा निर्म्मितेऽस्मिन् निबन्धे
समुचितवचनोत्था लभ्यते कापि लक्ष्मीः ।
स्फुरति हि कुसुमानां शेखरे योजितानां
नव इव समुदायद्योतमानो विनोदः ॥
कल्पतरु-कामधेनू हलायुधश्च धर्म्मकोषश्च ।
स्मृतिसारकृत्यसागररत्नाकरपारिजातांश्च ॥
टीकासहिते द्वे संहिते च मनुयाज्ञवल्क्योक्ते ।
व्यवहारे तिलकञ्च प्रदीपिकाञ्च प्रदीपञ्च ॥
दृष्ट्वा कृतो निबन्धो निबन्धानिर्व्वन्धादेष वर्षेण ।
तदिमानिमञ्च दृष्ट्वा गुणदोषौ कल्पयन्तु मे सन्तः ॥
इति विल्वपञ्चग्रामीयकविश्रीमद्भवेशात्मजमहामहोपाध्यायधर्म्माधिकरणिकश्रीवर्द्धमानकृतौ दण्डविवेकः समाप्तः । लसं ५५५ ॥

विषयः । १ प्रथमपरिच्छेदे,—दण्डप्रशंसाकीर्त्तनं । अदण्ड्यदोषकथनं । अयथादण्डनिन्दाकथनं । सम्यग्दण्डगुणकीर्त्तनं । दण्डप्रणयनोपकरणकथनं । सभ्यादिनिरूपणं ।

शपथादिविधिकथनं। सभ्योपदेशकीर्त्तनं। सभ्यानां गुणदोषकथनं। दण्डभेदनिरूपणं। तत्र वाग्दण्डनिरूपणं। धिग्दण्डनिरूपणं। धनदण्डनिरूपणं। त्रिविधबधदण्डनिरूपणं। मानपरिभाषाकीर्त्तनं। व्यावहारिकीनैगमादिसंज्ञानिरूपणं। दण्डनिमित्तनिरूपणं। तत्र मनुष्यमारणस्तेय-परदाराभिमर्षण-वाक्पारुष्य-दण्डपारुष्य-प्रकीर्णकानि दण्डस्थानानीति निरूपणं। तत्र अभिघाताभिद्रोहरूपदण्डपारुष्यद्वैविध्यनिरूपणं। दण्डनिमित्तेषु दण्डभेदव्यवस्थाकीर्त्तनं। तत्र साधारणासाधारणभेदाद्द्विविधबाधकीर्त्तनं। अदण्ड्यकथनं। दण्डापकर्षकथनं। दण्डसाम्यनिरूपणं। दण्डोत्कर्षनिरूपणं। शारीरदण्डविधिकथनं। दण्डपरिनिष्ठाकथनं। तत्र दण्डनियमकथनं। दण्डप्रकारनियमकथनं। दण्डसमुच्चयकथनं। एकदण्डोत्तरसङ्कलनविधिकथनञ्च।

२ये परिच्छेदे,—मनुष्यमारणदण्डनिरूपणं। तत्र अविज्ञाते हन्तरि तद्विज्ञानोपायकथनं। तत्र प्रश्नप्रकारादिकीर्त्तनञ्च। ज्ञातस्य हन्तुर्दण्डकथनं। मर्म्माघातदण्डकथनं। प्रेरकस्य दण्डकथनं। साहसदण्डकथनञ्च।

३ये परिच्छेदे,—स्तेयदण्डनिरूपणं। तल्लक्षणादिनिरूपनञ्च। राजकृत्यकथनं। प्रकाशतस्करदण्डनिरूपणं। तत्र क्रयविक्रयादौ कूटव्यवहारिणां दण्डकथनं। राजव्यवस्थापितनदीनगरपर्व्वतसमुद्राद्यधिकरणकशुल्कादानदण्डकथनं। शुल्कापवादकथनं। कूटकारिणो वणिजो दण्डकथनं। पण्यनिर्म्माणोपजीविनो वणिजो दण्डकथनं। अनभिज्ञस्य चिकित्सकस्य दण्डकथनं। विश्रब्धवञ्चकानां दण्डकथनं। सभ्यानामन्यायवादिनां तथा उत्कोचार्थिनां दण्डकथनं। उत्कोचदायिनाञ्च दण्डकथनं। कूटसध्यमाचिणां दण्डकथनं। द्यूतकारदण्डकथनं। कूटव्यवहारिणो दण्डकथनं। अनभिज्ञस्य ज्योतिर्व्विदो दण्डकथनं। रजकस्य दण्डकथनं। छलेन परान् वञ्चयतो दण्डकथनं। मूल्यमादायापि शिल्पमप्रयच्छतां दण्डकथनं। अभिचारशीलतान्त्रिकयोर्दण्डकथनं। लोकवञ्चनार्थं ख्यातपक्षिवेशधारिणां दण्डकथनं। कुशीलवादिनां दण्डकथनं। अप्रकाशतस्कराणां दण्डकथनं सन्धिच्छिदस्तस्करस्य विशेषकथनं। मार्गतस्कराणां दण्डकथनं। द्रव्यविशेषहरणे दण्डविशेषकथनं। अनुक्तद्रव्यहरणे दण्डविधानञ्च।

४र्थे परिच्छेदे,—परदाराभिमर्षणदण्डकथनं। तत्र सङ्ग्रहणाभिगमभेदेन तस्य द्वैविध्यनिरूपणं। स्त्रीदण्डे विशेषकथनं। सङ्ग्रहणादीनामवान्तरभेदकथनपूर्व्वकं प्रत्येकं दण्डविशेषकीर्त्तनञ्च। बलच्छलादिना अभिगमे दण्डकथनं। तत्र अभिगम्याया गुप्तत्वागुप्तत्वकृत-तथाप्रातिलोम्यानुलोम्यकृतदण्डविशेषकथनं। अन्त्याभिगमनदण्डकथनं। स्वजनाभिगमे राजपत्न्यादिगमने च दण्डकथनं। कन्यादूषणदण्ड-

कथनं। कन्याहरणदण्डकथनं। विवाहयितुर्व्विवोढुश्च कूटकारिणो दण्डकथनं। स्त्रिया अपि कन्यादूषणदण्डकथनं। वन्ध्याद्यभिगमदण्डकथनं। पशुयोनिषु गमनादिदण्डकथनञ्च।

५मे परिच्छेदे,—वाक्पारुष्यदण्डकथनं। तत्र लक्षणादिविवेचनं। देशजाति-कुलाक्रोशे दण्डकथनं। ब्राह्मणादीनां परस्पराक्षेपदण्डकथनं। पारुष्यविशेषेषु दण्ड-विशेषकथनं। मिथ्याक्रोशदण्डकथनं। राजाक्रोशे दण्डकथनं। विशिष्य अनुपदि-ष्टानां वाक्पारुष्याणां दण्डनिरूपनञ्च।

६ष्ठे परिच्छेदे,—दण्डपारुष्यदण्डनिरूपणं। तत्र हस्त-लगुड़-पाषाणभस्म-कर्द्दम-पांशु-शस्त्रादिभिः प्रहरणे प्रत्येकं दण्डकथनं। पुत्रादीन् पारुष्याय प्रेरयत एव पित्रादेरपराधो न लन्ययेतिनिरूपणं। अदण्डनिमित्तनिरूपणं। लगुड़ादिना बुद्धि-पूर्व्वकमारणे दण्डकथनं। भार्य्यापुत्रदासादीनां निरतिप्रहारे दण्डकथनं। द्वयोः प्रहर्त्तले दण्डकथनं। आततायिनिरूपणानन्तरं तत्र तत्र दण्डकथनं। वहूनामेकं प्रहरतां प्रत्येकं दण्डकथनं। प्रहारार्थमुद्यतस्य दण्डकथनं। भस्मादिप्रक्षेपदण्डकथनं। शस्त्रादिकरणकप्रहारदण्डनिरूपनञ्च।

७मे परिच्छेदे,—प्रकीर्णकदण्डकथनं। प्रकीर्णकभेदनिरूपणं। तत्र विहिताकरण-निषिद्धाद्याचरणदण्डकथनं। मर्य्यादाभेदनदण्डकथनं। कूटशासनप्रयोगदण्डकथनं। राजाज्ञाप्रतीघातदण्डकथनं। पुरवासिजन-प्रकृतिप्रभृतीनां सम्भेदने दण्डकथनं। पित्रा पुत्रस्य विवादे दण्डकथनं। प्रतिग्रहविलोपादिदण्डकथनं। पाषण्डादिधर्म्मवि-पर्य्यये दण्डकथनं। प्रायश्चित्तव्यतिक्रमे दण्डकथनं। वर्णसङ्करदोषे दण्डकथनं। अशुल्कस्थाने तद्ग्रहणदण्डकथनं। शस्यघातनदण्डकथनं। निधिग्रहणादौ दण्ड-कथनादिकं। साहसदण्डकथनं। गृहादौ कण्टकादिनिक्षेपे दण्डकथनं। मार्गाद्यु-पघातदण्डकथनं। गृहकुड्यादिभेदनदण्डकथनं। पूज्यातिक्रमदण्डकथनं। अभ-क्ष्यादिना ब्राह्मणादिदूषणे दण्डकथनं। अहेतुकप्रतिग्रहत्यागदण्डकथनं। अभि-चारादिदण्डकथनं। अदुष्टदूषणदण्डकथनं। जारं चौरत्वेन कथयतो दण्डकथनं। अविक्रेयविक्रये दण्डकथनं। संक्रमादिभेदने दण्डकथनं। तड़ागादिभेदादौ दण्ड-कथनं। विषाग्निप्रयोगशीलायाः स्त्रिया दण्डकथनं। राजकोषापहारादौ दण्डकथ-नं। अदासीदासीकरणदण्डकथनं। राजानिष्टप्रकाशनदण्डकथनं। शुग्रदृषादिवाहने दण्डकथनं। आत्मघाते ततो रक्षिते च दण्डकथनं। पुत्रादिहीनाया धनं गृह्णतः परस्य दण्डकथनं। विशेषेण शूद्रस्य नियमातिक्रमे दण्डकथनं। अवध्यबन्ध-बध्यमो-चनयोर्द्दण्डकथनं। वादिनः प्रतिनिधिविषये व्यवहारे परार्थवादिनो दण्डकथनं। कूटसाक्षिनिर्द्देशदण्डकथनं। कूटसाक्षिदण्डकथनं। जानतः साक्षिणः कौटिल्या

दनिगदहे दण्डकथनं। लेख्यकूटकरणे दण्डकथनं। निर्णयोत्तरकृते दण्डकथनं। मिथ्याभियोगादै दण्डकथनं। पुमन्यायविषये दण्डकथनं। सोत्तरपणविवादविषये दण्डकथनञ्च।

No. 1911. अधिकरणचन्द्रिका।

Substance, country-made paper, 14 × 3½ inches. Folia, 112. Lines, 6 on a page. Extent, 2,164 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáño, Darbháñgá, Paṇḍit Mádhava Jhá. Appearance, old. Prose. Correct.

Adhikaraṇa-chandriká. On syllogisms with explanations and bearings of the various illustrations usually cited by authors. By A'padeva Mahámahopádhyáya.

Beginning. इन्दिराहृदयानन्दं फुल्लेन्दीवरलोचनं।
सानन्दं परमानन्दं वन्देऽहं नन्दनन्दनं॥
अथ अधिकरणनिरुक्तिः, यथा.—
विषयो विशयश्चैव पूर्व्वपक्षस्तथोत्तरं।
निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतं॥
इत्युक्तमभियुक्तैः। अस्यार्थः। यस्मिन् शास्त्रे विषयादिकं विचारस्य पञ्चाङ्गमधिक्रियते तच्छास्त्रमधिकरणं स्मृतमित्यर्थः। इत्यादि।

End. प्राकृतं धर्म्मं क्वचिदन्वययति क्वचिल्लुम्पति च। यथा इषुयागे श्रूयते शरमयबर्हिर्भवतीति॥
तत्र सामान्यतः दर्भमात्रस्यातिदेशप्राप्तौ शरस्य विशेषत एव उपदेशः। तथा गृहमेधिनामिष्टिविषये अतिदेशबलादेव दर्शकर्म्माज्यभागादेः सर्व्वस्य प्राप्तत्वे विशेषोपदेश इति विवेचनीयं।

Colophon. इति महामहोपाध्यायमीमांसकश्रीआपदेवकृता अधिकरणचन्द्रिका सम्पूर्णा।

विषयः। अधिकरणनिरुक्तिः। तन्त्रप्रसङ्गन्यायनिरूपणं। रथकाराधिकरणं। निषादस्थपत्यधिकरणं। ग्रहैकत्वाधिकरणं। हविरुभयत्वाधिकरणं। सर्व्वपिष्टाधिकरणं। फलचमसाधिकरणं। होलाकाधिकरणं। सर्व्वस्वदक्षिणाधिकरणं। रात्रिसत्राधिकरणं। परिषदधिकरणं। फलभूमाधिकरणं। प्रतिनिध्यधिकरणं। विरोधाधिकरणं। अर्थवादाधिकरणं। कपालाधिकरणं। कृष्णलन्यायनिरूपणं। स्फ्यास्विष्टेव्याधिकरणं। पदिन्यायनिरूपणं। पदाहवणीयन्यायनिरूपणं। देवताधिकरणं।

योगसिद्ध्यधिकरणं। कर्म्मण्यारम्भाधिकरणं। शंय्वधिकरणं। कौण्डपायिनामयनं। कपिञ्जलाधिकरणं। यूतपणन्यायनिरूपणं। दण्डापूपन्यायनिरूपणं। पर्णपूरणन्यायनिरूपणं। व्यक्तिवचनान्यायनिरूपणं। संयोगपृथक्त्वन्यायनिरूपणं। तदाद्युत्कर्षन्यायनिरूपणं। तदन्तापकर्षन्यायनिरूपणं। काम्यस्य नित्यापेक्षयाविलम्बिताधिकारकथनं। जातेष्ट्यधिकरणं। यावज्जीवाधिकरणं। अनुषङ्गाधिकारकथनं। आष्टमिकविकृत्यधिकरणं। प्रतिपत्त्यधिकरणं। खलेवालीन्यायनिरूपणं। देवतासाहित्यकथनं। पश्वधिकरणं। तिर्य्यगधिकरणं। सर्व्वशक्त्यधिकरणं। प्रक्रमाधिकरणं। तत्त्वसूत्राधिकरणं। आरम्भणीयन्यायनिरूपणं। ज्योतिरधिकरणं। सूत्यधिकरणं। विविदिषद्धिकरणं। प्राणाधिकरणं। हविरुपलक्षणाधिकरणं। अभ्युदितेष्टिन्यायनिरूपणं। आमिक्षाधिकरणं। अन्नाधिकरणं। सोमयाजिन्यायकथनं। अरुणान्यायनिरूपणं। हेतुमन्निगदाधिकरणं। पाशाधिकरणं। ऊहाधिकरणं। धान्यमधिकरणं। येयजामहन्यायनिरूपणं। नित्यानित्यवैषम्यकथनं। विध्यनुवादवैषम्यकथनं। सापेक्षत्वनिरपेक्षत्ववैषम्यकथनं। द्वयोः प्रणयन्त्यधिकरणं। परिभाषाधिकरणं। निषेधपर्य्युदासनिरूपणं। सर्व्वमानाधिकरणं। विधिनियमादिकीर्त्तनं। श्रुतिलिङ्गाधिकरणं। वैश्वानराधिकरणं। गुणविकृत्यधिकरणं। लिङ्गसमवायन्यायकथनं। गिरागिराधिकरणं। शक्त्यधिकरणं। अनुयाजाधिकरणं। प्रकृतिविकृतिविभागकथनञ्च।

No. 1912. स्मृतिसारसमुच्चयः, प्रथमखण्डः।

Substance, country-made paper, 15 × 4 inches Folia, 128. Lines, 6 on a page. Extent, 2,380 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáño, Darbháñgá, Paṇḍit Mádhava Jhá. Appearance, Fresh. Prose and verse. Correct.

Smṛitisára-samuchchaya. A compendium of the ordinances of the Smṛiti, including various fasts, festivals, ceremonials, expiations and penances. By Harinátha Mahámahopádhyáya. The codex comprises the first book (Khaṇḍa) which treats of the domestic religious duties of householders.

Beginning. नमामि यामिनीकान्तकान्तभालस्थलं शिवं ।।
शिवाहृदयसर्व्वस्वं सर्व्वं सर्व्वार्थसिद्धये ॥

अथासंस्कृतस्य कर्म्मण्यनधिकारात् संस्कारा एव प्रथमतो निरूप्यन्ते। अथाष्ट-संस्काराः। तत्र मनुः।

वैदिकैः कर्म्मभिः पुण्यैर्निषेकादिर्द्विजन्मनां।

कार्य्यः शरीरसंस्कारः पावनः प्रेत्य चेह च। इत्यादि।

End. औपादानिकत्वेन दोषः, तत् पर्य्यन्तं दोहनवाहननिषेधस्य तत्पर्य्यन्तविषया-भावात्, यावद्वचनं हि वाचनिकमितिन्यायात्॥

Colophon. इति महामहोपाध्यायश्रीहरिनाथविरचिते स्मृतिसारसमुच्चये प्रथमखण्डः समाप्तः।

विषयः। ब्राह्मणादीनां संस्कारावश्यकताकथनं। शूद्रस्यापि अमन्त्रकसंस्कारावश्यकता-कीर्त्तनं। स्त्रीणामुद्वाह एव औपनायनिकः संस्कार इति निरूपणं। तत्र तासामुप-नयनस्थाने विवाहः, गुरुशुश्रुषणस्थाने पतिसेवा, अग्निपरिचर्य्यास्थाने च गृह-कार्य्यमितिनिर्णयः। तत्र गर्भाधानसंस्कारविधिः। सीमन्तोन्नयनविधिः। सुखप्रस-वविधिकथनं। नाड़ीच्छेदविधिः। आयुष्यकरणविधिः। नामकरणं। निष्क्रा-मणविधिः। सूर्य्यप्रदर्शनविधिः। अन्नप्राशनविधिः। चूड़ाकरणविधिः। उपन-यनविधिः। तत्र यज्ञोपवीतादिनिरूपणञ्च। भिक्षाविधिः। सन्ध्योपासनविधिः। तत्र प्राणायामविधिकीर्त्तनञ्च। अनध्यायनिरूपणं। तत्र शास्त्रविशेषे कालविशे-षनिषेधकथनञ्च। कन्यादानाधिकारिनिरूपणं। सापिण्ड्यादिनिरूपणं। शौच-विधिकथनं। आचमननिमित्तकथनं। आचमनानुकल्पकथनं। दन्तधावनादि-विधिः। स्नानादिविधिः। तर्पणविधिः गायत्रीजपेतिकर्त्तव्यता। देवपूजाविधिः। पुष्पादिचयनविधिः। विशेषेण शिवलिङ्गादिपूजाविधिकीर्त्तनं। मनुष्ययज्ञवि-धिः। वैश्वदेवविधिः। तैजसादिद्रव्यशुद्धिकथनं। नित्यश्राद्धविधिः। भूमिशुद्धि-विधिः। उदक-पक्वान्न-मृन्मयादिपात्रशुद्धिकथनं। अतिथिपूजाविधिः। भोजन विधिः। इतिहास-पुराणश्रवणविधिः। शयनविधिः। सामान्यव्रतधर्म्मनिरूपणं। साध्वीधर्म्मकथनं। उपवासविधिः। तिथिद्वैधे व्यवस्थाकथनं। नक्तव्रतविधिः। सर्व्वत्र माघादिमासोल्लेखिव्रतादौ शुक्लप्रतिपदादिदर्शान्तश्चान्द्रमासो ग्राह्य इति-निरूपणं। मासलक्षणादिकथनं। मलमासकृत्यनिरूपणं। विघ्नव्रतप्रयोगकथनं। महाराजव्रतप्रयोगकथनं। शैवव्रतविधानं। वैष्णवव्रतविधानं। नागव्रतविधानं। सामान्यव्रतविधानञ्च। रुत्स्यादिभोजनविधिः। अशून्यशयनव्रतविधिः। नाना-तिथिकृत्यनिरूपणं। मेध्यामेध्यनिरूपणं। सर्व्वपापक्षयहेतुनिरूपणं। प्रायश्चित्त-धर्म्मनिरूपणं। ब्रह्मवधादिनिरूपणं। अत्र प्रायश्चित्तकथनञ्च। गोवधादिप्रायश्चि-त्तं। सुरापानादिप्रायश्चित्तं। सुरादिलक्षणं। अपेयक्षीरपानादिप्रायश्चित्तं। अभक्ष्यभक्षणप्रायश्चित्तं। भक्ष्य भक्ष्यनिरूपणं। रजस्वलादिगमनप्रायश्चित्तं। अ

स्पृश्यस्पर्शनप्रायश्चित्तं । अगम्यागमनप्रायश्चित्तं । निन्दितविवाहप्रायश्चित्तं । संसर्गप्रायश्चित्तं । ब्रह्मकूर्च्चव्रतनिरूपणं । वृषोत्सर्गविधिनिरूपणं । तत्र वृषोत्सर्गप्रयोगकीर्त्तनञ्च ।

No. 1913. स्मृतिसारसमुच्चयः, विवादप्रकरणं ।

Substance, Palm-leaf, 13 × 2 inches. Folia, 174. Lines, 5 on a page. Extent, 2,918 s'lokas. Character, Maithilí. Date, L. S. 363. Place of deposit, Darbháñgá, Bábu Guṇes'vara Siñha. Appearance, very old. Prose and verse. Correct.

Smṛitisára-samuchchaya. Part second of the work noticed under the last preceding No. It treats of Judicature.

Beginning. प्रथमतस्त्रीणि पत्राणि न सन्ति ।

— — — सर्व्वत्र युक्तियुक्तस्य ग्रहणात् ।

न हि क्वचिद्दर्णविशेषादेवं कुर्व्वन्ति । इत्यादि ।

End. अपि द्रव्यविभागो भवत्येव न स्वेच्छया पारतन्त्र्यात् । तदुक्तं ।

यदि कुर्य्यात् समानं सा पत्न्यः कार्य्याः समांशिकाः । इति ।

Colophon. इति महामहोपाध्यायश्रीहरिनाथोपाध्यायविरचिते स्मृतिसारे विवादप्रकरणं परिपूर्णं । लसं ३६३ फाल्गुन शुदि ।

विषयः । विवादपदनिरूपणं । ऋणदानविधिः । आधिविधिः । ऋणादानाधिकारिणः । निक्षेपविधिः । अस्वामिविक्रयविधिः । सम्भूयसमुत्थानविधिः । दत्ताप्रदानिकविधिः । दत्तविधिः । अदत्तविधिः । भृतकविधिः । वेतनस्यानपाकर्म्मकथनं । पण्यस्त्रीविधिः । स्वामिपालविवादकथनं । सम्विद्व्यतिक्रमविधिः । विक्रीयासम्प्रदानविधिः । सीमाविवादकथनं । विक्रुष्टाक्रुष्टविधिः । शस्यरक्षाविधिः । वाक्पारुष्यविधिः । दण्डपारुष्यविधिः । स्तेयविधिः । साहसविधिः । दायभागनिरूपणं । भागानर्हकथनं । असंस्कृतरक्षाविधिः । अविभाज्यनिरूपणं । स्त्रीधनविभागकथनं । वर्णसमयविभागकथनं । विभक्तजविभागविधिः । पुत्रान्तरविधिः । औरसक्षेत्रजादिपुत्रधनविभागकथनं । अपुत्रधनविभागकथनं । संसृष्टधनविभागकथनं । विभक्तकृत्यनिरूपणं । द्यूतसमाह्वयविधिः । विभागनिर्णयः । विभक्तागतविभागकथनं । बलाबलनिरूपणं । दण्डसंज्ञाकथनं । मानसंज्ञाकथनं । व्यवहारनिरूपणं । भाषाविधिः । उत्तरविधिः । संप्रतिपत्तिविधिः । प्रत्यवस्कन्दनविधिः प्राङ्न्यायविधिः । साक्षिदूषणविधिः । भुक्तिविधिः । अनुपभोगेन असिद्धिक-

यनं । भुक्त्यपवादकथनं । युक्तिनिरूपणं । शपथविधिः । द्रव्यसंख्यातो दिव्यविशेषविधिः । वर्णादितो दिव्यविशेषकथनं । जयपराजयावधारणविधिः । शपथजयभङ्गप्रकारकथनं । साक्षिश्रावणविधिः । हीनसाक्षिनिर्णयः । धनादिविधिकथनं । कृतनिवृत्तिविधिः । स्वतन्त्रास्वतन्त्रलक्षणनिर्णयः । उदकपरीक्षाविधिः । शूद्रधनविभागे विशेषकथनञ्च ।

No. 1914. आचारदीपिका ।

Substance, country-made paper, 15 × 5 inches. Folia, 52. Lines, 10 on a page. Extent, 1,593 s'lokas. Character, Nágara. Date, ? Place of deposit, Darbháñgá, Bábu Gunes'vara Siñha. Appearance, new. Prose. Incorrect.

A'chára-dípiká. A commentary on the A'chárádarsa of S'rídatta. By Harilála.

Beginning. शब्दाम्भोधिमगाधमाप्य सततं संविश्य कुर्व्वन्ति ये
सन्तस्ते सदसत्स्फुटं धिषणया धर्म्मार्थिनोवी + ताः ।
धन्या एव ततः प्रपञ्चसकलैस्तैरेव मन्ये + +
देवा देवनमस्कृताः + मुदिता यास्यन्ति मोक्षं परं ।
— — — — — — — — ॥
नमस्कृत्य महेशानं श्रीगुरुं जड़तापहं ।
हरिलालः सुबोधाय करोत्याचारदीपिकां ॥
प्रारिप्सितप्रतिवन्धकीभूतोपशमाय आशीर्व्वादात्मकमङ्गलमादौ शिष्यशिक्षायै निबध्नाति — दीक्षितोरणयज्ञे । इत्यादि ।

End. तथा मदुक्तं मन्वादिवचनाश्रितं मुक्तमालिन्यं ।
तथा हि यथा चर्म्मसम्बन्ध्युदकं गङ्गादितीर्थस्य सलिलं — — — तीर्थसलिलान्तर्गत + आप्तमित्यर्थः । — — — ।

Colophon. इति हरिलालकृता आचारदीपिका समाप्ता ।

विषयः । आचारादर्शस्य व्याख्यानं ।

No. 1915. पूर्णचन्द्रः, प्रायश्चित्तप्रकरणं ।

Substance, country-made paper, 16 × 4 inches. Folia, 142. Lines, 6 on a page. Extent, 3,384 s'lokas. Character, Maithilí. Date, Sk. 1641. Place of deposit, Darbháñgá, Bábu Gunes'vara Siñha. Appearance, old. Prose and verse. Correct.

Púrṇachandra. An elaborate treatise on Smṛiti rites. The codex comprises only that portion of work which treats of expiations, *Práyas'chitta*, giving details of all the various offences, faults and omissions for which expiations have been ordained, and directions for performing such rites. By Ripuñjaya.

Beginning. वाणी विराजते यस्य वदनेऽस्खलिता सदा ।
श्रीः स्थिरा हृदये यस्य तं श्रीकान्तमहं भजे ॥
सरस्वतीञ्च पितरं नत्वा तीर्थं + + + + ।
+ + + + + दासञ्च सङ्ग्रहानवलोक्य च ।
सारमुद्धृत्य क्रियते प्रायश्चित्तनिरूपणं
तत्र प्रथमं परिषन्निरूप्यते । इत्यादि ।

End. हारीतः । त्र्यहं प्रातः त्र्यहं सायमयाद्विप्रो व्रतं चरेत् ।
त्र्यहं पिबेत् पञ्चगव्यं त्र्यहञ्चोपवसेत् क्रमात् ।
प्राजापत्यव्रतञ्चैतत् कृच्छ्रञ्च व्रतसंज्ञकं ।

Colophon. इति श्रीरिपुञ्जयकृतौ पूर्णचन्द्रनामग्रन्थे प्रायश्चित्तप्रकरणे कृच्छ्रपरिच्छेदः समाप्तः ।
शकाब्दाः १६४१ ।

विषयः । परिषद्धर्म्मनिरूपणं । पारिभाषिकब्रह्मघातकलक्षणं । निमित्तिनोऽपि बधभागित्वनिरूपणं । प्रयोजकानुग्राहकादीनां लक्षणादिकथनं । ज्ञानतः साक्षाद् ब्रह्मबधे कृते सर्व्वेषां वर्णानां प्राणान्तिकं प्रायश्चित्तमितिनिरूपणं । मरणविधिकथनं । अज्ञानतो द्वादशवार्षिकव्रतविधानं । प्राजापत्यव्रतविधानं । तदशक्तौ धेनुदानविधिः । अत्र प्रयोजकादीनां प्रायश्चित्तविधानं । निमित्तान्तरेण ब्रह्मबधे प्रायश्चित्तकथनं । पितृमातृसोदरभ्रातृ-आचार्य्यश्रोत्रियाहिताग्नीनामज्ञानतः प्रत्येकं बधे प्रायश्चित्तविशेषनिरूपणं । स्त्रीबधप्रायश्चित्तं । गर्भबधप्रायश्चित्तकथनं । व्यभिचारिण्यादिबधप्रायश्चित्तं । क्षत्रियवैश्यादिबधप्रायश्चित्तं । एषां स्त्रीबधे प्रायश्चित्तं । आत्महननार्थमुद्यतस्य प्रायश्चित्तं । प्रायश्चित्ताभावकथनं । यदि पलायनादिप्रकारान्तरेण आत्मरक्षणं कर्त्तुं न शक्यते तदैव आततायिबधे दोषाभाव

विषयः। इति निरूपणं। वयोवस्थावशेन प्रायश्चित्तह्रासादिकथनं। तन्त्रतानिरूपणं। ब्राह्मणादिबधार्थमुद्यतस्य तत्राकृतार्थस्य च प्रायश्चित्तं। मोहात् ब्राह्मणमांसभोजनप्रायश्चित्तं। महापातकमुद्दिश्य शपथादिकरणप्रायश्चित्तं। क्वचिन्मिथ्याशपथे दोषाभावकीर्त्तनं। मैत्रीभङ्गनादिप्रायश्चित्तं। जातिभ्रंशकरकर्म्मानुष्ठानप्रायश्चित्तं। अन्त्यजादीनामन्नभोजनप्रायश्चित्तं। क्रोधादिना भार्य्यां मात्रादिशब्देन सम्बोधयतः प्रायश्चित्तं। अपुष्पिताया नार्य्या गर्भधारणे प्रायश्चित्तं। देवोद्यानादौ मूत्रादिपरित्यागप्रायश्चित्तं। गोबधप्रायश्चित्तं। तत्र मुख्यत्वेन गोसेवनप्रकारकीर्त्तनं। तत्र वृषभहननादिप्रायश्चित्तं। कपिलादिगोहनने विशेषकथनं। गोगर्भघातप्रायश्चित्तं। वृद्धारोगिण्यादिगोबधे विशेषकथनं। गोताड़नादिप्रायश्चित्तं। गोदोहननियमादिकथनं। धेनूनामशौचकथनपूर्व्वकं तत्र दुग्धपानप्रायश्चित्तकथनं। हलवाहनादिना गोर्मरणे प्रायश्चित्तकीर्त्तनं। काष्ठलोष्ट्राद्याघातेन गोर्मरणे विशेषप्रायश्चित्तकथनं। गोः कर्णलाङ्गुलादिपाटने प्रायश्चित्तकथनं। गोबधापवादकथनं। अपालनकृतगोबधप्रायश्चित्तं। मुष्कमोचणप्रायश्चित्तं। धेनुवाहनादिप्रायश्चित्तं। अजमेषादीतरप्राणिबधप्रायश्चित्तकथनं। सुरापानादिप्रायश्चित्तं। गौड़ी-पैष्टी-माध्वीभेदात् सुरायास्त्रैविध्यकथनपूर्व्वकं पुनः पानस-खार्ज्जूरादिभेदेन द्वादशविधत्वकथनं। तत्र वर्णविशेषे तत्तत्पानादिप्रायश्चित्तकीर्त्तनञ्च। अत्र पुनरुपनयनविधिकथनं। मद्यभाण्डस्थितजलपानादिप्रायश्चित्तं। चाण्डालभाण्डस्थितजलपानप्रायश्चित्तं। चाण्डालकृतकूपादिजलपानप्रायश्चित्तं। रजकादिभाण्डस्थजलपानादिप्रायश्चित्तं। शूद्रजलपानप्रायश्चित्तं। वामहस्तेन जलपानप्रायश्चित्तं। विन्मूत्रशवादिदूषितजलपानप्रायश्चित्तं। सिंहे प्रसूतानां धेनूनां पयःपाने प्रायश्चित्तकथनं। शूद्रादीनां कपिलापयःपानादौ प्रायश्चित्तकथनं। चाण्डालाद्यन्नभोजनादिप्रायश्चित्तं। रेतोमूत्रादिपानप्रायश्चित्तं। विड़ालकाकाद्युच्छिष्टभोजनप्रायश्चित्तं। अशौचिनामन्नभोजनप्रायश्चित्तं। अस्थिसञ्चयनादिश्राद्धभोजनप्रायश्चित्तं। लशुनाद्यभक्ष्यभक्षणे प्रायश्चित्तं। अभक्ष्यमांसभक्षणप्रायश्चित्तं। अप्रजायां कन्यायां जामातृगृहे भोजनप्रायश्चित्तं। ब्रह्मचारिणोऽपेयानां पानादिप्रायश्चित्तं। विधवायाः मत्स्यादिभोजनप्रायश्चित्तं। निषिद्धपत्रादौ भोजनप्रायश्चित्तं। सामान्यतः स्तेयप्रायश्चित्तकथनं। द्रव्यविशेषापहरणे प्रायश्चित्तविशेषकथनं। महापातकादिनिरूपणं। गुर्व्वङ्गनागमनप्रायश्चित्तं। अतिपातकप्रायश्चित्तकथनं। गुरुतल्पातिदेशप्रायश्चित्तं। क्षत्रियादिगमनप्रायश्चित्तं। अन्त्यजस्त्रीगमनप्रायश्चित्तं। गवादिगमनप्रायश्चित्तं। रजस्वलागमनप्रायश्चित्तं। सामान्यतः संसर्गप्रायश्चित्तं। अस्पृश्यस्पर्शनप्रायश्चित्तं। कुक्कुरादिस्पर्शे विशेषकथनं। दुःस्वप्नादिप्रायश्चित्तकथनं। हीनवर्णाभिवादनप्रायश्चित्तं। परिवित्तिप्रायश्चित्तं। सगोत्रादिपरिणयनप्रा-

यश्चित्तं। पुनर्भूप्रायश्चित्तं। वर्णविशेषेण व्रात्यप्रायश्चित्तकथनं। निषिद्धदिवसे हलवाहनप्रायश्चित्तं। अविक्रेयद्रव्यविक्रयप्रायश्चित्तं। कन्यादिविक्रयप्रायश्चित्तं। एतद्विवाहकर्त्तुश्च प्रायश्चित्तकथनं। देवगृह-पुष्करिण्यादिविक्रयप्रायश्चित्तं। गृहादिशुद्धिनिरूपणं। द्रव्यशुद्धिनिरूपणं। क्रियाहीनस्य प्रायश्चित्तकथनं। कांस्यपात्रे नारिकेलजलादिपानप्रायश्चित्तं। केशाकर्षणप्रायश्चित्तं। पादाघातादिप्रायश्चित्तं। शवादिस्पर्शप्रायश्चित्तं। यज्ञोपवीतच्छेदनप्रायश्चित्तं। म्लेच्छकथनप्रसङ्गेन शवरगोण्डकादीनां म्लेच्छत्वकथनं। छिन्नयज्ञोपवीतिनः अस्पृश्यस्पर्शनप्रायश्चित्तं। त्यक्तयज्ञोपवीतिनः प्रायश्चित्तं। प्रायश्चित्तहोमविधिकथनं। प्रायश्चित्तकुशण्डिकाविधिकथनं। कृच्छ्राणां लक्षणादिकथनञ्च।

No. 1916. गर्गपद्धतिः वा गृह्यपद्धतिः।

Substance, country-made paper, 9 × 4 inches. Folia, 72. Lines, 10 on a page. Extent, 1,597 s'lokas. Character, Nágara. Date, Sm. 1713. Place of deposit, Darbháñgá, Bábu Guṇes'vara Siñha. Appearance, old. Prose. Correct.

Garga-paddhati alias *Gṛihya-paddhati*. An epitome of the domestic rites of the Yajur Veda. By Sthapati Garga. The author professes to follow the rules of one Yajñamata, who however, was, apparently, a compiler, and not an author of an original and distinct school. The school to which the work belongs is not named.

Beginning. स्थपतिगर्गं उपाध्यायपादौ प्रणम्य भर्त्तृयज्ञमतानुसारेणानुष्ठानेन गृह्यपद्धतिं करोति। तत्र सर्व्वकार्य्यपरिभाषा क्रियते। तत्र विहितकालानां कर्म्मणामुदगयन आपूर्य्यमाणे पक्षे पुण्याहेऽनुष्ठानं। इत्यादि।

End. अथातोऽधीत्याधीत्यनिराकरणं। प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः इत्यादिनिगदव्याख्यातं।

Colophon. समाप्तेयं गर्गपद्धतिः। स्वस्ति संवत् आषाढ़ादि १७१३। आषाढ़मासे शुक्ले पक्षे प्रतिपच्छुक्रवासरे लिखितेयं पद्धतिः॥

विषयः। भर्त्तृयज्ञमतानुसारेण यजुर्व्वेदीयगृह्यपद्धतिकथनं। तत्र परिभाषाकथनं। विवाहनिरूपणं। अथ यदि उद्वाहितायाः स्त्रियाः प्रथमं भर्त्तृगृहनयने रथाक्षभेदादिरूपं किञ्चिदशुभं भवेत्, तदा पूषाप्रायश्चित्तविधानं। चतुर्थीकर्म्मनिरूपणं। आवसथ्याधानविधिः। आवसथ्ये मणिकावधानविधिः। वैश्वदेवविधिः।

विषयः। भूतयज्ञविधिः। पितृयज्ञविधिः। ब्रह्मयज्ञविधिः। औपासनपरिचरणविधिः। पचादिकर्म्मविधिः। पिण्डपितृयज्ञविधिः। उपाकर्म्मविधिः। श्रवणाकर्म्मविधानं। इन्द्रयज्ञपायसविधिः। इषातककर्म्मविधिः। आग्रयणविधिः। तत्र यवाग्रयणविधिः। श्यामाकाग्रयणविधानञ्च। इषोत्सर्गविधिः। अग्रहायणीकर्म्मविधिः। स्वस्तरारोहणविधिः। प्रथमाष्टकाविधिः। द्वितीयाष्टकाविधिः। तृतीयाष्टकाविधिः। चतुर्थी अष्टका। शूलगवविधिः। अवदानहोमविधिः। गोयज्ञविधिः। उदककर्म्मविधिः। अर्घपशुविधानं। अवकीर्णिपशौ विशेषकथनं। गार्हस्थ्यधर्म्मविधिः। गर्भाधानविधिः। पुंसवनविधिः। सीमन्तोन्नयनविधिः। सोष्यन्तीकर्म्मविधिः। मेधाजननविधिः। आयुष्यकरणविधिः। स्तन्यदानविधिः। कुमण्डिकाविधिः। यमजननविधिः। नामकरणविधिः। अन्नप्राशनविधिः। काम्यप्राशनविधिः। चूड़ाकरणविधिः। उपनयनविधिः। सावित्रव्रतोत्सर्गविधिः। आग्नेयव्रतविधिः। ब्रह्मचर्य्यव्रतविधिः। वर्णक्रमेण परिधानवस्त्रविधानं। एवं क्रमेण रशनादण्डादिविधानं। ब्रह्मचारिधर्म्मकथनं। व्रात्यविधिकथनं। आग्नेयव्रतविसर्गविधिः। गोदानव्रतोत्सर्गविधिः। वेदाध्ययनानन्तरं स्नानविधिः। सन्ध्योपासनादिविधिः। स्नातकस्य नियमादिकथनं। अनध्यायनिरूपणं। सीतायज्ञविधिः। शालाकर्म्मकथनं। शीर्षरोगभैषज्यकथनं। दुर्व्विनीतावशीकरणविधिः। सभाप्रवेशविधिः। रथारोहणविधिः। हस्त्याद्यारोहणविधिः। मेघच्छाद्यभिमन्त्रविधिकीर्त्तनञ्च।

No. 1917. स्मृतिकौमुदी।

Substance, country-made paper, 12 × 5 inches. Folia, 122. Lines, 6 on a page. Extent, 1,815 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbhâṅgâ, Bábu Guṇes'vara Siñha. Appearance, fresh. Prose and verse. Correct.

Smṛiti-kaumudí. A summary of Smṛiti rites. By Devanátha Ṭhakkura, Tarkapañchánana Mahámahopádhyáya.

प्रथमपत्रं नास्ति।

Beginning. तत्र मनुः, वेदोऽखिलो धर्म्ममूलं स्मृतिशीले च तद्विदां।

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।

वशिष्ठः। श्रुतिस्मृतिविहितो धर्म्मः, तदभावे शिष्टाचारः प्रमाणम्। इत्यादि।

End. तेन प्रतिपत्तियोगत्वेऽपि त्यक्तद्रव्यापचारेऽपि द्रव्यान्तरेऽपि चतुरहव्यापिहोमसमापनं।

अन्यथा दिनानीति द्वितीयानुपपत्तेरिति ॥

Colophon. इति तर्कपञ्चाननमहामहोपाध्यायदेवनाथठक्कुरकृतायां स्मृतिकामुद्यां द्वैतविवेके दानपरिच्छेदः समाप्तः।

विषयः। धर्म्मस्य आचारमूलत्वकथनं। आचारस्वरूपादिकथनं। प्रधानकर्म्मतदङ्गादिनिरूपणं। चातुर्व्वर्ण्यनिरूपणं। तत्र शुद्धसङ्कीर्णभेदेन तस्य द्वैविध्यनिरूपणं। यज्ञोपवीतविधिः। नराणां नारीणाञ्च अंशुकद्वयधारणावश्यकता। अनाश्रमवासनिषेधः। दारपरिग्रहात् प्रागपि गार्हस्थ्याश्रमसिद्धिर्भवतीतिनिरूपणं। रक्तपातादौ अशौचनिरूपणं। स्नानविधिः। तर्पणविधिः। हस्तपादप्रक्षालनविधिः। पवित्रवस्त्रनिरूपणादिकं। कुशनिरूपणं। तदाहरणकालादिकथनञ्च। पौराणिकमन्त्रपाठादाशूद्रादीनामधिकारोऽस्ति न वेत्यत्र समाधानं। सौरादिमासविवेचनं। मलमासादिनिरूपणं। तत्र विहिताविहितकर्म्मनिरूपणं। अकालवृष्ट्यादौ कालाशुद्धिविवेचनं। यज्ञीयदेशनिरूपणं। म्लेच्छदेशादौ श्राद्धादिकरणप्रतिषेधकीर्त्तनं। ब्राह्मणादीनां पुनः संस्कारकाले वपनमेखलादण्डभैक्ष्यचर्य्याणां निषेधकथनं। स्त्रीणामुपनयनस्थाने विवाहातिदेशकथनं। गौरी-रोहिणी-कन्या-रजस्वलादीनां लक्षणादिकीर्त्तनं। विवाहयोग्याया लक्षणादिकथनं। संस्कारपदार्थनिरूपणं। वृद्धिश्राद्धविधानं। शिखाप्रमाणादिकथनं। शिखाबन्धनादिविधिकथनं। उपनयनकालादिनिरूपणं। अयनादिकं चान्द्रमासघटितं सौरमासघटितं वेत्यत्र समाधानं। अनध्यायकालनिरूपणं। सन्ध्यापदार्थनिरूपणं। मलमूत्रोत्सर्गादौ दिङ्निरूपणं। शौचविधिकथनं। आचमनविधिकथनं। प्रातःस्नानकालादिनिरूपणं। गायत्रीजपादिविधिकथनं। तर्पणविधिकीर्त्तनं। देवपूजायां सर्व्वेषामधिकारकथनं। स्वधर्म्मत्यागिनोऽपि शिवपूजायामधिकारकथनं। देवपूजायां पौर्व्वापर्य्यनिरूपणं। पुष्पादिचयनविधिकीर्त्तनं। वैश्वदेवविधिकथनं। नित्यश्राद्धं कृत्वा देवपूजादिकं न कार्य्यमितिनिरूपणं। शूद्रस्यापि पञ्चाधिकार इति निरूपणं। ब्राह्मणादीनां पञ्चयज्ञाशक्तौ तर्पणब्रह्मयज्ञमात्रञ्च कर्त्तव्यमितिकथनं। गोग्रासदानविधिः। पेयदुग्धनिरूपणादिकं। विकारलक्षणादिकीर्त्तनं। शूद्रेण कापिलं दुग्धं न सर्व्वथा पातव्यमितिनिरूपणं। मत्स्यमांसादिभोजनविधिकथनं। श्राद्धपदार्थनिरूपणं। नित्यश्राद्धादिकालनिरूपणं। नवान्नश्राद्धादिविधानं। पार्व्वणादिविधानं। तत्र अन्नादिपरिवेषणविधिः। विघ्नपतितश्राद्धादिविधिः। अनुपनीतकर्त्तृकश्राद्धविधिकीर्त्तनं। सपिण्डीकरणविधानं। आद्यश्राद्धविधानं। तत्र अधिकार्य्यादिनिरूपणं। शुद्धिपदार्थनिरूपणं। अशौचनिरूपणं। सापि-

ष्ठनिरूपणं। देशान्तरस्थताशौचनिरूपणमुखेन देशान्तरलक्षणादिनिरूपणं। त्रिद-ण्डिसन्यासिनां मरणोत्तरं एकादशाहे पार्व्वणविधानकथनं। एकदण्डस्य तु सर्व्वथैव न श्राद्धं किन्तु नारायणवलिरेवेतिनिरूपणं। वपनादिविधिकीर्त्तनं। शूद्रगृह-जातानां पयोविकारादीनां भोज्यत्वकथनं। ब्रह्महत्यासुरापानादिमहापातक-निरूपणञ्च। तत्र तत्र प्रायश्चित्तकथनञ्च। व्यवहारनिरूपणं। दायभागनिरूपणं। दत्तकविधिकथनं। विधवाकृत्यनिरूपणं। व्रतानुष्ठानविधिः। उपवासविधिकीर्त्तनं तिथिद्वैधव्यवस्थानिरूपणं। एकादशीविधानकथनं। जन्माष्टमीविधानादिकथनं। ग्रहणादौ कर्त्तव्यादिनिरूपणं। पतिव्रताधर्म्मकीर्त्तनं। तीर्थयात्राविधिकथनं। तत्र श्राद्धादिविधानकीर्त्तनं। स्त्रीणां मुण्डनादिविधिकथनं। गयाश्राद्धविधिः। दानवि-धिकथनं। दानयोग्यदेशकालपात्रादिविवेचनं। उत्सर्गविधिकथनञ्च।

No. 1918. कुण्डतत्त्वप्रकाशिका।

Substance, country-made paper, 10 × 4 inches. Folia, 26. Lines, 8 on a page. Extent, 571 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbháñgá, Bábu Guṇes'vara Siñha. Appearance, new. Prose and verse. Correct.

Kuṇḍa-tattva-prakáśiká. On the formation of various kinds of fire altars. By Rámánanda Tírtha.

Beginning. सन्दिग्धानेकविदुषामन्तर्ध्वान्तोपशान्तये।
रामानन्दयतिः कुर्व्वे कुण्डतत्त्वप्रकाशिकां॥
तत्र कुण्डपदव्युत्पत्तिमाह विश्वसारे कौ पृथिव्यां विलं यस्माद्दृश्यते सुमनोहर-मित्यादि।

End. अथ वा पञ्चपत्राभ्यां संक्षिप्ते होमकर्म्मणि।
स्रुक्स्रुवधारणप्रकारहोममुद्रादिकं तन्त्रसारे ज्ञेयं।

Colophon. इति श्रीरामानन्दतीर्थकृतायां कुण्डतत्त्वप्रकाशिकायां पञ्चमोद्देशः समाप्तः।

विषयः। कुण्डपदनिर्व्वचनकीर्त्तनं। कुण्डयोग्यभूमिलक्षणादिकथनं। तत्र ब्राह्मणक्षत्रिया-दिभूलक्षणं। कुण्डपरिमाणकथनं। होमविशेषे मानभेदकथनं। मण्डपनिर्म्माण-विधिकथनं। तत्र तोरणध्वजादिनिर्म्माणादिविधिकथनं। मानपरिभाषाक-थनं। मण्डपादिकरणे नागशिर आदिनिरूपणं। चतुरस्रार्द्धचन्द्रादिकुण्डनिर्म्माण-

प्रकारकथनं। कण्ठादिलक्षणकथनं। मेखलानिरूपणं। योन्यादिलक्षणं। स्रुक्स्रुव-लक्षणकीर्त्तनञ्च।

No. 1919. धर्म्मविवेकः।

Substance, country-made paper, 10 × 4 inches. Folia, 65. Lines, 6 on a page. Extent, 1,255 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbháñgá, Bábu Guṇes'varaa Siñha. Appearance, fresh. Prose. Correct.

Dharma-viveka. Explanations, application and bearings of stock illustrations of the Mímáñs'á doctrine. By Chandras'ekhara, Mahámahopádhyáya. The author is the same whose work on Smṛiti has been noticed under No. 650. (*Ante* II, p. 77.)

Beginning. अथ धर्म्ममभिधातुमुपक्रमते जैमिनिः। अथातो धर्म्मजिज्ञासेति प्रथमसूत्रेण अथ शब्दो मङ्गलं। अतो मङ्गलानन्तरं धर्म्मप्रश्न इति। अत्रोत्तरं यथा चोदना-लक्षणोऽर्थो धर्म्म इति। अत्र भट्टमते चोदना प्रेरणा फलभावनेति यावत् इत्यादि।

End. किन्तु रेखोपरि दर्भास्तरणेन प्रकृतिवन्न्यायावगतादृष्टार्थरेखाङ्गस्यावाधे सति वाधानौचित्यात् रेखाप्राप्तिर्नावनेजनाधारयोः समुच्चय इति ध्येयं।

Colophon. इति महामहोपाध्यायश्रीचन्द्रशेखरकृता धर्म्मदीपिका समाप्ता।

विषयः। धर्म्मलक्षणादिनिरूपणं। अर्थवादादिप्रामाण्यनिरूपणं। अदृष्टनिरूपणं। कर्म्मभेद-प्रतिपादनं। फलनिरूपणं। मन्त्रादीनां लक्षणादिनिरूपणं। प्रधानाङ्गादिलक्षणं विधिस्वरूपनिरूपणानन्तरं तद्भेदनिरूपणं। परिसंख्यानियमादिस्वरूपकथनं। क्रमप्रमाणबलाबलनिरूपणं। अधिकरणनिरुक्तिः। श्रुतिलिङ्गाधिकरणनि-रूपणं। ग्रहाधिकरणनिरूपणं। खादिरन्यायकथनं। दर्व्वीहोमाधिकरणं। विक-ल्पविवेचनं। कपालाधिकरणं। वेदो वेतिन्यायनिरूपणं। पाशाधिकरणं। आश्र-यिन्यायनिरूपणं। सर्व्वेष्ट्यधिकरणं। हविरुभयत्वाधिकरणं। प्रतिनिध्यधिक-रणं। फलचमसन्यायनिरूपणं। आरुणन्यायनिरूपणं। प्राजापत्यन्यायनिरूपणं। तदादितदन्तन्यायनिरूपणं। मुख्यार्थन्यायनिरूपणं। सन्निपातन्यायनिरूपणं। सर्व्वशक्त्यधिकरणं। योगसिद्ध्यधिकरणं। तन्त्रप्रसङ्गन्यायनिरूपणं। तत्र कर्म्मणा-रम्भन्यायनिरूपणं। पशुपुरोडाशन्यायनिरूपणं। कौण्डपायिनामयनन्यायनिरू-पणं। शस्त्राधिकरणं। ऋत्वधिकरणं। मन्त्राधिकरणं। पर्णमयीन्यायनिरूपणं।

हिरण्याधिकरणं। रोदनार्थवादन्यायनिरूपणं। पूषाधिकरणं। यूपाहवनीयन्यायनिरूपणं। खलेवालीन्यायनिरूपणं। पदपांशुन्यायनिरूपणं। पदाहवनीयन्यायनिरूपणं। उपांशुयागन्यायनिरूपणं। विश्वजिन्न्यायनिरूपणं। तिर्य्यगधिकरणं। व्यक्तिविचारः। आरम्भकालनियमेऽभ्युदयेष्ट्यधिकरणं। गुर्व्वनुगमाचरणन्यायनिरूपणं। संयोगपृथक्त्वन्यायनिरूपणं। योयज्ञक्रन्यायनिरूपणं। आरम्भनीयेष्टिन्यायनिरूपणं। स्फ्यास्त्रिष्टेज्याधिकरणं ।नालौकिकं लौकिकेऽङ्गमिति भच्नसूत्रन्यायनिरूपणं। रात्रिसत्रन्यायनिरूपणं। विरोधाधिकरणं। आचारप्रसङ्गन्याय निरूपणं। विध्यनुवादकथनं। वैकृतविशेषोपदेशफलनिरूपणञ्च।

No. 1920. श्राद्धादर्शः।

Substance, country-made paper, 14 × 5 inches. Folia, 152. Lines, 6 on a page. Extent, 3,000 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbháñgá, Paṇḍit Kánáilála Jhá. Appearance, old. Prose and verse. Correct.

S'ráddhádars'a. A summary of the various rites included under the name of S'ráddha. By Mahes'vara Mis'ra, Mahámahopádhyáya.

Beginning. महेश्वरं नमस्कृत्य महेश्वरेण धीमता।
आदर्शेन च शास्त्राणां श्राद्धादर्शो विरच्यते॥
तत्र कस्तावत् श्राद्धपदशक्यतावच्छेदक इति निरूप्यते। तत्र केचित् सम्बन्धपदोपनीतान् पितृनुद्दिश्य हविस्त्यागः श्राद्धमिति। तन्न। इत्यादि।

End. अत एव देहाशुद्धावपि गयाश्राद्धपिण्डदानादिकं कर्त्तव्यमिति सर्व्वं समञ्जसं।

Colophon. इति महामहोपाध्यायश्रीमहेश्वरमिश्रकृतः श्राद्धादर्शः सम्पूर्णः।

विषयः। श्राद्धस्वरूपविवेचनं। तत्र सर्व्वत्र मुण्डनविधिकथनं। कुशोत्पाटनविधिः। व्रणस्य स्वतोदूषकताकथनं। रौहिणकालनिर्णयः। संवत्सराभ्यन्तरे मलमासपाते श्राद्धविधिः। संक्रान्तिश्राद्धविधानं। क्षत्रिमतया सपिण्डने कृते दाहकर्त्ता प्रेतपदेनैव पिण्डा देया इति कथनं। रात्रिश्राद्धनिषेधः। नवमदिने पितृमरणे ज्ञाते दशमेऽह्नि सर्व्वपिण्डदानविधिः। मुहूर्त्तनामितिकर्त्तव्यता। दक्षिणाग्रपवित्रलविचारः। मन्त्रोहविचारः। उभयदिने क्षयाहलाभे विधानकथनं। दिनपदस्य तिथौ शक्तिरितिविवेचनं। श्राद्धकालनिरूपणं। श्राद्धदेशगुणविचारः। अग्नि-

समाधानादिविधिः। योगिप्रशंसा। अवनेजनविधिः। श्राद्धान्नादिपरिवेषणव्यवस्था। सौवर्णादिपात्रविधिः। दक्षिणादानविचारः। पर्णनरदाहविधिः। आभ्युदयिकश्राद्धकालाः। परभूमौ श्राद्धकरणे भूस्वाम्यन्नदानविधानं। तर्पणविधिः। श्राद्धाधिकारिनिरूपणं। श्राद्धदिने पुनर्भोजनादिविवेचनं। अमावास्याष्टकादिश्राद्धविधिः। श्राद्धे जाताशौचे विधिनिरूपणं। त्र्यहाशौचे चतुर्थदिने श्राद्धं। त्रिपक्षादौ सपिण्डीकरणमितिकथनं। वृषोत्सर्गविधिः। शूद्रस्य अमन्त्रवत् कर्म्मकथनं। अपरपक्षश्राद्धविधिः। शस्त्रादिहतश्राद्धविधिः। एकोद्दिष्टविधिः। श्राद्धेपश्वघाते दोषाभावकथनं। तीर्थश्राद्धविधिकथनञ्च।

No 1921. गृहस्थरत्नाकरः।

Substance, country-made paper, 13 × 4 inches. Folia, 131. Lines, 12. on a page. Extent, 5,070 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbháñgá, Bábu Guṇes'vara Siñha. Appearance, old. Prose and verse. Correct.

Gṛihastha-ratnákara. A digest of the duties of householders. By Chaṇḍes'vara Ṭhakkura, son of Víres'vara Ṭhakkura. Both the father and the son have the title of Mahásándhi-vigrahika, or "minister of peace and war," but to what king they rendered their services as foreign ministers does not appear in the text. Contents: the characteristics of household *(gárhasthya)* duties. Marriage, selection of brides, bridegrooms, ages of bridegrooms and brides, donor of brides, *Svayamvara* or selection of the bridegroom by a bride, prohibited degrees of relationship, different kinds of marriage, good and evil of marriages, polygamy, marriage by a junior before an elder brother or sister. domestic penalties, performance of and officiating at sacrifices, Bráhmaṇs for whom sacrifices should not be performed. Daily duties (*A'hnika*), discharge of excretions, purification, washing of the mouth. Morning duties of S'udras, necessity for washing of the mouth, a second washing, when required, when it is not required, brushing of the teeth, morning bath, ceremonial bathing, prayers at the three diurnal conjunctions, unguents. The object indicated by Om, repetition of particular mantras a number of times, offering of water to the manes, rites which should follow it, the five daily *yajanas*, hospitality to beggars, meals, articles fit for food, birds, beasts, fish, propriety of abstaining from flesh-meat,

discussion on the propriety of abstaining from injury to animals, wine, duties after meals. Duties of women while in their courses, duties on festive days. Duties of Bráhmaṇas, religious duties, earning of livelihood, livelihood in times of distress, agriculture, commerce, rearing of animals for sale, interest, duties during famines, &c., acceptance of gifts. Duties of Kshatriyas and Vaisyas, religious duties, earning of livelihood, proprietorship. Duties of S'udras, religious duties, earning of livelihood. Theft, penance, purification. Duties of pupillage (*Brahmacharya*), restraint of the passions, abjuring of family ties, dwelling with a tutor, regulation of speech, travelling, abstinence from assaults and worldly objects, abstinence from looking at particular objects, and from gifts to S'udras, suppression of anger, &c., abstinence from human society, what to be forsaken and what not.

Beginning. नमो गिरीन्द्रनन्दिनीपदारविन्दरेणवे ।
उज्झित्वा दिगम्बरं वरतरं वासोवसानस्थिरं
हित्वा भैक्ष्यमनातुरो रतिकरं स्थानं समालम्बितः ।
त्यक्त्वा भस्मकृताङ्गरागसुरभिः श्रीखण्डसारद्रवै-
र्देवः पातु हिमाद्रिजापरिणयं कृत्वा गृहस्थः शिवः ॥
अध्याप्य श्रुतिमङ्गषट्कसहितां यो ब्रह्मचर्य्याश्रये-
गार्हस्थ्ये समयोजयद्द्विजगणान् वित्तैः कृतार्थीकृतान् ।
स श्रीमान् सहितः समस्तसचिवश्रेणीषु चण्डेश्वरो-
मीमांसाशरणं गृहस्थविषयं प्रस्तौति रत्नाकरं ॥
गार्हस्थ्याख्यस्तरङ्गोऽत्र प्रथमं परिकीर्त्त्यते । इत्यादि ।

End. न पितुस्त्यागः । पूर्व्वत्ताशुद्धौ । विष्णुः ।
भार्य्यापुत्रस्य सर्व्वस्व संहृष्टाः पापकर्म्मभिः ।
परिभाष्य परित्याज्याः पतितोऽपि तथैव च ॥

Colophon. इति सप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीवीरेश्वरात्मजसप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीचण्डेश्वरविरचिते गृहस्थरत्नाकरे त्याज्यात्याज्यतरङ्गः समाप्तोऽयं ।

विषयः । गार्हस्थ्यधर्म्मनिरूपणं । दारपरिग्रहविधिकथनं । विवाह्याविवाह्यकन्यानिरूपणं । वरनिरूपणं । कन्यावरवयःक्रमनिरूपणं । दातृनियमकथनं । कन्यास्वयंवरविधिः । सम्बन्धनिरूपणं । विवाहभेदकथनं । ब्राह्मादिविवाहलक्षणं । विवाहगुणागुणनिरूपणं । अधिवेदनविधिकीर्त्तनं । परिवेदननिषेधः । आवसथ्या-

धानविधिकथनं। यजनयाजनविधिकथनं। अयाज्यब्राह्मणकथनं। आह्निककृत्यनिरूपणं। मूत्रपुरीषोत्सर्गविधिकथनं। शौचविधिकथनं। आचमनविधिकथनं। शूद्राधिकारे प्रातःकृत्यादिनिरूपणं। आचमननिमित्तनिरूपणं। द्विराचमनविधिकथनं। आचमनापवादकथनं। दन्तधावनविधिकथनं। प्रातःस्नानादिविधिकथनं। क्रियास्नानविधिः। सन्ध्योपासनविधिः। मार्ज्जनविधिः। ओङ्कारस्वरूपकथनादिकं। जपविधिः। तर्पणविधिः। तर्पणोत्तरकर्म्मनिरूपणं। पञ्चमहायज्ञविधिः। तत्र अतिथिपूजाविधिः। भोजनविधिः। भोज्याभोज्यनिरूपणं। भोज्येषु पक्षिनिरूपणं। पशुनिरूपणं। मत्स्यनिरूपनञ्च। मांसभक्षणवर्ज्जनकथनं। पशुहिंसाविधिनिषेधविवेचनं। मद्यादिनिन्दाकीर्त्तनं। भोजनोत्तरकर्म्मनिरूपणं। रजस्वलाकर्म्मनिरूपणं। पर्व्वकृत्यनिरूपणं। ब्राह्मणानां कर्म्मनिरूपणं। धर्म्मकथनं। वृत्तिविधानञ्च। आपद्वृत्तिनिरूपणं। कृषिकार्य्यविधिः। वाणिज्यविधिः। पाशुपाल्यविधिः। कुसीदविधिः। अन्यविधा आपद्वृत्तिः। प्रतिग्रहविधिः। क्षत्रियवैश्ययोः कर्म्मनिरूपणं। धर्म्मकथनं। वृत्तिविधानञ्च। द्वयाणां धर्म्मास्वत्वनिरूपणं। शूद्राणां कर्म्मनिरूपणं। धर्म्मकीर्त्तनं। वृत्तिविधानञ्च। स्तेयापवादकथनं। यमनिरूपणं। शौचविधिः। ब्रह्मचर्य्यविधिः। नियमादिकथनं। कुलनाशनकथनं। निवासविधिकथनं। वाच्यावाच्यनिरूपणं। गमनप्रवेशनविधिः। अनाक्रमणीयनिरूपणं। अनधिष्ठेयनिरूपणं। अनवलोकनीयनिरूपणं। शूद्राय अप्रदेयानि। क्रोधादीनां परिवर्ज्जनविधिः। सङ्करपरिवर्ज्जनविधिः। त्याज्यात्याज्यनिरूपणञ्च।

No. 1922. पुरुषपरीक्षा।

Substance, palm-leaf, 12 × 2 inches. Folia, 150. Lines, 5 on a page. Extent, 2,420 s'lokas. Character, Maithilí. Date, L. S. 504. Place of deposit, Darbháñgá, Paṇḍit Kánáiláia Jhá. Appearance, old. Prose and verse. Correct.

Purusha-paríkshá. A tale illustrating good conduct. By Vidyápati, a paṇḍit of S'iva Siñha of Mithilá. Printed and translated into English by the late Rájá Kálíkrishṇa, Bahádur.

Beginning. ब्रह्मापि यां नौति नुतः सुराणां यामर्च्चितोऽप्यर्च्चयतीन्दुमौलिः।
यां ध्यायति ध्यानगतोऽपि विष्णुस्तामादिशक्तिं शिरसा प्रपद्ये॥

धीरेषु मान्यः सुधियां वरेण्यो विद्यावतामादिविलेखनीयः ।
श्रीदेवसिंहक्षितिपालसूनु-र्जीयाच्चिरं श्रीशिवसिंहदेवः ॥
शिशूनां सिद्धार्थं नयपरिचितैर्नूतनधियां
मुदे पौरस्त्रीणां मनसिजकलाकौतुकजुषां ।
निदेशान्निःशङ्कं सदसि शिवसिंहक्षितिपतेः
कथानां प्रस्तावं विरचयति विद्यापतिकविः ।
नयानुरोधेन गुणेन वाचि कथारसस्यापि कुतूहलेन ।
बुधोऽपि वैदग्ध्यविशुद्धचेताः प्रबन्धमाकर्णयिता न किं मे ॥
पुरुषाः परिचीयन्ते युक्तेरस्याः परीक्षया ।
तत् पुरुषपरीक्षायां कथा सर्व्वमनःप्रिया ॥
आसीदासमुद्रक्षितिपतिसहस्रशिरोमालारजोरञ्जितपादपद्मश्चन्द्रातपायां पुरि इत्यादि ।

End. भुक्त्वा राज्यसुखं विजित्य परितो हत्वा रिपून् सङ्गरे
कृत्वा चैव कृताशनं मखविधौ भृत्वा धनैरर्थिनः ।
वाग्वत्यां भवसिंहदेवनृपतिस्त्यक्त्वा शिवाग्रे वपुः
पूतो यस्य पितामहः सुरगमद्दारदयालङ्कृतः ॥
सङ्कुरीपुरसरोवरकर्त्ता हेमहस्तिरथदानविदग्धः ।
भाति यस्य जनको रणजेता देवसिंहनृपतिर्गुणराशिः ॥
यो गौड़ेश्वरसज्जनेश्वररणक्षोणीषु लब्ध्वा यशो-
दिक्कान्ताचयकुन्तलेषु नयते कुन्दस्रजामास्पदं ।
तस्य श्रीशिवसिंहदेवनृपतेर्विज्ञप्रियस्याज्ञया
ग्रन्थं ग्रन्थिलदण्डनीतिविषये विद्यापतिर्व्यातनोत् ॥

Colophon. इति समस्तप्रक्रियाविराजमानरूपनारायणमहाराजाधिराजश्रीमच्छिवसिंहदेवपादानामाज्ञया श्रीविद्यापतिविरचितायां पुरुषपरीक्षायां पुरुषार्थपरिचयो नाम चतुर्थः,—परिच्छेदः । समाप्तश्चायं ग्रन्थः ।
वेदपञ्चशते गौड़े माघे च प्रथमे तिथौ
नारायणेन लिखिता पुस्ती विद्यापतेः कवेः । लसं ५०४ ।

विषयः । चन्द्रातपायां पुरि पारावारोनाम राजा आसीत् । तस्य सर्व्वावयवसुन्दरी पद्मावती नाम कन्यका बभूव । अथ राजा तस्याः शैशवापगममवलोक्य तदनुरूपं वरमनुसन्दधानः किं करवाणीति चिन्तयमानः सुबुद्धिनामानमृषिमपृच्छत् । भगवन् ! कस्मै तस्या वरं करवाणीति । मुनिराह । राजन् ! पुरुषं वरं

कुरु। तेनैवमभिहितो राजा प्राह। अये कथमपुरुषोऽपि वरः सम्भवति। मुनिरुवाच। महाराज! पृथिव्यां बहवः पुरुषाः पुरुषाकाराश्च सन्ति। तत् पुरुषाकारान् परित्यज्य पुरुषं वरय इति ब्रवीमि। अथ राजप्रार्थनया मुनेः पुरुषलक्षणादिकथनं। तत्र शौर्य्यविवेकोत्साहादिसम्पन्न एव पुरुष इति निरूपणं। शौर्य्यादीनां लक्षणकीर्त्तनं। क्रमेण दानवीरकथाकीर्त्तनं। दयावीरकथा। युद्धवीरकथा। सत्यवीरकथा। चौरकथा। भीरुकथा। क्षपणकथा। अलसकथा। अप्रतिभकथा। मेधाविकथा। सुबुद्धिकथा। वञ्चककथा। पिशुनकथा। अबुद्धिकथा। संसर्गवर्ज्यकथा। शस्त्रविद्यकथा। शास्त्रविद्यकथा। वेदविद्यकथा। लोकविद्यकथा। उभयविद्यकथा। उपविद्यकथा। गीतविद्यकथा। नृत्यविद्यकथा। इन्द्रजालविद्यकथा। पूजितविद्यकथा। अवसन्नविद्यकथा। अविद्यकथा। खण्डितविद्यकथा। हास्यविद्यकथा। तान्त्रिकविद्यकथा। तामसकथा। अनुशयिकथा। महेच्छकथा। मूढकथा। वक्राशकथा। सावधानकथा। अनुकूलनायककथा। दक्षिणकथा। विदग्धकथा। धूर्तकथा। घस्मरकथा। निर्व्विन्धिकथा। निःस्पृहकथा। लब्धसिद्धिकथाकीर्त्तनञ्च।

No. 1923. चतुर्वर्गचिन्तामणिः, प्रायश्चित्ताध्यायः।

Substance, country-made paper, 10 × 5 inches. Folia, 287. Lines, 11 on a page. Extent, 3, 436 s'lokas. Character, Nágara. Date, ? Place of deposit, Darbhángá, Bábu Guṇes'vara Siñha. Appearance, new. Prose and verse. Generally correct.

Chaturvarga-chintámaṇi. A complete digest of all Smṛiti rules. By Hemádrí. The codex contains the part which relates to expiations.

Beginning. कमलादयितं + + कमलासनसंस्तुतं।
कमलाक्षमहं वन्दे कमलाकरशायिनं॥
अथेदानीं हेमाद्रिकारिणा लोकोपकारार्थं सर्व्वपुराणस्मृतिसंहितावेदज्योतिषवैद्यागमश्रौतस्मार्त्तसूत्रेषु ग्रन्थानालोच्य ब्रह्मक्षत्रियविशां शूद्रादीनाञ्च ब्रह्महत्यासमानि वाङ्मनःकायसम्भवानि हिंसादीनि सम्भवन्ति तेषां पापानामपनोदनं प्रायश्चित्ताध्याये लिख्यते। इत्यादि।

End. धर्म्मशास्त्रमार्गेण उक्तप्रत्याम्नायरूपेण अहःसन्ध्यं अखण्डं प्राच्योदीच्याङ्गसहितं
आचरिष्ये-इति संकल्प्य उक्तमार्गेण कुर्य्यादिति। कृष्णार्पणमस्तु।

Colophon. पौषमासे शुक्लपक्षे एकादश्यां सोमवासरे लिखितं।

विषयः। वर्णाश्रमभेदेन प्रायश्चित्ताकरणे दोषकीर्त्तनं। अनेकप्रकारप्रायश्चित्तकथनं।
ब्रह्महत्यादिमहापातकादिनिरूपणं। ब्रह्महत्याप्रायश्चित्तं। गुरुहत्याप्रायश्चित्तं।
अनेकविधगुरुनिरूपणं। क्षत्रियस्य विप्रहत्या-प्रायश्चित्तं। वैश्यस्य विप्रहत्याप्रा-
यश्चित्तं। शूद्रस्य विप्रहत्याप्रायश्चित्तं। ब्राह्मणस्य क्षत्रियहत्याप्रायश्चित्तं। तस्य
वैश्यशूद्रहत्याप्रायश्चित्तं। क्षत्रियस्य वैश्यहत्याप्रायश्चित्तं। वैश्यस्य क्षत्रियबध-
प्रायश्चित्तं। शूद्रस्य वैश्यहत्याप्रायश्चित्तं। वैश्यस्य शूद्रहत्याप्रायश्चित्तं। चाण्डाला-
दिबधप्रायश्चित्तं। ब्रह्मचाण्डालग्रामचाण्डालबधप्रायश्चित्तं। चाण्डालजननकारण-
कथनं। ग्रामचाण्डालादिकथनं। सुरापानप्रायश्चित्तं। एकादशप्रकारसुराकथनं।
स्तेयप्रायश्चित्तं। सुवर्ण-रजतताम्र-कांस्य-धान्यवस्त्रादिस्तेयप्रायश्चित्तं। गुरुतल्पगमन-
प्रायश्चित्तं। संसर्गप्रायश्चित्तं। उपपातकप्रायश्चित्तं। तत्र गोबधप्रायश्चित्तं। गोवत्स-
वृषभ-बलीवर्द्दादिहननप्रायश्चित्तं। गजाश्वोष्ट्रखरमहिषी-महिषाज-मेषादिबधप्राय-
श्चित्तं। वृक्षच्छेदप्रायश्चित्तं। आश्रमराहित्यप्रायश्चित्तं। भृतकाध्ययनाध्यापनप्राय-
श्चित्तं। गुर्व्वधिक्षेपप्रायश्चित्तं। अनज्ञातप्रायश्चित्तं। अनज्ञातलक्षणं। पण्यविक्रय-
प्रायश्चित्तं। निन्दितार्थोपजीवनप्रायश्चित्तं। कृषिबलप्रायश्चित्तं। हिंसायन्त्रविधान-
प्रायश्चित्तं। वार्द्धष्यजीवनप्रायश्चित्तं। मनुष्यविक्रयप्रायश्चित्तं। आत्म-सुत-पत्नी-मातृ
पुत्र-विक्रयप्रायश्चित्तं। धेनु-गज-अनडुह-महिषी-महिष-अज-खर-उष्ट्र-हरिण-रुरु-
अश्व-आरण्यमृगादिविक्रयप्रायश्चित्तं। गोधूम-मुद्ग-तण्डुल-धान्य-गुड़-लवण-का-
र्पास-नीली-पलाण्डु-लशुन-गृञ्जन- हिङ्गु-रस-हरिद्रादिमूलत्र्यम्बकादिफल-धर्म्म-
दासी-दन्त-नख-उपकेश्य-अन्न-गो-मधु-मांस-शालग्रामादि-पुष्प-तुलसी- रत्नादि-
रुद्राक्ष-सुवर्ण- रजत-ताम्र-कांस्यादि-शस्त्र-गृहोपकरण-कस्तूर्य्यादि-वस्त्र-धर्म्म-स्मृति-
नामप्रभृतिनानावस्तुविक्रयप्रायश्चित्तं। सकलीकरणप्रायश्चित्तं। मलिनीकरणप्रा-
यश्चित्तं। निक्षेपहरण-धेनुहरण-गोवत्सहरण-अनडुह-महिषी-महिष-गज-अश्व
उष्ट्र-खर-अज-मृग-भूमि-स्वदत्त-रत्न-कन्या-नारी-वश्या-पुरुष-दासी-शय्या-यान-पा
दुका-छत्र--चामर-पुष्प-फल-कन्दादि-कोषशाक-पत्र-इन्धन-जल-भक्ष्य-भोज्य--त्र्य-
म्बकरुद्राक्ष-गुड़-क्षीर-त्रिकटु-रसौषधि-गृहोपकरण-शस्त्रादिहरणप्रायश्चित्तकथनं।
मार्गनिरोधप्रायश्चित्तं। तड़ागादिहरणप्रायश्चित्तं। परिधानप्रतिग्रहप्रायश्चित्तं। कूट-
साक्ष्यप्रायश्चित्तं। पुस्तकादिहरणप्रायश्चित्तं। शालग्रामहरणप्रायश्चित्तं। अपाचीक-
रणप्रायश्चित्तं। चाण्डालस्त्री-रजकी-चर्म्मकारस्त्री-नटस्त्री-वरुड़स्त्री-कैवर्त्तस्त्री-मेद-

स्त्री-भिन्नस्त्री-स्वर्णकारस्त्री-सौविकस्त्री-तक्षकस्त्री--मांसविक्रयिस्त्री-कुलालस्त्री-शौण्डिक-स्त्री-कारुस्त्री-नापितस्त्री-रजस्वला-विधवा-वेश्या-दासी-पाषण्डपतितादिस्त्रीगमनप्रायश्चित्तं । कन्यागमनप्रायश्चित्तं । कन्यादूषणप्रायश्चित्तं । पुंमैथुनप्रायश्चित्तं । खरोष्ट्र-वड़वा-वत्स-महिषाजादिमैथुनप्रायश्चित्तं । अवकीर्णिप्रायश्चित्तं । मिथ्यारोपप्रायश्चित्तं । अभिशस्तप्रायश्चित्तं । कुग्रामवासप्रायश्चित्तं । कुत्सितसेवाप्रायश्चित्तं । खरोष्ट्रानडुन्महिषवत्सारोहणप्रायश्चित्तं । ऊढायाः पुनरुद्वाहप्रायश्चित्तं । मातृस्वसृबन्धुपरिणये-प्रायश्चित्तं । स्वदारपरित्यागप्रायश्चित्तं । पितृगेहे असंस्कृतकन्यारजस्वलाप्रायश्चित्तं । कारागृहनिवासप्रायश्चित्तं । वन्दिगृहीतानां नारीणां प्रायश्चित्तं । रोगनिवृत्त्यर्थं मद्यादिपानप्रायश्चित्तं । जातिभ्रंशकरणप्रायश्चित्तं । परान्नभोजनप्रायश्चित्तं । दीर्घसत्रभोजनादिप्रायश्चित्तं । शूद्रसत्रभोजने प्रायश्चित्तं । शूद्रगृहे वेश्यागृहे च स्वयं पाकादिभोजने प्रायश्चित्तं । एकादश्यां भोजने प्रायश्चित्तं । नवश्राद्धनवश्राद्धयोः प्रतिग्रहादिप्रायश्चित्तं । क्रीतान्नादिभोजनप्रायश्चित्तं । पर्य्युषितान्नभोजनप्रायश्चित्तं । दुर्भक्ष्यभक्षणप्रायश्चित्तं । दुष्टशाकभक्षणप्रायश्चित्तं । कारणं विना कृसरान्नपरमान्नभोजनप्रायश्चित्तं । व्रात्यकुष्ठि-कुण्ड-गोलक-यति-दम्पति-शिष्टान्नादिभोजनप्रायश्चित्तं । पत्न्या सह भोजनप्रायश्चित्तं । शूद्रभाण्डभोजनादिप्रायश्चित्तं । पतितदुष्टाक्रान्तपङ्क्तिभोजनप्रायश्चित्तं । पलाण्डुलशुनादिभक्षणप्रायश्चित्तं । श्वेतवृन्ताक-वक्र-शिग्रुवृन्ताकादिभक्षणप्रायश्चित्तं । ताम्रपात्रे गव्यादिभोजनप्रायश्चित्तं । पीतशेषजलपानप्रायश्चित्तं । खरी-उष्ट्री-हरिणीप्रभृतीनां क्षीरपानप्रायश्चित्तं । मनुष्यपशुपक्ष्यादिमलमूत्रादिभक्षणप्रायश्चित्तं । भोजनकाले दीपनिर्व्वापणप्रायश्चित्तं । एकहस्तवामहस्तादिना भोजनप्रायश्चित्तं । ग्रहणकाले भोजनादिप्रायश्चित्तं । सन्ध्यादिकर्म्मकाले भोजनकाले च चाण्डालध्वनिश्रवणप्रायश्चित्तं । सत्कर्म्माचरणे शूकरादिदर्शनप्रायश्चित्तं । रजस्वलास्पृष्टान्नभोजनप्रायश्चित्तं । द्विर्भोजनप्रायश्चित्तं । देवपूजायां वैश्वदेवपरित्यागप्रायश्चित्तं । उष्णोदक-कूपोदकस्नानप्रायश्चित्तं । मृत्तिकाहीनशौचप्रायश्चित्तं । भोजने क्षुतापानवायूत्सर्गादौ प्रायश्चित्तकथनं । अन्योन्यस्पृष्टान्नभोजनप्रायश्चित्तं । शिवनिर्म्माल्यभोजनप्रायश्चित्तं । नीलवस्त्रधारणप्रायश्चित्तं । दुर्मृतब्राह्मणक्षत्रियविशां प्रायश्चित्तं । दुर्मृतवाहकानां प्रायश्चित्तं । मूल्यं गृहीत्वा-शववहनप्रायश्चित्तं । धनिष्ठापञ्चकमरणप्रायश्चित्तं । नन्दादितिथिमरणप्रायश्चित्तं । शवपतनादिप्रायश्चित्तं । दहनयोग्यस्य निखातकरणप्रायश्चित्तं । एवं खननयोग्यस्य दहनप्रायश्चित्तं । दहनाभावप्रायश्चित्तं । पिण्डोपहतिप्रायश्चित्तं । अस्थिसञ्चयनात् प्राक् प्रेताग्निनाशे प्रायश्चित्तं । अस्थ्युपहतप्रायश्चित्तं । परिषेधप्रायश्चित्तं । विधायकप्रायश्चित्तं । अनुवादकप्रायश्चित्तं । देशान्तरमरणप्रायश्चित्तं । देशान्त-

विषयः। रम्हतानामस्थिशरीराभावे प्रायश्चित्तं। व्रणे क्रम्युत्पाते प्रायश्चित्तं। म्हतस्य पुनर्ज्जीवन प्रायश्चित्तं। देशान्तरवासिनो द्वादशवर्षादूर्द्धं परलोकक्रियानन्तरं पुनरागमन-प्रायश्चित्तं। सूतकद्वितये म्हतस्य प्रायश्चित्तं। सहगमनभीतायाः प्रायश्चित्तं। म्हतस्याहिताग्नेर्लौकिकाग्निना दहने प्रायश्चित्तं। गर्भिण्या मरणे प्रायश्चित्तं। सूतिका-रजस्वलयोर्मरणे प्रायश्चित्तं। आहिताग्नेर्दुर्म्मरणप्रायश्चित्तं। शृगालादिदष्टप्राय-श्चित्तं। विप्राणां गर्भाधानादिषोड़शकर्म्मपरित्यागप्रायश्चित्तं। वेदाभ्यासपरित्याग-प्रायश्चित्तं। अनध्याये वेदपाठप्रायश्चित्तं। राक्षसादिविवाहप्रायश्चित्तं। परिवित्ति-प्रायश्चित्तं विवाहमध्ये रजोदर्शनप्रायश्चित्तं। स्थालीपाककाले अग्निशान्तिप्राय-श्चित्तं। आग्नेयस्थालीपाकादूर्द्धं औपासनलोपप्रायश्चित्तं। अन्वारम्भणीयलोपप्राय-श्चित्तं। प्रतिपद्धोमलोपप्रायश्चित्तं। आग्रयणलोपप्रायश्चित्तं। गृहस्थानां ब्रह्मयज्ञ-लोपप्रायश्चित्तं। देवतार्च्चनपरित्यागप्रायश्चित्तं। वैश्वदेवपरित्यागप्रायश्चित्तं। एको-द्दिष्टश्राद्धाकरणप्रायत्तिश्चं। पार्व्वणादौ अर्घ्यपात्रादिविस्मरणप्रायश्चित्तं। पार्व्वणवि-स्मृतिप्रायश्चित्तं। अग्निहोत्रत्यागप्रायश्चित्तं। उपरागप्रायश्चित्तं। गृहस्थस्य धर्म्मा-तिक्रमे प्रायश्चित्तं। मानसिकस्नानविधिकीर्त्तनं। निषिद्धदिवसे ताम्बूलभक्षणप्रा-यश्चित्तं। तुलादिषोड़शमहादानानामितरेषाञ्च दानानां प्रतिगृहीतृणामाचार्य्या-दीनां प्रायश्चित्तं। अपमृत्यूत्तरणमार्ज्जनविधिः। केषुचित्पापेषु नदीस्नानरूपं प्रायश्चित्तं। तत्र पुण्यनद्यादिनिरूपणं। गजाश्वादिप्रतिग्रहप्रायश्चित्तं। तुलादिषु प्रतिगृहीतृणां प्रायश्चित्तप्रयोगकथनं। धर्म्मविक्रयिणः प्रतिग्रहप्रायश्चित्तं। नाम-विक्रयिणः प्रतिग्रहप्रायश्चित्तं। स्मृति-सोमादिविक्रयिणः प्रतिग्रहप्रायश्चित्तं। पुरो-डाशभक्षणप्रायश्चित्तं। अयाज्ययाजनप्रतिग्रहप्रायश्चित्तं। तप्तमुद्राधारिभ्यः प्रतिग्रह-प्रायश्चित्तं। लिङ्गधारिणां प्रायश्चित्तं। गायत्रीप्रदातुः प्रायश्चित्तं। परार्थं गाय-त्रीजपकर्त्तृणां प्रायश्चित्तं। ग्रामप्रतिग्रहप्रायश्चित्तं। कुष्माण्डप्रतिग्रहप्रायश्चित्तं गो-भूमि-तिल-स्वर्ण-घृत-वस्त्र-धान्य-गुड़-रजत-लवणादिप्रतिग्रहप्रायश्चित्तं। केश-वादिचतुर्व्विंशतिमूर्त्ति-प्रतिग्रहप्रायश्चित्तं। दशावतारप्रतिग्रहप्रायश्चित्तं। राम-लक्ष्मण-श्रीमूर्त्ति-चक्रपाणि-शिवलिङ्ग-शङ्ख-घण्टादि-ताम्र-कांस्य--तिलपात्रादिप्रतिग्र-हप्रायश्चित्तं। हरिहर-अर्द्धनारीश्वरप्रतिग्रहप्रायश्चित्तं। दुर्ज्जनात प्रतिग्रहप्राय-श्चित्तं। दुर्ज्जनलक्षणं। आततायिनः प्रतिग्रहप्रायश्चित्तं। पाषण्डात् प्रतिग्रहप्रा-यश्चित्तं। पाषण्डलक्षणं। कुण्ड-गोलकयोः प्रतिग्रहप्रायश्चित्तं। वेश्या-व्यभिचारि-णी-भर्त्तृघ्नीभ्यः प्रतिग्रहप्रायश्चित्तं। आसां लक्षणञ्च। चाण्डालदर्शनादिप्रायश्चित्तं। परिवेत्तृप्रतिग्रहप्रायश्चित्तं। पुस्तकादिप्रतिग्रहप्रायश्चित्तं। व्रात्यनटादिभ्यः प्रति-ग्रहप्रायश्चित्तं। आभीरात् प्रतिग्रहप्रायश्चित्तं। चातुर्मास्यव्रतादिषु प्रतिग्रहप्राय

विषयः। श्चित्तं। कार्त्तिक-माघ-वैशाखव्रतादिषु प्रतिग्रहप्रायश्चित्तं। नानाविधफलप्रतिग्रह-प्रायश्चित्तं। मकरसंक्रान्तौ प्रतिग्रहप्रायश्चित्तं। कारणं विना स्वसतीपत्नीत्याग-प्रायश्चित्तं। अश्व-महिष-धेनुप्रति-ग्रहप्रायश्चित्तं। सन्यासिनः प्रतिग्रहप्रायश्चित्तं। पतितात् प्रतिग्रहप्रायश्चित्तं। मठपतेः सन्न्यासिनः प्रतिग्रहप्रायश्चित्तं। महापातकिसंसर्गप्रायश्चित्तं। रहस्यकृत-ब्रह्महत्याप्रायश्चित्तं। रहस्यकृतसुरापानप्रायश्चित्तं। रहस्यकृतसुवर्णस्तेयप्रायश्चित्तं। रहस्यकृतगुरुतल्पगमनप्रायश्चित्तं। चान्द्रायणादिकृच्छ्रलक्षणादिकीर्त्तनं। यवमध्य-पिपीलिकादिचान्द्रायणलक्षणं। महाचान्द्रायणादिविधिकथनं। प्राजापत्यकृच्छ्रादिलक्षणं। तप्तकृच्छ्रादिलक्षणं। पराक-यावक-सान्तपन-महासान्तपनातिकृच्छ्रादीनां लक्षणं। माहेश्वर-ब्रह्म-धान्य-सुवर्ण-कृच्छ्रादीनां लक्षणं। चान्द्रायणादीनां सर्व्वेषां प्रत्याम्नायकीर्त्तनञ्च। कदली-विवाहरूपप्रायश्चित्तकथनं। नारायणवलिविधिकीर्त्तनं। वैष्णवश्राद्धविधिः। प्रायश्चित्तादौ एतच्छ्राद्धावश्यकताकीर्त्तनं। नान्दीश्राद्धविधिः। प्रायश्चित्तलक्षणादि-कीर्त्तनं। अघमर्षणस्नानविधिः। महासंकल्पस्वरूपकथनादिकं। अधिकारिभेदेन प्रायश्चित्तसंख्यादिकथनं। मुण्डनादिविधिकथनं। सुवासिनीप्रायश्चित्तकथनं। विधवायाः पापविशेषकथनपूर्व्वकं प्रायश्चित्तकीर्त्तनञ्च।

No. 1924. पितृभक्तिः।

Substance, country-made paper, 12 × 4 inches. Folia, 56. Lines, 6 on a page. Extent, 1,155 s'lokas Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájpura, Darbháṅgá, Paṇḍit Bábulála Páṭhaka; another at Magránigrám, Post Madhubaní, Darbháṅgá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose and verse. Correct.

Pitṛibhakti. The duty of a son to the manes of his father,—a treatise on various kinds of S'ráddhas. By S'rídatta.

Beginning. कातीयकल्पं सहकर्कभाष्यं भूपाल-गोपालमतादि दृष्ट्वा।
सताञ्च वाक्यानि निशम्य सम्यक् यजुर्व्विदां श्राद्धविधिं विधास्ये॥
तत्र पूर्व्वदिने वस्त्रशुद्धिर्गेहशुद्धिः शरीरशुद्धिश्च कर्त्तव्या। निरामिषमेकभक्तञ्च निमन्त्रनन्तु पूर्व्वदिनप्रदोषान्तरे वा श्राद्धदिने वा। इत्यादि।

End. विज्ञाननिर्म्मलमलङ्करणं गुणानामादर्शविम्बवदपि प्रतिवीचितानां।
चेतश्च सत्कृतिमुदं सततं बुधानामन्तः प्रविश्य पितृभक्तिरियं तनोतु॥

ननु गौरवमात्रेण कार्य्योपेत्ताच पण्डितैः ।
यत आह मनुर्ग्राह्यं बालादपि सुभाषितं ॥

Colophon. इति महामहोपाध्यायसत्पण्डितश्रीदत्तविरचिता पितृभक्तिः समाप्ता ।

विषयः । यजुर्व्वेदिनां श्राद्धविधानकथनं। तत्र निमन्त्रणादिविधिकथनं। श्राद्धप्राक्कालीनश्राद्धदिनकृत्यनिरूपणं। श्राद्धपरिभाषाकथनं। पार्व्वणश्राद्धप्रयोगकथनं। श्राद्धलक्षणविवेचनं। श्राद्धाङ्गनिरूपणं। पार्व्वणैकोद्दिष्टादिषु इतिकर्त्तव्यताभेदनिरूपणं। सपिण्डीकरणश्राद्धविधिकथनं। स्त्रीशूद्रकर्तृकश्राद्धविधिकथनं। अपुत्रस्य पार्व्वणश्राद्धं न कर्त्तव्यमितिकथनं। अशौचातिरिक्तमृताहश्राद्धप्रतिबन्धके विशेषकथनं। शुक्लैकादश्यामपि पतितश्राद्धकर्त्तव्यतानिरूपणं। षाण्मासिकश्राद्धविधिकथनं। पिण्डपितृयज्ञप्रकारकथनं। पतिपुत्ररहितायाः स्त्रियाः सपिण्डननिषेधकथनं। प्रेतश्राद्धधर्म्मकथनादिकं। आमश्राद्धविधिकथनं। नान्दीमुखश्राद्धविधिः। तत्र सपिण्डीकरणानधिकारिणा कनिष्ठेन असपिण्डितेऽपि पितरि नान्दीश्राद्धं कर्त्तव्यमितिनिरूपणं। एकोद्दिष्टश्राद्धप्रयोगकथनं। आद्यश्राद्धविधिकथनं। सपिण्डनश्राद्धप्रयोगकथनं। आभ्युदयिकश्राद्धप्रयोगकथनञ्च।

No. 1925. काल्युपनिषत् ।

Substance, country-made paper, 9 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 45 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Kályupanishad. On the divinity of Dakshiṇa-káliká : alleged to be a part of the Atharva Veda, but not included in the collections of the Atharva Veda Upanishads ordinarily met with—most probably a forgery.

Beginning. अथ हैनां ब्रह्मस्वरूपिणीमाप्नोति कामः रोफो दीर्घनेत्रविन्दुरूपिणीं तां। त्रिगुणामादौ कूर्चद्वयं कूर्चवीजं व्योममद्यस्वरमेलनरूपं तद्द्वयं भुवनाद्व्योमज्वलनः देहशून्यमेलनरूपं तद्द्वयेति दक्षिणाकालिकेति च इत्यादि ।

End. स संसारार्णवं तीर्त्त्वा सर्व्वमन्त्रसिद्धिं लब्ध्वा केवलभैरवो भवति ।

Colophon. इत्यथर्व्ववेदे काल्युपनिषत् समाप्ता ।

विषयः । श्रीदक्षिणकालिकायाः ब्रह्मस्वरूपत्वकथनपूर्व्वकं तदुपासनप्रकार-माहात्म्यादि-कीर्त्तनं ।

No. 1926. गङ्गोपनिषत् ।

Substance, country-made paper, 9 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 43 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháṅgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Gaṅgopanishad. An eulogium on the river Ganges: called an Upanishad, but not affiliated to any of the Vedas.

Beginning. यां देवा देवर्षयः पितरश्च पर्य्युपासते । यान्ह्षयः सा नो देवर्षिर्देवानां पापं हन्तु धर्म्मसाविनी । यां मूर्ध्नि धत्ते ईशानोऽमृतत्वाय शितिकण्ठः परातनः । तामहं देवीमुपाश्रये । मातेव सा मामवतु । इत्यादि ।

End. य इमां विद्यामधीते तरति ब्रह्महत्यां तरति स्तेयं तरति पारदारिकत्वं लभतेऽभिमतं सर्व्वमधीयानो मासमेकमिति ॥

Colophon. इति श्रीगङ्गोपनिषत् समाप्ता ।

विषयः । गङ्गाया उत्पत्त्यादिकथनपूर्व्वकं माहात्म्यकीर्त्तनं ।

No. 1927. सूर्य्योपनिषत् ।

Substance, country-made paper, 11 × 3 inches. Folia, 3. Lines, 6 on a page. Extent, 36 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháṅgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Súryopanishad. On the adoration of the Sun as the supreme divinity: called an Upanishad, but not affiliated to any of the Vedas.

Beginning. अथ सूर्य्याथर्व्वशीर्षं व्याख्यास्यामः । ब्रह्मऋषिर्गायत्रीच्छन्द आदित्यो देवता हंसायग्निनारायणयुक्तं वीजं हृल्लेखाशक्तिर्वियदादिसर्गसंयुक्तं कीलकं धर्म्मार्थकाममोक्षसिद्ध्यर्थे जपे विनियोगः । षट्स्वरारूढवीजेन षड्ङ्गरक्ताम्बुजसंस्थितं सप्ताश्वरथिनं इत्यादि ।

End. हस्तादित्ये जपति स महामृत्युं तरति य एवं वेद । इत्युपनिषत् ।
ॐ सह नाववतु सह नौ भुनक्तु सह वीर्य्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः ३ ।

Colophon. इति सूर्य्योपनिषत् ।

विषयः । सूर्य्यस्य परब्रह्मत्वकथनं । तन्मन्त्रादिकथनपूर्व्वकं माहात्म्यकीर्त्तनञ्च ।

No. 1928. गणेशोपनिषत्।

Substance, country-made paper, 11 × 3 inches. Folia, 3. Lines 6 on a page. Extent, 34 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páthaka. Appearance, new. Prose. Correct.

Gaṇeśopanishad. On the adoration of Gaṇeśa as the Supreme Divinity—an apocryphal work.

Beginning. अथ गणेशाथर्व्वशीर्षं व्याख्यास्यामः। ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि त्वमेव केवलं कर्त्तासि त्वमेव केवलं कर्त्तासि। अवत्वस्मान् त्वमेव केवलं हर्त्तासि त्वमेव केवलं सर्व्वं खल्विदं ब्रह्मासि त्वञ्च साक्षादात्मासि नित्यमृतं वच्मि सत्यं वच्मि। इत्यादि।

End. महानद्यां प्रतिमासन्निधौ जप्त्वा सिद्धमन्त्रो भवति महाविघ्नात् प्रमुच्यते महादोषात् प्रमुच्यते स सर्व्वविद्भवति य एवं वेद। इत्युपनिषत्। ॐ सह नाववत्वित्यादि। ॐ शान्तिः ३।

Colophon. इति गणेशोपनिषत्।

विषयः। गणेशस्य परब्रह्मस्वरूपत्वकथनं। माहात्म्यादिकीर्त्तनञ्च।

No. 1929. दुर्गोपनिषत्।

Substance, country-made paper, 11 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 20 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Durgopanishad. On the adoration of Durgá as the Supreme Divinity: alleged to be a part of the Atharva s'iras Upanishad of the Atharva Veda.

Beginning. अथातो दुर्गां व्याख्यास्यामः। अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच। किं जगत्कारणं किं बन्धमोक्षयोः किं त्रयाणां देवानां ब्रह्मविष्णुरुद्राणां किं दशावताराणां इत्यादि।

End. अन्ते दुर्गातत्त्वं परब्रह्म भवतीत्याह परमेष्ठी भगवानाश्वलायनं भगवन्तं। ॐ सह नावित्यादि। ॐ शान्तिः ३।

Colophon. इत्यथर्व्वशिरसि दुर्गोपनिषत्।

विषयः। दुर्गायाः परब्रह्मत्वकीर्त्तनादिकं।

No. 1930. अद्भुतसागरसारः ।

Substance, country-made paper, 12 × 4 inches. Folia, 96. Lines, 6 on a page. Extent, 1,816 s'lokas. Character, Maithili. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, fresh. Prose and verse. Correct.

Adbhuta-ságara-sára. Portents, their consequences, and the means of obviating the same. By Mahápaṇḍit Chaturbhuja. Contents: Fall of vultures and hawks. Portents in connection with celestial luminaries, meteors, rainbows, &c. Appearance of cities near those objects. Portents in connection with the rising and the setting of the sun. Ditto with the moon. Ditto with Ráhu, the ascending node, and other planets. Wars of planets. Portents in connection with rains, with Nakshatras, with winds, with fires, with dawn and vesper, with shadows. Recondite peculiarities in earthquakes, reservoirs of water, conflagrations, sacred images, Indra's flag,* vegetables, houses, music, dress, arms, men, boils, tremors, dreams, the human body, parturition, elephants, horses, cattle, dogs, jackals, crows, and herons; their effects on human destiny, and the mode of obviating those effects.

Beginning. गृध्रश्येन + चिकस्य कपोतोलूकचातकाः ।
वाद्गुलीवककङ्कास्च पतन्ति यस्य वेश्मनि ॥
ध्वजे रथे महोत्पातं वाल्मीके जायते मधु ।
पशूनां प्ररोदनञ्चैव द्वारञ्च कटकटायते ॥
हसनञ्जातमात्रस्य तत्क्षणे दन्तदर्शनं ।
जननं जातदन्तस्य सुतोत्पत्तिः शिरो विना ॥ इत्यादि ।

End. विष्णुधर्म्मोत्तरे । अद्भुते तु समुत्पन्ने यदि दृष्टिः शिवा भवेत् ।
सप्ताहाभ्यन्तरे ज्ञेयमद्भुतं निष्फलं हि तत् ॥
वटकलिकायां, यदि विकारसम्भः पर्ज्जन्यस्त्यजति सप्तरात्रात् प्रशममुपगच्छतीति ॥

Colophon. इति महापण्डितचतुर्भुजविरचिताद्भुतसागरसारः समाप्तः ।

विषयः । गृध्रश्यनादिपतनादिरूपाद्भुतकथनपूर्व्वकं प्रत्येकतत्प्रतीकारोपायकीर्त्तनं । तत्र आदित्यादीनामद्भुतकथनपूर्व्वकं तच्छान्तिकथनं । उल्कापात-शक्रधनुः-परिवेष-गन्धर्व्वनगर-विकृतदृष्टिरूपनाभसाद्भुतकथनपूर्व्वकं तच्छान्तिकथनं । विशेषेण

* Something like a May-pole set up on the 12th of the waxing moon in the month of Bhádra, on the occasion of a festa in honor of Indra.

सूर्य्याद्भुतादिकीर्त्तनं । तत्र उदयादिफलवर्णनञ्च । एवं चन्द्रस्य अद्भुतादि-कथनं । राहोरद्भुतादिकथनं । तत्र अयन-मास-दिक्-ग्राम-वर्ण-ग्रहणसमा-द्यद्भुतकथनादिकं । पञ्चभङ्गकथनं । एवं मङ्गलबुधादीनां ज्ञेयं । ग्रहयुद्धाद्भु-तवर्णनं । रव्यादिवर्षाद्भुतकीर्त्तनं । नक्षत्राद्भुतवर्णनं । निर्घाताद्भुतकथनं । दिक्दाहाद्भुतवर्णनं । सन्ध्यद्भुतवर्णनं । छायाद्भुतकथनं । भूकम्पाद्भुतकथनं । जलाशयाद्भुतकथनं । अग्न्यद्भुतकथनं । देवप्रतिष्ठाद्भुतवर्णनं । शक्रध्वजाद्भुत-कथनं । वृक्षलताफलपुष्प-शस्यान्नाद्यद्भुतकथनं । गृहाद्यद्भुतकथनं । वाद्याद्य-द्भुतकथनं । वस्त्राद्भुतकथनं । शस्त्राद्यद्भुतवर्णनं । मानुषाद्भुतवर्णनं । पिटका-द्भुतकथनं । स्यन्दनाद्भुतकथनं । खञ्जाद्भुतवर्णनं । कायारिष्टाद्भुतवर्णनं । प्रसवाद्भुतवर्णनं । गजाद्भुतवर्णनं । अश्वाद्भुतवर्णनं । वृष-महिषाद्यद्भुतवर्णनं । कुक्कुराद्भुतवर्णनं । शृगालाद्भुतकथनं । काकाद्भुतकथनं । कङ्काद्यद्भुतकथनं । एतेषां शान्त्युपायकथनञ्च । अद्भुतानां फलपाकसमयकथनादिकं ।

No. 1931. अष्टविकृतिः ।

Substance, country-made paper, 10 × 3 inches. Folia, 12. Lines, 6 on a page. Extent, 147 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Verse. Correct.

Ashṭa-vikṛiti. On the eight different artificial forms in which the texts of the Vedas are written, and the merit of getting them by-heart and reciting them under particular restrictions. Anonymous. (*Vide ante*, Vol. III, p. 199).

Beginning. अथ जटाद्यष्टविकृतीनां लक्षणानि लिख्यन्ते । तत्र विकृतीनां पाठे फलं पङ्क्ति-पावनत्वं ।

जटादिविकृतीनां ये पारायणपरायणाः

महात्मानो द्विजाः श्रेष्ठास्ते ज्ञेयाः पङ्क्तिपावनाः । इत्यादित्यपुराणात् ।

अन्यान्यपि विष्णुलोकादीनि फलानि इत्यादि ।

End. शिखां पूर्व्वोक्तामुच्चार्य्य विपर्य्यासेन तानि पदानि उच्चार्य्य पुनः क्रमेण तानि पदान्युच्चारयेत् । अयं विकृतिविशेषो घन इति प्रोक्तः ऋषिभिः ।

Colophon. इत्यष्टविकृतिः समाप्ता ।

विषयः । जटाद्यष्टविकृतीनां पारायणे फलश्रुतिकीर्त्तनं । जटालक्षणादिकथनं । विकृतिषु क्रमभेदव्यवस्थापनं । मालालक्षणादिकथनं । एवं शिखा-रेखा-ध्वज-दण्ड-रथ-घनानां लक्षणादिकथनं । सर्व्वत्र उदाहरणप्रदर्शनञ्च ।

No. 1932. वर्णरत्नदीपिका, शिक्षा ।

Substance, country-made paper, 10 × 3 inches. Folia, 24. Lines 6 on a page. Extent, 276 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáge'svara Páthaka. Appearance, new. Verse. Correct.

Varṇaratna-dípiká, S'ikshá. On the pronunciation of letters and syllables, their accents, quantities, and powers—an abstract of one of the Prátiśákhyas, but the school to which it belongs is not mentioned. By Amares'a, of the Bharadvája Gotra.

Beginning. श्रेयो दिशतु नः कृष्णः कंसमातङ्गकेशरी ।
राधाकेलिकलाभिज्ञो गोपीवादकुतूहली ॥
उत्पन्नो यः सुते वंशे बुद्धिमान् कृतनिश्चयः ।
अमरेश इतिख्यातो भरद्वाजकुलोद्भवः ॥
सोऽहं शिक्षां प्रवक्ष्यामि प्रातिशाख्यानुसारिणीं ।
बालानां पाठशुद्ध्यर्थं वर्णज्ञानादिहेतवे ॥
जपादिशुभकार्य्येषु पुमान्नाधिकृतो भवेत् ।
सम्यक् पाठं विना यस्मात् तन्निमित्तं वदाम्यहं ॥ इत्यादि ।

End. अमरेशकृतामेतां शिक्षां यो धारयेत् सुधीः ।
विद्वज्जनसभामध्ये जयं स लभते ध्रुवं ॥
वादे यस्य चतुर्म्मुखोऽपि जड़तां धत्ते क्षणं विस्मितो
वर्णोच्चारणकौतुके पुनरयं वाचस्पतिर्मूकतां ।
सोऽयं वादिघनानिलः प्रमुदितो वाचालदर्पं हरन्
भूमीन्द्रैरभिपूजितो विजयते नाम्नामरेशः सुधीः ॥

Colophon. इत्यमरेशकृता वर्णरत्नदीपिका शिक्षा समाप्ता ।

विषयः । वर्णसंज्ञा-विक्रिया-स्वरादिनिरूपणं ।

No. 1933. कृत्यतत्त्वार्णवः ।

Substance, country-made paper, 12 × 3 inches. Folia, 112. Lines 11 on a page. Extent, 4,426 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbháñgá, Paṇḍit Mádhava Jhá. Appearance, new. Prose and verse. Correct.

Kṛittya-tattvárṇava. On fasts, penances, pilgrimages and other religious duties enjoined on householders. By S'rínátha A'chárya, son of S'ríkara.

Beginning. श्रीगोविन्दपदाम्भोजद्वन्द्वमद्वन्द्वसाधनं । वन्दे वृन्दारकधुनीमकरन्दमनोहरं ॥
श्रीकराचार्य्यपुत्रेण श्रीमच्छ्रीनाथशर्म्मणा। प्रीतये विदुषाञ्चक्रे कृत्यकालविनिर्णयः॥
श्रौते विधौ कालकृतो विरोधः प्रायः सदैव प्रथितो बुधानां।
अतस्तदुच्छेदकृते मुनीनां विचार्य्य वाचो विदधामि तत्त्वं ॥
नानाविदेशिविदुषां मतमाकलय्य चोद्यमं यदभिलिख्य समर्पयामि।
श्रद्धां बुधा विपथगड्डलिकाप्रवाहे दुराद्विहाय कुरुतादरमत्र गाढं ॥
इह खलु नित्यनैमित्तिकादियावद्वैदिककर्म्माणि इत्यादि ।

End. आगमोक्तमन्त्रोऽपि विधिबलाज्जप्य एव पठनीयः। अधिकं विवेकार्णवे ज्ञेयमिति।
विचार्य्य वाचो मुनिपुङ्गवानां निबन्धजातञ्च महार्णवाद्यं ।
मया कृतः कालविनिर्णयोऽयं सदा बुधानां + + मातनोतु ॥
कृत्यतत्त्वार्णवो नाम निबन्धो रचितो मया ।
प्रीयन्तामत्र विबुधा व्यवस्थारत्नराशिभिः ॥

Colophon. इति श्रीनाथाचार्य्यकृतकृत्यतत्त्वार्णवः समाप्तः ।

विषयः । कर्म्मणः प्राधन्यकथनपूर्व्वकं तिथिनक्षत्रवारादीनामङ्गत्वनिरूपणं। संवत्सरनिरूपणं। तत्र मासपदशक्यतावच्छेदकनिर्णयः। अयनादिनिरूपणं। रूढ़यौगिकादिविवेचनं। षाण्मासिकश्राद्धकालविवेचनं। सौरादिमासलक्षणं। अत्र विविधमतोपन्यासपूर्व्वकं तत्खण्डनं। अधिमासनिर्णयः। अत्र कर्त्तव्याकर्त्तव्यनिरूपणं। संक्रान्तिनिरूपणं। मन्दा-मन्दाकिन्यादिसप्तविधसंक्रान्तिस्वरूपकथनं। ग्रहणनिरूपणादिकं। सामान्यतिथिषु कर्म्माङ्गत्वनिरूपणं। प्रतिपदादिषु तिथिषु विहितानां कर्म्मणां व्यवस्थादिकथनं। एकादशीव्रतविधिकथनं। तत्र दशमीद्वादश्योर्नियमकीर्त्तनञ्च। वैशाखमासकृत्यनिरूपणं। तत्र गङ्गास्नानविधिकथनं। युगादिश्राद्धविधानं। युगादिनिरूपनञ्च। ज्यैष्ठकृत्यनिरूपणं। तत्र कृष्णाष्टम्यां शिवपूजनविधान। सावित्रीव्रतव्यवस्थादिकथनं। शुक्लचतुर्थ्यां मुमापूजनविधिः।

विषयः। अरण्यषष्ठीविधानं। दशहराकृत्यनिरूपणं। पुरुषोत्तमदर्शनविधानञ्च। आषाढ़कृत्यनिरूपणं तत्र हरिशयनविधानं। चातुर्म्मास्यव्रतविधिः। तत्र द्रव्यविशेषवर्ज्जने फलविशेषनिरूपणं। श्रावणकृत्यनिरूपणं। मनसापञ्चमीविधिकथनं। अशून्यशयनव्रतविधानं। भाद्रकृत्यनिरूपणं। तत्र जन्माष्टमीविधानं। अघोरचतुर्द्दशीविधानं। चन्द्रादर्शनविधानं। हरितालिकानिरूपणं। दुर्व्वाष्टमीव्रतविधिः। अनन्तव्रतविधानं। अगस्त्योदयविधिकथनञ्च। आश्विनकृत्यनिरूपणं। तत्र गजच्छायादिनिरूपणं। दुर्गोत्सवादिविधिकथनं। महाष्टम्युपवासविधिः। खञ्जनदर्शनविधिः। व्रीहिपाकश्राद्धविधिः। कोजागरकृत्यनिरूपणञ्च। कार्त्तिककृत्यनिरूपणं। तत्र सुखरात्रिपूजादिविधानं। उल्कादानादिविधिः। द्यूतप्रतिपद्विधिः। भ्रातृद्वितीया। उत्थानविधानं। वकपञ्चकविधिकथनादिकञ्च। मार्गशीर्षकृत्यकथनं। तत्र नवान्नश्राद्धविधानं। पौषकृत्यनिरूपणं। तत्र अष्टकाश्राद्धादिविधानं। महाभद्राविधिकथनं। अन्वष्टकाश्राद्धविधानञ्च। माघकृत्यनिरूपणं। तत्र दधिसंक्रान्तिव्रतविधानं। प्रातःस्नानविधिः। पञ्चम्यां श्रीपूजनविधिः। माघीसप्तमीविधिः। भीष्माष्टमीविधिः। भैमीविधिः। शिवरात्रिकृत्यकथनञ्च। फाल्गुनकृत्यनिरूपणं। चैत्रकृत्यनिरूपणं। वारुण्यादिविधिकथनं। भूतिव्रतविधिः। अशोककलिकापानविधिः। अनङ्गार्च्चनविधानञ्च। प्रकीर्णकविधिः। तत्र तिथ्यादिषु भक्ष्याभक्ष्यनिरूपणं। गङ्गास्नानफलकथनप्रसङ्गेन तद्गर्भादिनिरूपणं। तिथिषु पुण्यतरादिनिरूपणं। भोजनादिविधिकथनं। महानिशादिकालनिरूपणं। महागुरुनिपाते कर्त्तव्याकर्त्तव्यनिरूपणं। स्नानतर्पणजपादिविधिकथनं। दानादिविधिकथनं। पतिव्रताकृत्यनिरूपणं। शूद्रकृत्यनिरूपनञ्च।

No. 1934. शुद्धिविवेकः।

Substance, country-made paper, 13 × 3 inches. Folia, 64. Lines, 8 on a page. Extent, 1856 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Paṇḍit, Bábulála Páṭhaka; another copy at Magráṇi, Post Madhubaní, Darbhangá, Paṇḍit Choṭí Jhá, and another at Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Prose and verse. Incorrect.

S'uddhi-viveka. An essay on impurity of the person resulting from birth and death in one's family, or from other causes. By Rudradhara,

son of Lakshmídhara, and younger brother of Haladhara. Both the father and the brother had the title of Mahámahopádhyáya. The author says that "though there are current the Ratnákara, Párijáta, Mitákshará, Háralatá and others, his work would be gratifying to those that did not delight in them." This affords a clue to his date.

Beginning. हरतु दुरितजातं केशवस्यैकबाहुर्विपुलगलविलान्तः केशिनः सम्प्रविष्टः।
मुखपवनमिवास्य प्राशितुं संप्रवृत्तः कुवलयदलनीलः पञ्चशीर्षो भुजङ्गः॥
चिरन्तनानेकनिबन्धसिद्धः स्वसम्प्रदायानुगतस्फुटार्थः।
नत्वा हरिं रुद्रधरेण सम्यक् वितन्यते शुद्धिविवेक एषः॥
सन्त्येव रत्नाकरपारिजातमिताक्षराहारलतादयोऽन्ये।
तथापि तत्रालसमानसानां भवेत् प्रमोदाय मम प्रयासः॥
शुद्धिस्तावदखिलविहितकर्म्माधिकारापादको धर्म्मविशेषः। इत्यादि।

End. ततो रजस्वलाशुद्धिरुच्छिष्टस्पर्शने च सा।
स्वभावशुद्धिश्च तथा क्रमेणात्र प्रकीर्त्तिताः॥

Colophon. इति महामहोपाध्यायलक्ष्मीधरात्मजमहामहोपाध्यायश्रीहलधरानुजतमश्रीरुद्रधरकृतः शुद्धिविवेकः समाप्तः॥ शुभम्।

विषयः। शुद्धिपदार्थविवेचनं। सामान्यतः सर्व्ववर्णानां जननमरणयोः शुद्धिनिरूपणं। तत्र अशौचनियमकथनं। अशौचसङ्करव्यवस्थाकथनं। स्वाशौचादिकथनं। मृत्युविशेषाशौचनिरूपणं। निर्हारादिनिरूपणं। तदधिकारिनिरूपणं। औरसपुत्रादिलक्षणं। सापिण्ड्यनिरूपणं। देहाशुद्धिनिरूपणं। स्नानशुद्धिकथनं। तैजसादिद्रव्यशुद्धिकथनं। पक्वान्नद्रव्यशुद्धिकथनं। भूमिशुद्धिकथनं। जलशुद्धिकथनं। रजस्वलाशुद्धिकथनं। उच्छिष्टादिस्पर्शनशुद्धिकथनं। स्वभावशुद्धिनिरूपणञ्च।

No. 1935. समयप्रदीपः।

Substance, country-made paper, 14 × 4 inches. Folia, 60. Lines, 6 on a page. Extent, 1,327 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit, Bábulála Jhá. Appearance, new. Prose and verse. Correct.

Samaya-pradípa. Descriptions of some of the leading fasts, penances, and periodical optional rites, Vratas. By S'rídatta Mahámahopá-

dháya. Contents: Commencement of Vratas; duties on the day of a Vrata; effect of mourning on the day of a Vrata; meaning of the word Vrata; rules regarding fasting; the fast on the 11th of the moon; rules regarding Vratas to be performed at night. Effect of intercallary months on Vratas; Vratas in honor of Gaṇes'a; ditto of Súrya; ditto of S'iva; ditto of Vishṇu; Vrata on the 12th lunation of S'rávana; Vrata of sleeping on the ground for a fixed period; Vratas in honor of Brahmá; ditto of Nágas; Vrata on the 5th lunation of Mágha, "the nonwriting fifth," *Álekhya-panchamí;* Vratas in honor of the Deví (Durgá); minor fasts and penances; the adoration of Lakshmí on the 5th of the waxing moon in Chaitra; the Vrata of Damanabhañjiká, or thyme festival, on the 14th of the same month; calendar of fasts for the 12 months of the year; rites for the day when the sun passes from one to another sign of the Zodiac; ditto for the commencement of a Yuga, a cycle of Manu, and other cycles.

Beginning. श्रेयः समादिशतु सालसपक्ष्मपाते निद्रायिते ऽपि दृशौ भृशमुन्नमय्य ।
संवाह्यमानचरणाम्बुजजातहर्षो लक्ष्मीमुखेक्षणपरः परमेश्वरो वः ॥
निबन्धेषु निबद्धानि वचनानि विचिन्वतः ।
श्रीदत्तेन व्रतादीनां सारमाकृष्य लिख्यते ॥
तत्र पूर्व्वदिने स्नानादिना शरीरशुद्धिं कृत्वा निरामिषमेकवारं भुक्ता दन्तान् संशोध्य—इत्यादि ।

End. अपहन्तु तमः सकलं सम्यक् कर्म्मप्रचारमुपनयतु ।
समयप्रदीप एष स्थितिमेतु सतां गृहे नूनं ॥

Colophon. इति महामहोपाध्यायश्रीदत्तकृतौ समयप्रदीपे प्रकीर्णकः परिच्छेदः सम्पूर्णः । शुभं ।

विषयः । व्रतारम्भविधानकथनं । व्रतदिनकर्त्तव्यताकथनं । जननमरणाशौच पूर्व्वगृहीतव्रतानुष्ठानं तत्र आरम्भनिषेधश्च । व्रतशब्दार्थविवेचनं । उपवासविधिकथनं । एकादश्यादिव्रतेतिकर्त्तव्यताकथनं । नक्तव्रतविधिकथनं । अधिमासविवेचनं । गणेशव्रतकथनं । सूर्य्यव्रतकथनं । शिवव्रतकथनं । विष्णुव्रतकथनं । श्रवणद्वादशीव्रतकथनं । अशून्यशयनव्रतकथनं । ब्रह्मव्रतकथनं । नागव्रतकथनं । आलेख्यपञ्चमीव्रतकथनं । देवीव्रतकथनं । सामान्यव्रतादिकथनं । चैत्रशुक्लपञ्चम्यां लक्ष्मीपूजनविधिकथनं । तत्र चतुर्द्दश्यां दमनभञ्जीविधिकथनं । एवं द्वादशमासेषु प्रत्येकं कृत्यविधिकीर्त्तनं तत्तत्कालनिरूपणञ्च । संक्रान्तिकृत्यकथनं । युगाद्यामन्वन्तरादिनिरूपणञ्च ।

No. 1936. मन्त्रार्थदीपिका।

Substance, country-made paper, 11 × 3½ inches. Folia, 92. Lines, 10 on a page. Extent, 3,202 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, old. Prose. Correct.

Mantrártha-dípiká. Explanations and uses of the mantras used during daily worship. By S'atrughna Mahámahopádhyáya, by order of Mahárájádhirája Dharmachandra.

Beginning. तनावालोलायां भयचकितगोपालतरुणी-
द्दगन्तैरुन्मीलत्कुवलयदलश्रेणिसुभगैः।
हटादापूर्णायां तपनतनयानीरनिवह-
भ्रमेण प्रक्षेप्तुं कृतकरपुटो रक्षतु हरिः।
श्रुत्वा तातपणं सुदारुणतरं कामाभिरामाकृति-
र्जानक्या निभृतातिकातरदृशा साकूतमालोकितः।
श्रीरामः स पुनातु धूर्ज्जटिधनुर्भङ्गे यदङ्गेऽभवद्
रोमाञ्चस्य मिषेण गूढहृदयानन्दादमन्दाङ्कुरः॥
आदेशादथ राज्ञस्तस्य श्रीधर्म्मचन्द्रस्य।
मन्त्रार्थदीपिकेयं क्रियते शत्रुघ्नशर्म्मणा सम्यक्।
उव्वटे मन्त्रव्याख्या गुणविष्णौ ब्राह्मणसर्व्वस्वे।
वेदविलासिन्यामपि कौशलमीक्ष्यं तथापि मे सद्भिः॥
— — — — — — प्रथमं वेदार्थज्ञानप्रशंसा। तत्र कूर्म्म-
पुराणे। इत्यादि।

End. हलायुधे+उव्वटेऽपि चार्थस्ततो विधेयो मयि नावलेपः।
रत्नाकरे किं मणयो न सन्ति ततः समाकर्षति यः स धन्यः॥

Colophon. इति महाराजाधिराजश्रीमद्धर्म्मचन्द्रकारितमहामहोपाध्यायश्रीशत्रुघ्नविरचितायां मन्त्रार्थदीपिकायां ज्ञानकाण्डविवरणं समाप्तं।

विषयः। स्नान-सन्ध्या-देवार्च्चन-श्राद्ध-शतरुद्रीय-वैवाहिकादीनां मन्त्राणां विनियोगादि-कथनपूर्व्वकं व्याख्यानं।

No. 1937. चित्ररूपविचारः ।

Substance, country-made paper, 10 × 3 inches. Folia, 24. Lines, 1
on a page. Extent, 645 s'lokas. Character, Nágara. Date, ? Place
deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhak
Appearance, old. Prose. Correct.

Chitrarúpa-vichára. A Nyáya disquisition on colors as a charac
teristic of species. By Harirámа.

Beginning. रूपत्वं नीलादिषट्कान्यवृत्ति न वा। अत्र प्राञ्चः। नानाजातीयरूपवद्वयवा
ब्धोऽवयवी नीलपीताद्यव्याप्यवृत्तिरूपवान् सविषयावृत्तीत्यादि ।

End. नीलादिभेदेन विभिन्नसन्निकर्षहेतुताया वाङ्मत्वाद्व्याप्यवृत्तिमतमेव साधीय

Colophon. इति हरिरामकृतचित्ररूपविचारः ।

विषयः । रूपत्वजातिनिरूपणप्रसङ्गेन नवीनमतखण्डनपुरःसरं प्राचीनमताभ्यर्हितत्वकीर्त

No. 1938. ज्योत्स्ना ।

Substance, country-made paper, 11 × 4 inches. Folia, 92. Lines, 7
a page. Extent, 901 s'lokas. Character, Nágara. Date, ? Place
deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. A
pearance, fresh. Prose. Correct.

Jyotsná. A commentary on Kátyáyana's Vájasaneyí Prátiśákhy
By Rámachandra Paṇḍita, son of Siddheśvara Yogivara. The wo
was completed on the 10th of the waxing moon in the month of Áśvin
in the S'aka year 1736.

Beginning. यस्य भृङ्गावलिः कण्ठे स्नुतदानाम्बुपूरिते ।
भाति रुद्राक्षमालेव स वः पायाद्गणाधिपः ॥
श्रीरामं सद्गुरुं नत्वा याज्ञवल्क्यमुनिं तथा ।
कात्यायनकृते प्रातिशाख्ये वाजसनीयके ॥
माध्यन्दिनानुसारेण ज्योत्स्नाख्या विवृतिर्लघुः ।
क्रियते सुखबोधार्थं मन्दानां रामशर्म्मणा ॥
जपादै नाधिकारोऽस्ति सम्यक्पाठमजानतः ।
प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये ॥

स्वरसंस्कारयोश्छन्दसि नियमः । १ । प्रतिसूत्रमेतत् । स्वराणामुदात्तादीनां संस्काराणां लोपागमवर्णविकाराणाञ्च नियमो वक्ष्यमाणसूत्रैर्विहितानां नियत पठनं छन्दसि माध्यन्दिनीये स्यात् । इत्यादि ।

End. कानिचित् शाखान्तरविषयाणि नाशे च इत्यादीनि कानिचित् व्याकरणसिद्धान्यपि स्थितोपस्थितादौ विशेषप्रदर्शनार्थं लिखितानि । अच्चःपतौ रेफमित्यादीनि । अङ्गाग्निसप्तकुमिते १७३६ शकेश्वरवत्सरे इषशुक्लदशम्यां श्रीसिद्धेश्वरतनूभुवा रामेण रचिता प्रातिशाख्यज्योत्स्ना समर्पिता श्रीरामसिद्धेश्वरगुरुचरणाम्बुरुहद्वये ।

Colophon. इति श्रीमद्विद्वन्मुकुटरत्नश्रीसिद्धेश्वरयोगिवरसूनूरामचन्द्रपण्डितविरचिता ज्योत्स्नाख्या प्रातिशाख्यविवृतिः समाप्ता ।

विषयः । कात्यायनकृतवाजसनेयिप्रातिशाख्यस्य व्याख्यानं ।

No. 1939. वसन्तराजटीका ।

Substance, country-made paper, 13 × 3 inches. Folia, 220. Lines, 7 on a page. Extent, 2,082 s'lokas. Character, Nágara. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhângá, Paṇdit Bábulála Páṭhaka. Appearance, fresh. Prose. Correct.

Vasantarája-ṭiká. A commentary on the Vasantarája, a work on omens and portents. By Bhánuchandra Gaṇi.

Beginning. स्वस्ति श्रीसदनं यदीयवदनं वेधा विधायाद्भुतं
वीक्ष्याश्चर्य्यमवाप सस्पृहतया सम्मार्ज्जयन् वाससा ।
चेशुं तच्च तथाविधैरनुगुणैर्वैषम्यमापादितं
मन्ये सम्प्रति लक्ष्यते + + पथे शीतद्युतेर्मण्डलं ॥
आनम्रचिदशेन्द्रमौलिमुकुट इामरत्नांशुभि-
र्यत्पादद्वितयं विचित्ररचनाभङ्गीभिरङ्गीकृतं
दिङ्नागैश्च यदीयकीर्त्तिरतुला कर्णावतंसीकृता
स श्रीवीरविभुर्द्दधातु भवतां शश्वन्मनोवाञ्छितं ।
यस्त्रैलोक्यरमाभिरस्पृहतया सानन्दमालोकित-
स्त्रीद्भिः स्वर्गवधूकटाक्षविशिखैर्यो लक्ष्यतां नागमत् ।

स्थानैश्चात्मसमुत्थितैश्च निखिलान् मा+न् समावेदयन्
स श्रीमान् भुवनावतंसकमणिः पायादपायात् प्रभुः ।
तद्बुद्धिवैभवकृतेऽत्र वसन्तराजसच्छाकुनस्य विवृतिं प्रणयत्यभिज्ञः ।
श्रीसूरचन्द्रचरणाम्बुजचञ्चरीकः श्रीशाहिराजकृतसत्कृतिभानुचन्द्रः ॥
इह हि ग्रन्थकृन्निर्व्विघ्नसमाप्तिकामो मङ्गलमाचरेदित्यादि ।

End. वसन्तराजेति । पूर्व्वव्याख्यातविशेषणविशिष्टे वसन्तराजशाकुने ग्रन्थस्य प्रभाव
कीर्त्तनं कृतं ।

Colophon. इति श्रीशत्रुञ्जयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचन्द्रगणिविरचिताय
वसन्तराजटीकायां प्रभावकथनं नाम विंशतितमो वर्गः । श्रीरस्तु । शुभमस्तु ॥

वषयः । वसन्तराजीयशकुनशास्त्रस्य व्याख्यानं ।

No. 1940. वाक्यवादः ।

Substance, foolscap paper, 12 × 2½ inches. Folia, 5. Lines, 7 on page. Extent, 140 s'lokas. Character, Maithilí. Date, ? Place deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Bábulála Páṭhaka. Ap pearance, new. Prose. Correct.

Vákyaváda. On the Philosophy of grammar, or the relatio words and their contexts. By Achala Upádhyáya.

Beginning. अथ किमिदं वाक्यं । एकतिङ्वाक्यमिति भाष्यात् । एकतिङन्तार्थमुख्यविशेष्यक
बोधजनकपदसमूहो वाक्यमिति वैयाकरणाः । इत्यादि ।

End. परन्तु पदार्थतावच्छेदकरूपविशेषणस्य क्वचिदपि न परामर्शः ॥

Colophon. इति वाक्यवादोऽचलोपाध्यायकृतः समाप्तः ।

विषयः । वाक्यस्वरूपनिरूपणमुखेन पदानां कुत्र शक्तिरिति समासेन तन्निर्णयकथनं ।

No. 1941. पदार्थखण्डनव्याख्या ।

Substance, country-made paper, 11 × 2 inches. Folia, 57. Lines, 6 o a page. Extent, 1,779 s'lokas. Character, Nágara. Date, Sk. 1641. Plac of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Bábulála Páṭhaka another at Mágraní, Post Madhubaní, Darbháñgá, Paṇḍit Chhoṭi Jhá. Appea ance, old. Prose. Correct.

Padártha-khaṇḍana-vyákhyá. A commentary on Raghunátha S'iromaṇi's Padártha-khaṇḍana—a Nyáya treatise. By Raghudeva Nyáyálaṅkára Bhaṭṭáchárya.

Beginning. नन्दसूनुपदद्वन्द्वं निधाय हृदि चिन्तया ।
तनोति कुतुकं किञ्चिद् रघुदेवः समासतः ॥
कामहस्तधृतमस्त्रयुग्धनुः पौष्पमद्भुतमुदीक्ष्य कुप्यतः ।
धुर्ज्जटेर्नयनशो + + + + हन्तु सर्व्वजगतामुपद्रवं ॥
पदार्थतत्त्वं यदिदं शिरोमणिर्निर्णीतवान् जीर्णमतस्य दूषणे ।
तदेव तर्केण विचारयामः सदर्थकेनेतरखण्डनेन ॥
अवसरसङ्गत्या पदार्थतत्त्वं निर्वक्तुं शिष्यावधानाय प्रतिजानीते अथेत्यादि ।

End. पदार्थखण्डनाकूतपुरुहूतपुरोहितं ।
शिरोमणिमहं वन्दे शिरोमणिमिवाद्भुतं ॥
श्रीमद्दीधितिकारकल्पितघटाकोलाहलव्याकुले
मार्गे सञ्चरणाय यन्निगदितं सिद्धान्तसिद्धतरत् ।
दैवात्तेन भवेद्यदीह सहसा प्रौढापराधे मम
चन्तव्यः कृतिभिः + + यदि भवेद्यज्ञानुरूपो बलिः ।

Colophon. इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्य्यविरचिता पदार्थखण्डनव्याख्या समाप्ता ।
शाके १६४१ ।

विषयः । रघुनाथशिरोमणिकृतपदार्थखण्डनस्य व्याख्यानं ।

No. 1942. नैषधप्रकाशः ।

Substance, country-made paper, 13 × 4 inches. Folia, 225. Lines, 10 on a page. Extent, 6,890 s'lokas. Character, Maithili. Date, ? Place of deposit, Mujoná-grám, Post Tájapura, Darbháṅgá, Paṇḍit, Bábulála Páṭhaka. Appearance, old. Prose. Correct.

Naishadha-prakás'a. A commentary on the epic poem called Naishadha. By S'rínátha A'chárya, Mahámahopádhyáya.

Beginning. श्रीमन्नारायणं नत्वा काव्ये श्रीहर्षनिर्म्मिते ।
प्रकाशनं यथाप्रज्ञं श्रीनाथेन विधीयते ॥

प्रणम्य मौलिना वन्द्यान् सम्प्रदायविदः सतः।
त्याज्यं त्याज्यमसद्वाक्यं सद्ल्पमपि लिख्यते॥
ये सदर्थमजानन्तो दृथावचनविस्तरैः।
दूषयन्ति कवेः काव्यं धिक्तान् पण्डितमानिनः॥
यदित्थं करटो गत्वा सिन्धोरुपरि कायति।
तत् किं स वेत्ति गाम्भीर्य्यं रत्नानि च तदाशये॥
अथ काव्यस्य वस्तुनिर्द्देशमुखत्वं सूचयन्नलवर्णनमाह निपीयेति। इत्यादि।

End. श्रीहर्षमिति पूर्व्ववत्।

Colophon. इति महामहोपाध्यायश्रीनाथाचार्य्यविरचिते नैषधप्रकाशे सप्तमः सर्गः।

विषयः। श्रीहर्षकृतनैषधचरितमहाकाव्यस्य सप्तमसर्गान्तं व्याख्यानं।

No. 1943. रसमञ्जरीप्रकाशः।

Substance, country-made paper, 12 × 4½ inches. Folia, 25. Lines, 10 on a page. Extent, 1,092 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naḍuyár-grám, Post Madhubaní, Darbháṅgá, Paṇḍit Maṇilála Jhá. Appearance, old. Prose. Correct.

Rasamanjarí-prakás'a. A commentary on the Rasamanjarí of Bhánudatta. By Náges'a Bhaṭṭa, son of S'iva Bhaṭṭa, surnamed Kála. A work on erotics.

Beginning. यामिनीलोत्पलश्यामं वपुर्य्यस्य विभाति सः।
यामिनीदयितद्योतमानः सोऽस्तु शिवाय नः॥
नागेशभट्टनामा शिवभट्टसुधीसुतो मुदे विदुषाम्।
रसमञ्जरीप्रकाशं रचयामि मितैर्वचोभिरर्थ+नैः॥
अमाशङ्क्येति। सर्व्वत्र करणत्वेनान्वेति। आद्यपदे म्रदुतरप्रियापदकमलस्य तथाविधप्रदेशे प्रथमपातेन + + +वनतरूनां पुष्पमेव न तु फलं पुष्पाणि वा एकपुष्पावचयकृतेऽपि श्रमो मास्त्विति भावेन—इत्यादि।

End. एवञ्च स्पृहनीयदर्शनत्वं दामोदरत्वेन व्यसनशालिता, तेन दुर्ल्लभत्वं, लोचनविषयो भवतु। स्यन्दसन्दोहः प्रस्रवसारसङ्घः। तेन सुन्दरी तद्वती चासौ सुन्दरीति वा। १२७। पद्येनैकत्वमविवक्षितम्॥ १२८॥

Colophon. इति श्रीकालोपनामकशिवभट्टसुतनागेशभट्टकृतौ रसमञ्जरीप्रकाशः समाप्तः ॥
विषयः । भानुदत्तकृतरसमञ्जर्य्या व्याख्यानम् ॥

No. 1944. लिङ्गार्च्चनचन्द्रिका ।

Substance, country-made paper, 13 × 5 inches. Folia, 120. Lines, 8 on a page. Extent, 3,332 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naḍuyár-grám, Post Madhubaní, Darbháñgá, Paṇḍit Nandílála Jhá. Appearance, new. Prose and verse. Correct.

Lingárchana-chandriká. A digest of the rules for the adoration of S'iva, giving all the rituals in detail. By Sadáśiva, son of Gadádhara, and grandson of Vishṇu, of the race of Daśaputra. Compiled under the auspices of king Jayasiñha.

Beginning. उमाकटितटस्फुरत् करिवराननालोकन-
प्रसन्नहृदयं धिया सदयमिन्दुचूड़ं भजे ।
प्रणम्य गिरिजाधवं भजनमात्रदत्तेप्सितं
स्मितातननमनामयं प्रियसुमासहायं मुदा ॥
वंशेऽस्मिन् दशपुत्रनामनि महान् विष्णुर्द्विजाग्रस्त्वभूत्
सूनुस्तस्य सुधीर्गदाधर इति ख्यातो जगत्याख्यया ।
तत्पुत्रेण सदाशिवेन विदुषा दृष्ट्वा निबन्धान् पुरा
श्रीलिङ्गार्चनचन्द्रिका विरचिता विद्वच्चकोरेष्टदा ॥
विविच्य गुणगौरवं गुणविवेक+मत्सरं
विहाय कथयन्तु तद्यदिह दूषणं सज्जनाः ।
न फल्गुजनदूषणैः किमपि हीयते मामकं
दिनान्धगणगर्हणाः किमु दिनेशखेदावहाः ॥
तत्र पूज्यस्वरूपापरिज्ञाने पूजाया अफलत्वादादौ साम्बसदाशिवस्य श्रुतिस्मृत्यादौ सर्व्वोत्कृष्टत्वं सर्व्वाभीष्टप्रदत्वञ्च प्रदर्श्यते । तथा च श्रुतिः । इत्यादि ।

End. मीमांसानयमांसलातिविमला प्रज्ञा तथा भूयसी
दृष्टिः श्रौतनिबन्धचारचतुरा येषां सदाचारिणाम् ।
तेषां दृष्टिपथं प्रयातु सुहृदां सन्दर्भ एष स्थितः
किं वान्यैर्निजदोषदुष्टमतिभिः प्राज्ञेतरैः प्रार्थितैः ॥

राज्ञः श्रीजयसिंहनामन्टपतेस्तोषाय या निर्म्मिता
श्रीलिङ्गार्च्चनचन्द्रिकातिविमला विद्वच्चकोरेष्टदा।
तां पश्यन्तु परीक्षकाः सहृदया निष्पक्षपाता बुधा-
स्तेनेयं गुणवत्तरा हि भविता गौरीपतेस्तुष्टये॥

Colophon. इति पदप्रमाणज्ञेन श्रीमद्भ्रपुत्रकुलावतंसेन सदाशिवेन विरचिता लिङ्गार्च्चनचन्द्रिका समाप्ता।

विषयः। श्रुतिस्मृतिपुराणप्रमाणेन सर्व्वेभ्यो देवेभ्यः शिवस्य श्रेष्ठत्वनिरूपणं। एकत्वेऽपि देवस्य मूर्त्तिभेदेन मन्त्रव्यवस्थाकथनं। शिवं विहाय अन्यदेवभजने दोषकथनं। शिवार्चनमाहात्म्यकीर्त्तनं। लिङ्गमाहात्म्यकथनं। पद्मराग-काश्मीर-पुष्पराग-विद्रुमादिमयलिङ्गभेदेन फलभेदकथनं। पारद-वाण-हैम-शिलामयलिङ्गानां क्रमेण ब्राह्मणादीनां शुभदात्वकथनं। अधिकारिभेदात् अन्यविधलिङ्गपूजनावश्यकतानिरूपणं। कलौ पार्थिवलिङ्गस्य प्रधान्यकथनं। कामनाविशेषे लिङ्गपूजायां विशेषकथनं। नित्यं शिवपूजाया अकरणे प्रत्यवायकथनमुखेनाख्यायिकाकथनं। शिवपूजाधिकारिनिरूपणं। स्त्रीशूद्राभ्यां प्रतिष्ठितलिङ्गस्पर्शे दोषकथनं। रुद्राक्षव्यतिरेकेण शिवपूजने दोषकथनं। त्रिपुण्ड्रविधिः। भस्मधारणविधिः। भस्मभेदानां वर्णभेदेन फलविशेषकथनं। शरीरे लिङ्गाद्यङ्कनमाहात्म्यकीर्त्तनं। तप्ताङ्कधारणे दोषकथनं। नैमित्तिकादिभस्मस्नानविधिः। रुद्राक्षलक्षणादिकथनं। एकमुखादिरुद्राक्षमाहात्म्यकीर्त्तनं। शिवस्य षोडशोपचारेण पूजाविधिः। विल्वपत्रनिरूपणं। पुष्पादिदानविधिः। लक्षविल्वपत्रैः पूजनविधिः। शिवपूजनयोग्यपुष्पादिनिरूपणं। पुष्पविशेषदाने फलविशेषकथनं। लक्षपुष्पपूजाविधिः। गन्धनिरूपणं। जलनिरूपणं। नैवेद्यनिरूपणं। महानैवेद्यलक्षणकथनं। अभिषेकविधिः। दक्षिणाविधिः। नमस्कारविधिः। शिवपूजायामुद्ङ्गुखत्वमावश्यकमितिनिरूपणं। निर्म्माल्यग्रहणविधिः। प्रसादग्रहणाधिकारिनिरूपणं। लिङ्गनिर्म्माणादिविधिः। लिङ्गस्थापनविधिः। तत्र शूद्रस्य नाधिकार इति निरूपणं। प्रतिष्ठाकालादिनिरूपणं। लिङ्गप्रतिष्ठाप्रयोगकीर्त्तनं। जीर्णोद्धारविधिः। अत्र प्रयोगकथनञ्च। लक्षपार्थिवलिङ्गप्रक्रियाकथनं। काम्यपूजाविधिः। शैवव्रतविधिः। उद्यापनविधानकथनञ्च। बौधायनोक्तनित्यपूजाविधानकीर्त्तनं। स्त्रीशूद्रयोर्नाममन्त्रेण पूजाविधानं। पूजाव्यतिक्रमे प्रायश्चित्तकीर्त्तनञ्च।

No. 1945. पलपीयूषलता ।

Substance, country-made paper, 11, × 4 inches. Folia, 6. Lines, 5 on a page. Extent, 95 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naḍuyár-grám, Post Madhubani, Darbháñgá, Paṇḍit Maṇilála Jhá. Appearance, old. Prose and verse. Correct.

Pala-píyúsha-latá. A treatise on the canonical use of flesh-meat. By Madanamanohara, Mahámahopádhyáya, son of Madhusúdana, Mahámahopádhyáya, Paṇḍitarája. The work is divided into seven chapters fancifully named stavakas or "clusters of flowers." Contents: I, Propriety of offering flesh-meat to gods and the manes,—it ensures the fourfold blessing,—impropriety of guests not accepting flesh-meat. II, Patina, rohita, and other kinds of fish fit for use. III, Turtles, sheep, &c., fit for food; opinion that sheep is fit for offering to Párvatí. IV, pigeons, peacocks, wild fowl, larks, dadhigríva, partridges and other land birds fit for food. Birds unfit for food, characteristics of kids fit for use. V, Spotted deer, black antelope, solid-hoofed boar, fit for food according to some; wild boars, though not solid-hoofed, fit for use; buffaloes fit for food in Nepal. VI, Characteristics of Várdhrínasa, castrated, white, old goat, and the kinds fit for food, meat of this animal especially fit for the gratification of Vishṇu. VII, Opinion that flesh-meat was fit for food only in former ages, refuted. Days when flesh-meat should not be used, philosophy of sacrifices.

Beginning. संसारतापहतये हृदये निधाय श्रीरामचन्द्रचरणद्वयमादरेण ।
वाक्यानि सम्यगवधार्य्य मुनीश्वराणां मांसादिनिर्णयवचांसि विचारयामि ॥
येनाचारः सतामुक्तः सर्व्ववर्णाश्रमागतः ।
आद्योऽधिपः स लोकानामाज्ञा तस्याश्रितु पलम् ॥
तत्र यावन्मांसस्य दैवपित्र्यकर्म्मणि प्रतिपाद्यमानस्य पुरुषार्थचतुष्टये साधनत्वं वेदसिद्धं, पशूंश्चक्रे वायव्यानारण्या ग्राम्याश्च ये इत्यादि । तेन देवा अयजन्त इत्यन्तश्रुतेः। अग्नीषोमीयं पशुमालभेत । वायव्यं पशुमालभेत । इत्यादि ।

End. प्रवर्त्तको वापि निवर्त्तको वा जनस्य कस्याप्यहमस्मि यद्यपि ।
तथापि विद्यारसिकाः प्रयत्नमेनं समालोकयितुं यतन्ताम् ॥

Colophon. इति महामहोपाध्यायपण्डितराजमधुसूदनात्मजमहामहोपाध्यायश्रीमदनमनोहररचितायाः पलपीयषलतायाः सप्तमः स्तवकः। गौरीपतिना लिखितमिदम् ॥

विषयः। प्रथमस्तवके,—दैवपित्र्यकर्म्मणि दीयमानस्य मांसादेः पुरुषार्थचतुष्टयसाधनत्व-कथनं। श्राद्धादौ निमन्त्रितस्य मांसाद्यभोजने निन्दार्थवादकथनञ्च।

द्वितीयस्तवके,—पाठीनरोहितादिविहितमत्स्यनिरूपणं।

तृतीयस्तवके,—कूर्म्ममेषादीनां भक्ष्यत्वकथनं। मेषस्तु पार्व्वत्य इति केषाञ्चिन्मत-कीर्त्तनञ्च।

चतुर्थस्तवके,—चित्रग्रीवमयूरवनकुक्कुटादीनां स्थलचराणां पक्षिणां भक्ष्यत्व-कथनं। भारद्वाज-दधिग्रीव-चकोरादीनां स्थलचराणां भक्ष्यत्वकथनं। निषिद्ध-पक्षिनिरूपणं। विहितच्छागनिरूपणञ्च।

पञ्चमस्तवके,—चित्रमृग-कृष्णसार-एकशफवराहाणां भोज्यत्वनिरूपणं। आरण्य-वराहोऽपि भक्ष्य इति केषाञ्चिन्मतकथनञ्च। नेपालदेश एव महिषो भक्ष्यः नान्यत्रेतिनिरूपणं।

षष्ठस्तवके,—वार्ध्रीणसलक्षणकथनपूर्व्वकं तस्य भक्ष्यत्वकीर्त्तनं। अस्य विष्णुप्री-तिजनकत्वकथनञ्च।

सप्तमस्तवके,—मांसादिभक्षणविधिर्युगान्तरीय इति मतखण्डनं। मांसभक्षणादौ निषिद्धदिनकथनं। वैधहिंसाविवेचनं।

No. 1946. शान्तिरत्नम्।

Substance, country-made paper, 12 × 4 inches. Folia, 22. Lines, 6 on a page. Extent, 354 s'lokas. Character, Nágara. Date, Sm. 1915. Place of deposit, Naváni-grám, Post Mádhepurá, Darbháñgá, Paṇḍit Lála Jhá. Appearance, new. Prose and verse. Generally correct.

S'ántiratna. Rules for the reading of the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Kamalákara Bhaṭṭa, son of Rámakṛishṇa, grandson of Ráyaṇa Bhaṭṭa, great-grandson of Rámeśvara Bhaṭṭa.

Beginning. नत्वा सीतापतिं रामं भवाब्धितरणे तरिम्।
गृहस्थानां हितार्थाय शान्तिरत्नं वितन्यते॥
अथ वाराहीतन्त्रे,—चण्डीपाठे फलं देवि शृणुष्व गदतो मम।
संकल्पपूर्व्वं संपूज्य न्यस्याङ्गेषु मनून् क्रमात्॥
पठनाद्बलिदानाद्धि सिद्धिमाप्नोति साधकः। इत्यादि।

End. विशेषस्तु मत्कृतनिर्णयसिन्धौ नवरात्रनिर्णये ज्ञेयः।

श्रीमन्नारायणाख्यात् समजनि विबुधो रामकृष्णाभिधान-
स्तत्सूनुः सर्व्वविद्याजलनिधिनिचुलीकारतः कुम्भजन्मा ।
दृष्ट्वा नानानिबन्धान् व्यरचयदतुलं ग्रन्थमज्वाकराख्यः (?)
पित्रोः पादाब्जभृङ्गो रघुपतिपदयोः संश्रयं प्राप्य यत्नात् ॥
यो भाट्टतन्त्रगहनार्णवकर्णधारः शास्त्रान्तरेषु निखिलेषु च मर्म्मवेत्ता ।
यो ऽत्र श्रमोऽस्ति विहितः कमलाकरेण प्रीतोऽमुनास्तु सुकृती बुधरामकृष्णः ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारीणरामेश्वरभट्टसूनुनारायणभट्टसुतमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृतं शान्तिरत्नं समाप्तम् । शुभमस्तु । संवत् १९१५ ।

विषयः । चण्डीपाठविधिकथनं । तत्र पूजाविधिकथनं । पूजापद्धतिकथनञ्च ।

No. 1947. जयलक्ष्मीः ।

Substance, country-made paper, 15 × 5 inchess. Folia, 130. Lines, 11 on a page. Extent, 5,137 s'lokas. Character, Nágara. Date, ? Place of deposit, Naváni-grám, Post Mádhepurá, Darbháñgá, Paṇḍit Lála Jhá. Appearance, new. Prose. Slightly correct.

Jayalakshmí. A commentary on the Svarodaya—a work on divination by the voice. By Harivañsa Kavi.

Beginning. नतिं कृत्वा गणेशाय विघ्नविध्वंसहेतवे ।
निर्व्विघ्नकृतिसार्थाय कमलापतये नमः ॥
हरिवंशकविः स्वार्थं न परार्थं स्वरोदये ।
व्याख्यानं मातृकादीनां स्वराणां नामजन्मनां ॥
गुरुभ्यो बहुधा श्रुत्वा यथाज्ञानं यथाधिया ।
जयलक्ष्मीर्मया टीका राज्ञीतुल्या विरच्यते ॥
अथ कविर्वाक्स्वरूपं ब्रह्म नमस्करोति । अव्यक्तमिति । अव्यक्तं करचरणादि सितकृष्णादिरहितं । इत्यादि ।

End. फुल्लपद्मजवाजातिपुष्पाणि सितसर्षपाः ।
मध्वाज्यमिश्रितं स्नानं जीवस्य मुनिभाषितम् ॥

Colophon. इति श्रीहरिवंशकविविरचिता स्वरोदयटीका जयलक्ष्मीः समाप्ता ।

विषयः । स्वरोदयाभिधानज्योतिर्निबन्धस्य व्याख्यानम् ।

No. 1948. आह्निकसंक्षेपः ।

Substance, country-made paper, 12 × 4 inches. Folia, 10. Lines, 6 on a page. Extent, 175 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naváni-grám, Post Mádhepura, Darbháñgá, Paṇḍit, Lála Jhá. Appearance, fresh. Prose and verse. Correct.

A'hnika-sañkshepa. A summary of the rituals for daily worship according to the rules of the Yajur Veda. By Vámadeva Upádhyáya, compiled for the use of Lálá Ṭhakkura.

Beginning. आराध्य हरिपादाब्जं वामदेवेन धीमता ।
आह्निकं लिख्यते लालाठक्कुरस्य प्रमोदकं ।
ब्राह्मे मुहूर्त्ते उत्थाय नेत्रे मुखञ्च प्रक्षाल्य मधुसूदनं चिन्तयेत् । तद्यथा—
प्रातः स्मरामि भवभीतिमहार्त्तिशान्त्यै नारायणं गरुड़वाहनमब्जनाभम् ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ इत्यादि ।

End. ऋतुगमनेन च प्रीतः स्नानेन पत्नी आचमनमात्रेण शुद्ध्यति ।

Colophon. इति शत्रुमर्द्दनहरिपरायणश्रीवामदेवोपाध्यायविरचितः श्रीलालाठक्कुरप्रमोदक-आह्निकसंक्षेपः समाप्तः ॥

विषयः । यजुर्वेदिनां संक्षेपेण आह्निककृत्यनिरूपणम् ।

No. 1949. यवनजातकम् ।

Substance, country-made paper, 12 × 5 inches. Folia, 24. Lines, 8 on a page. Extent, 461 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naváni-grám, Post Mádhepura, Darbháñgá, Paṇḍit, Lála Jhá. Appearance, fresh. Verse. Correct.

Yavana-játaka. On horoscopy for women. Anonymous.

Beginning. श्रीभारतीं गणपतिं रविचन्द्रभौमसौम्येन्द्रपूज्यभृगुभास्करिराहुकेतून् ।
नत्वा जनार्द्दनपितामहशङ्करांश्च रम्यं पुरन्ध्रिजननस्य फलं करोति ॥
तथायनफलम् । ऐश्वर्य्यसन्ना + + कान्तिस्तनुः सन्तोषयुक्ता जितधीः सुवेशा ।
नारी सदाचाररता प्रसन्ना सौम्यायने चन्द्रमुखी सुशीला ॥ इत्यादि ।

End. सौभाग्ययोगे + विहाङ्गना चेत् सदा भवेत् सज्जनधर्म्मपत्नी ।
य + + योगैरथ वानुभूतैः सा राजपत्नी जनिता पुरन्ध्री ॥

Colophon. इति यवनजातके स्त्रीजातकयोगाध्यायः । शुभमस्तु ।

विषयः । स्त्रीणां जातकनिरूपणम् ।

No. 1950. साधकसर्व्वस्वम् ।

Substance, country-made paper, 12 × 5 inches. Folia, 16. Lines, 7 on a page. Extent, 249 s'lokas. Character, Nágara. Date, ? Place of deposit, Naváni-grám, Post Mádhepurá, Darbháñgá, Paṇḍit Lála Jhá. Appearance, new. Prose and verse. Incorrect.

Sádhakā-sarasva. Rituals for the worship of Vaṭukabhairava. By Pránanátha, of Málava.

Beginning. श्रीदेव्युवाच । भगवन् देवदेवेश रहस्यं वटुकस्य मे ।
ब्रूहि येन वशीकुर्य्युः साधका भैरवं शिवम् ॥
श्रीशिव उवाच । शृणु देवि परं गोप्यं कथयामि सुशोभने ।
रहस्यं सिद्धिदं साक्षाद् वटुकस्य महात्मनः ॥ इत्यादि ।

End. त्रिवारं प्रोच्चयेद्विद्वान् देवशुद्धिरितीरिता ।
पञ्चशुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत् ॥

Colophon. इति श्रीमालवीयप्राणनाथरचिते साधकसर्व्वस्वे द्वितीयः परिच्छेदः समाप्तः ।
शुभमस्तु ।

विषयः । १ मे परिच्छेदे वटुकस्य वीरसाधनविधिकथनं । तत्र प्रयोगकथनञ्च । वटुकभैरवस्य दीपविधिकथनं । मुद्राविधिकीर्त्तनं । २ ये परिच्छेदे,—आसनादिनिरूपणं । पञ्चशुद्धिविधिकीर्त्तनञ्च ।

No. 1951. कुसुमाञ्जलिप्रकाशप्रकाशिका ।

Substance, country-made paper, 12 × 4 inches. Folia, 50. Lines, 21 on a page. Extent, 5,250 s'lokas. Character, Maithilí. Date, Sk. 1715. Place of deposit, Naḍuyára-grám, Post Madhubaní, Darbháñgá, Paṇḍit Kanṭu Jhá. Appearance, fresh. Prose. Correct.

Kusumánjali-prakás'a-kás'iká. A gloss on the commentary of Vardhamána, on the Kusumánjali of Udayana. By Bhagíratha Ṭhakkura. The work of Udayana has been edited and translated into English by Dr. E. B. Cowell.

Beginning. भावयद्भक्तजनताचेतःकमलकोरकान् ।
वन्दे सन्देहतिमिरविच्छेदमिहिरं महः ॥

यः कैशोरे विश्वविख्यातकर्म्मा वर्म्माचार्य्यः श्रीमहादेवशर्म्मा ।
तत्सोदर्य्यौ वर्द्धमानस्य सूक्तौ भावं मेघः सम्यगाविष्करोति ॥
कामद इति । कामः काम्यं काम्यत इति कर्म्मव्युत्पत्त्या । अथ च कामं कन्दर्प दहन्नपि कामद इति विरोधद्योतनायापि । ज्ञानमय इत्यभिव्याप्तौ मयट यथा जलमयो देश इत्यत्र व्याप्तिश्च देशकालाभ्यां । इदञ्चेशस्य ईश्वराभिन्नत्वपक्षे । अन्यथा शिवस्य संसारित्वेनानुपपत्तेः । स्थाणुः स्थिरः । स्थाणुर्दारुविशेषो ज्ञानमय इति विरोधद्योतनायापि—इत्यादि ।

End. किञ्चित् प्रवक्तृकेति । सातस्त्वं प्रशब्दार्थ इति नाध्यापकेनार्थान्तरमिति ध्येयम् ॥
धीरा धरणिभवानी यमजनि चन्द्राद् भगीरथं तनयम् ।
तस्य कृतावेतस्यां सन्तः सन्तोषमाचरत ॥
आसीदनुपमः पृथ्व्यां महादेवः कुलाग्रणीः ।
अनुजस्तस्य कृतवान् इमां व्याख्यां भगीरथः ॥

Colophon. इति महामहोपाध्यायसद्ठक्कुरश्रीभगीरथविरचिता कुसुमाञ्जलिप्रकाशप्रकाशिका समाप्ता ।
शाके वाणधराधराधरधरासम्भासिते कार्त्तिके
मासेऽक्षीणपयोज + + विलसत्पक्षे हरेः सत्तिथौ ।
गीर्व्वाणेज्यदिने व्यलीलिखदिदं श्रीरूपनाथः सुधीः
स्वार्थं श्रीमति सर्व्वसीम्नि सुधियां मोदाय नत्वा हरिम् ॥

विषयः । वर्द्धमानेन उदयनाचार्य्यकृतकुसुमाञ्जलिप्रकरणस्य प्रकाशाभिधेया या कृता व्याख्या तस्या व्याख्यानम् ।

No. 1952. ज्ञानप्रदीपः ।

Substance, country-made yellow paper, 12 × 3½ inches. Folia, 38. Lines, 6 on a page. Extent, 555 s'lokas. Character, Nágara. Date, Sm. 1916. Place of deposit, Naváni-grám, Post Mádhepurá, Darbháñgá, Paṇḍit Lála Jhá. Appearance, new. Verse. Generally correct.

Jnána-pradipa. A set of questions and answers on the elements of astronomy and astrology. Author's name not known.

Beginning. श्रीमद्गङ्गाधरसुतं चन्द्ररेखावतं सितम् ।
सिद्धिदं सर्व्वविद्यानां वन्दे दन्तावलाननम् ।

ज्ञानप्रदीपकं नाम शास्त्रं लोकोपकारकम् ॥
प्रश्नादर्शं प्रवक्ष्यामि सर्व्वशास्त्रानुसारतः ॥
भूतभव्यवर्त्तमाने शुभाशुभनिरीक्षया ।
पञ्चप्रकारमार्गञ्च चतुष्केन्द्रबलाबलम् ॥
आरूढच्छत्रवर्गञ्च उदयादिबलाबलम् । इत्यादि ।

End. द्वितीये वा तृतीये वा शुक्रश्चेन्द्वो समागमः ।
अनेनैव क्रमेणैवं सर्व्वं वीक्ष्य वदेत् स्फुटम् ॥

Colophon. इति ज्ञानप्रदीपग्रन्थः समाप्तः ।

वषयः । (प्रश्नग्रन्थोऽयम्) तत्र ग्रहाणां मित्रनिर्णयकथनं । रिपुनिरूपणञ्च । तेषां बलाबलनिरूपणं । आरूढचक्रनिरूपणं । राशीनां छत्रनिरूपणं । स्त्रीपुरुषादिभेदकथनञ्च । प्रश्नलग्नादिनिरूपणं । ऋतुमूलादिज्ञानोपायकीर्त्तनं । जीवकाण्डकथनं । तत्र मनुष्यादिभेदज्ञानोपायकीर्त्तनं । चिन्तनविधिकथनञ्च । नष्टद्रव्यागमादिनिर्णयः । लाभालाभप्रश्नादिचिन्तनविधिः । रोगशान्त्यादिचिन्तनविधिः । स्वप्नकाण्डम् । कलहादिचिन्ता । पुत्रादिचिन्ता । शल्यादिचिन्तनं । दृष्ट्यादिचिन्तनं । सामान्यप्रश्नचिन्तनं । वाणिज्यादिचिन्तनं ।

No. 1953. शान्तिकल्पप्रदीपः, वा कृत्यपल्लवदीपिका ।

Substance, country-made paper, 9 × 3½ inches. Folia, 50. Lines, 10 on a page. Extent, 9,228 s'lokas. Character, Nágara. Date, Sm. 1851. Place of deposit, Naváni-grám, Post Mádhepura, Darbhángá, Paṇḍit Lála Jhá. Appearance, fresh. Prose and verse. Correct.

S'ántikalpa-pradípa alias *Kṛitya-pallava-dípiká.* A miscellany on expiations, magical incantations and witchcraft. By S'ríkṛishṇa Vidyávagísa Bhaṭṭáchárya. Contents, Characteristics of rites for expiations, and magical incantations. Appropriate seats for different castes when engaged in such rites; imprecations; how to overcome their malific influences; expiatory rites for curing fevers; incantations for bringing the dead to life; expiatory rites for curing colic and other diseases; incantations for attracting persons towards oneself; ditto for causing stolidity; ditto, for causing other injuries to enemies.

Beginning. कृत्यादेवीं नमस्कृत्य तथा त्रिपुरसुन्दरीम् ।
भद्रकालीञ्च देवेशीं तथा षट्कर्म्मदेवताम् ॥

श्रीकृष्णविद्यावागीशभट्टाचार्य्येण धीमता ।
क्रियते विदुषां प्रीत्यै कृत्यपल्लवदीपिका ॥
क्रोधाज्ज्वलन्तीं ज्वलनं वमन्तीं दृष्टिं दहन्तीं दितिजं ग्रसन्तीम् ।
भीमं नदन्तीं प्रणमामि कृत्यां रोरूयमाणां चुषयोग्रकालीम् ॥
उन्मत्तभैरवीतन्त्रम् फेत्कारी डामरी तथा ।
तथा च मालिनीतन्त्रं तेभ्यः कालोत्तरादपि ॥
सिद्धयोगेश्वरीतन्त्राद् योगिनीजालशम्वरात् ।
सर्व्वतन्त्रात् समाकृष्य षट्कर्म्मविधिरुच्यते ॥ इत्यादि ।

End. गवां सुवर्णनिष्काणां भूमिं वा शस्यशालिनीम् ।
सर्व्वशान्तिमवाप्नोति सर्व्वरचाकृतं भवेत् ॥

Colophon. इति श्रीकृष्णविद्यावागीशभट्टाचार्य्यकृतः शान्तिकल्पप्रदीपः समाप्तः । संवत् । १८५१ । आषाढ़ शुदि ।

विषयः । शान्ति-वश्य-स्तम्भन-विद्वेषोच्चाटन-मारणानां लक्षणकथनं । तत्र वर्णादिभेदेन आसनादिनिरूपणं । अभिचारविधिकीर्त्तनं । तदुपशमनादिविधिकथनञ्च । ज्वरशान्तिविधिः । मृतसञ्जीवणीविधानं । शूलरोगादिशान्तिविधानं । आकर्षणविधिकथनं । स्तम्भनकर्म्मविधिः । एवं विद्वेषणादीनां विधानकीर्त्तनञ्च ।

No. 1954. योगरत्नमाला वृत्तिसहिता ।

Substance, country-made paper, 11 × 4 inches. Folia, 24. Lines, 12 on a page. Extent, 705 s'lokas. Character, Nágara. Date, Sm. 1895. Place of deposit, Naḍuyár-grám, Post Madhubaní, Darbháṅgá, Paṇḍit Maṇilála Jhá. Appearance, fresh. Generally correct.

Yoga-ratnamálá alias *A'scharya-ratnamálá*. Magical rites, incantations and sorcery. By Nagárjuna A'chárya, with a commentary composed in the Samvat year 1295 = A. D. 1238, by Guṇákara, a S'vetámbara Yati. Contents: Rites and incantations for bringing persons under one's control; injuring enemies; making them absent-minded; producing images of absent persons; making pictures cry; making oneself invisible; producing amusements; stopping the burning effect of fire; making water immoveable; producing hobgoblins; causing the falling of hairs; making arms innocuous; causing vagabondism; producing eclipses; bringing on frenzy; poisoning and its antidotes; jugglery

with balls; cure of quarternary fevers; exorcising devils; overcoming malific influences of demons; planets producing extraordinary lights; magic collyrium; moonlight; curing barrenness; producing sights of tigers; causing barrenness; multiplying objects; causing stoppage of several secretions; causing colic; causing leprosy; preventing longevity in cattle; causing abortion; blowing out lamps; cure for scorpion bites; preventing clouds from raining; producing magic pictures; jugglery with conch-shells; destroying the firmness of busts; causing shrinking of particular parts of the body; causing hemorrhage; producing magic pustules; causing blindness; causing disputes; disappearing from the sight of people; causing exudations to flow from the temples of fictile elephants; bringing on flowers and fruits on trees; converting milk into butter; converting whey into curds; bringing the dead to life; producing magic lights in darkness.

Beginning. वृत्तेः,— गुरुचरणकमलममलं प्रणम्य नागार्ज्जुनप्रणीतायाः ।
विवृतिं सुखावबुद्धै्य वक्ष्येऽहं योगरत्नमालायाः ॥
इह शास्त्रारम्भे आचार्य्यनागार्ज्जुनपादाः शिष्टसमयपालनार्थं शास्त्रस्योपादेयताञ्च
दर्शयितुं गुरुपादनतिं कुर्व्वन्तः प्रथममार्य्यामाहुः । विमलेति ।
मूलस्य,—विमलमतिकिरणनिकरप्रभिन्नसच्छिष्यकमलसंघाताः ।
सकलभुवनैकदीपा जयन्ति गुरुभास्करा भुवने ॥
स्पष्टाक्षरपदसूत्रैर्गुरुमतरत्नाकरात् समुद्धृत्य ।
ग्रथिता परिस्फुरन्ती निगद्यते योगरत्नमालेयं ॥ इत्यादि ।

End. मूलस्य,— आचार्य्ययोगरत्नमाला नागार्ज्जुनविरचितानुभवसिद्धा ।
सकलजनहृदयदयिता समर्पिता सूत्रतो जयति ॥ १४० ॥

Colophon. इति श्रीनागार्ज्जुनाचार्य्यविरचिता योगरत्नमाला समाप्ता ।
वृत्तेः,— आत्मस्मरणाय मया विवृता नागार्ज्जुनप्रणीतेयं ।
आश्चर्य्यरत्नमाला अग्रेतनवृद्धटीकान्तः ॥
श्रीनृपविक्रमसमये द्वादशनवषड्ङ्किते वर्षे ।
रचिता गुणाकरेण श्वेताम्बरभिक्षुणा विवृतिः ॥
इति सिद्धघटीयश्वेताम्बरपण्डितश्रीगुणाकरविरचिता नागार्ज्जुनप्रणीतयोगरत्न-
मालावृत्तिः समाप्ता। संवत् १८९५। आश्विन सुदि ।

विषयः । वशीकरणविधिकथनं । विद्वेषणविधिः । उच्चाटनविधिः । रूपदर्शनविधिः । चित्र-
रोदनविधिः । अन्तर्द्धानविधिः । कुतूहलजननविधिः । अग्निस्तम्भनविधिः ।

जलस्तम्भनविधिः। पिशाचीकरणविधिः। लोमशातनविधिः। शस्त्रस्तम्भविधिः। देशान्तरभ्रमणविधिः। अकालग्रहणदर्शनविधिः। आवेशविधिः। विषप्रयोगविधिः। विषापहारविधिः। गुटिकासिद्धिकथनं। चातुर्थिकज्वरापहारविधिः। भूतनाशनविधिः। ग्रहमोचनविधिः। ज्योतिर्दर्शनविधिः। अञ्जनविधिः। ज्योत्स्नाविधिः। बन्ध्यापुत्रजननविधिः। व्याघ्रदर्शनविधिः। बन्ध्याकरणविधिः। वृद्धिकरणविधिः। शुक्रस्तम्भनविधिः। स्थूलकरणविधिः। कुष्ठीकरणविधिः। काकघातोद्वेगकरणविधिः। गोधनजीवनविधिः। गर्भमोचणविधिः। दीपनिर्व्वाणविधिः। वृश्चिकविषापहरणविधिः। मेघादिजलस्तम्भविधिः। पटगतचित्रदर्शनविधिः। शत्रुशुक्रत्याकर्षणविधिः। कुचनाशनविधिः। अङ्गविशेषसङ्कोचनविधिः। रक्तप्रवाहनविधिः। रात्रिमोहनधूपविधिः। अन्धीकरणविधिः। कलहकरणविधिः। अन्तर्द्धानविधिः। मन्मथगजमदविधिः। द्रुमफलपुष्पाकर्षणविधिः। दुग्धस्य घृतापादनविधिः। तक्रस्य दधिकरणविधिः। मृतसञ्जीवनविधिः। नारीपुरुषगुह्यबन्धमोचविधिः। आसनबन्धविधिः। अन्धकारे ज्योतिर्दर्शनविधिः।

No. 1955. बालविवेकिनी।

Substance, country-made paper, 12 × 8 inches. Folia, 16. Lines, 6 on a page. Extent, 360 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naḍuyára-grám, Post Madhubaní, Darbháñgá, Paṇḍit, Maṇilála Jhá. Appearance, fresh. Prose. Correct.

Bálavivekiní. A commentary on Kálidása's S'rutabodha—a manual of versification. By Táráchandra, a Káyastha.

Beginning. यत्स्मृत्यैव समस्तदुःखशमनं सम्पद्यते देहिनां
यत्पादाब्जरजोजुषो न पुनरावृत्तिं लभन्ते जनाः।
यत्कीर्त्तिर्विमलीकरोति विमला गङ्गेव लोकत्रयं
तं श्रीवल्लभमम्बुजाक्षमनघं वन्देऽनवद्यं गुरुम्॥
ताराचन्द्राभिधेयेन बालव्युत्पत्तिहेतवे।
क्रियते श्रुतबोधस्य टीका बालविवेकिनी॥
छन्दोज्ञानं कथं मे स्यादिति कयातिप्रियतमया परिपृष्टस्य कालिदासस्य श्रुतच्छन्दोग्रन्थोक्तौ प्रवृत्तिस्तामेवाह छन्दसामिति। त्वां प्रत्यग्रे वक्ष्यमाणानां काव्यादिषु लोकप्रसिद्धानामार्य्यादीनां छन्दसां लक्षणमहं संप्रवक्ष्यामीत्यन्वयः। इत्यादि।

End. व्याख्याने श्रुतबोधस्य गणवर्णविवेचनम्।
मत्कृतं तेन मे कृष्णः परमात्मा प्रसीदतु ॥

Colophon. इति कायस्थकुलालङ्कारताराचन्द्रकृता श्रुतबोधटीका बालविवेकिनी समाप्ता।

विषयः। कालिदासकृतश्रुतबोधाभिधानच्छन्दोग्रन्थस्य व्याख्यानम्।

No. 1956. आचारादर्शः।

Substance, palm-leaf, 13 × 2⅓ inches. Folia, 109. Lines, 5 on a page. Extent, 2,430 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháñgá, Paṇḍit Bábu Jhá; another copy at Magrání-grám, Post Madhubaní, Zillah Darbháñgá, Paṇḍit Chhoṭi Jhá; another copy at Benares, Bábu Haris'chandra. Appearance, old. Prose and verse. Correct.

A'chárádars'a. A digest of daily religious and *quasi* religious duties. *A'chára.* By S'rídatta, Mahámahopáddhyáya. It includes all the leading topics of A'chára. A commentary on this work had been noticed under No. 1914 (*ante*, p. 233).

Beginning. दीक्षितो रणयज्ञेषु विबुधानन्ददायिषु।
हरिरब्धिसुतावक्त्र सोमपीती पुनातु वः॥
अहोरात्राश्रितो धर्म्म इह वाजसनेयिनां।
निबध्यते निबन्धो यो धर्म्मशास्त्रनिबन्धृभिः॥
तत्र मनुः। ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत्। इत्यादि।

End. समूलवचनाभोगो मीमांसान्यायनिर्म्मलः।
श्रीदत्तेन सतामेष आचारे दर्पणः कृतः॥
दुरुक्तमपि सूक्तं मे मन्वादिवचनाश्रितं।
अपि चर्म्मोदकं तीर्थसलिलान्तर्गतं शुचि॥

Colophon. इति श्रीमहामहोपाध्यायश्रीदत्तकृत आचारादर्शः समाप्तः।

विषयः। प्रातःकृत्यनिरूपणं। तत्र मूत्रपुरीषोत्सर्गविधिकथनं। शौचविधिकथनं। आचमनविधिकथनं। आचमननिमित्तकथनं। द्विराचमननिमित्तकथनं। आचमनानुकल्पविधिकथनं। आचमनापवादकथनं। दन्तधावनविधिकथनं। प्रातःस्नानादिविधिकथनं। अचिरोदितसूर्य्यदर्शनमाहात्म्यादिकथनं। केशप्रसाधनादिविधिकथनं। शुभाशुभदर्शनफलकीर्त्तनं। वामनब्राह्मणादिदर्शने नमस्कारकर्त्त-

श्वताकथनं। वेदपाटादिविधिकथनं। विशेषेण स्नानविधिकथनं। सरोवरादौ स्नाने फलविशेषकथनं। नदीलक्षणादिकथनं। नैमित्तिकस्नानविधिकथनं। अस्पृश्यस्पर्शने स्नानविधानं। काम्यस्नानविधिः। कात्यायनोक्तस्नानप्रयोगकथनं। सन्ध्योपासनविधिकथनं। जपादिविधिकथनं। कुशनिरूपणं। तदाहरणकालादिनिर्णयस्य। उपवीतादिविधिकथनं। तर्पणविधिकथनं। जीवत्पितृकेनापि यमतर्पणपर्य्यन्तं कर्त्तव्यमितिनिरूपणं। देवतर्पणादिविधिकथनं। कात्यायनोक्ततर्पणप्रयोगकथनं। तर्पणोत्तरकर्म्मनिरूपणं। पूजादिप्रकारकथनं। देवपूजायां पूजाधारादिनिरूपणं। पुष्पधूपादिनिरूपणं। वैश्वदेवबलिकर्म्मविधिकथनं। पञ्चयज्ञविधिकथनं। नित्यश्राद्धविधिकथनं। तत्प्रयोगकथनञ्च। भिक्षादानादिविधिकथनं। अतिथिपूजादिविधिकथनं। भोजनविधिकथनं। पङ्क्तिभोजनविधिकथनं। भोजनोत्तरकर्म्मनिरूपणं। शयनविधिकथनं। दारोपगमनविधिकथनञ्च।

No. 1957. शारीरकमीमांसान्यायसंग्रहः।

Substance, country-made paper, 12 × 4 inches. Folia, 5. Lines, 6 on a page. Extent, 1,139 s'lokas. Character, Nágara. Date, ? Place of deposit, Pilkhoryáḍ-grám, Post Madhubaní, Darbháṅgá, Paṇḍit, Bábu Jhánjhá. Appearance, old. Prose, Correct.

S'áríraka-mímáñsá-nyáya-saṅgraha. An epitome of the Vedánta doctrine, explaining briefly the leading topics of the different Adhikaraṇas, and supplying all the *pros* and *cons*. By Prakásátma Yati.

Beginning. अथातो ब्रह्मजिज्ञासा। प्रणम्य प्रणतार्त्तीनां हन्तारं विष्णुमव्ययं।
शारीरकस्य संक्षेपात् क्रियते न्यायसङ्ग्रहः॥
अत्र विधिः खलु सर्व्वत्र विशिष्टाकार्य्यन्यतोऽप्राप्तविषयतत्साध्यफलानुबन्धत्रयमपेक्ष्य प्रवृत्तिपर्य्यन्तो भवति। इत्यादि।

End. तस्मात् कार्य्यब्रह्मप्राप्तिः सगुणविद्याविषयिकेयमिति सिद्धं॥

Colophon. इति श्रीभगवत्प्रकाशात्मविरचिते शारीरकमीमांसान्यायसङ्ग्रहे चतुर्थाध्यायस्य। चतुर्थः पादः। समाप्तोऽयं ग्रन्थः॥

विषयः। ब्रह्मसूत्रशङ्करभाष्यीयपूर्व्वपक्षोत्तरपक्षाधिकरणप्रतिपादितासनेकसूत्राणां मध्ये तत्तदधिकरणप्रथमसूत्रपरिग्रहपूर्व्वकं संक्षेपेण समग्राधिकरणार्थनिरूपणं।

No. 1958. द्वैतनिर्णयप्रकाशः ।

Substance, palm-leaf, 12 × 2 inches. Folia, 107. Lines, 5 on a page. Extent, 2,153 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháñgá, Paṇḍit Bábu Jháṉjhá. Appearance, old. Prose and verse. Correct.

Dvaitanirṇaya-prakás'a. A commentary on Váchaspati Mis'ra's work on duality, named Dvaitanirṇaya. By Madhusúdana Miśra, Mahámahopádhyáya.

Beginning. चलानप्यचलीकुर्व्वन्नचलानपि चालयन् ।
वृन्दावनविहारी स्तात् तापहारी हरिर्मम ॥
इति पादस्य रसेनेति । शब्दानामौत्सर्गिकपरत्वमित्यादिपदसमभिव्याहारेण उपोद्घाते गौरित्यादौ स्वरूपपरत्वस्य निरूढ़त्वादिति भावः । इत्यादि ।

End. उपनयनकालनिर्णयः स्मार्त्तत्राणे,—दृष्ट्या तदुत्तरेतिरत्नाकरलिखनान्न वृष्टिदिनं निषिद्धमिति गम्यते ॥

Colophon. इति महामहोपाध्यायश्रीमधुसूदनमिश्रकृतौ द्वैतनिर्णयप्रकाशः समाप्तः ।

विषयः । वाचस्पतिमिश्रकृतद्वैतनिर्णयस्य व्याख्यान, तदनुक्तांशनिरूपणञ्च ।

No. 1959. मीमांसापल्वलं ।

Substance, country-made paper, 11 × 4 inches. Folia, 65. Lines, 7 on a page. Extent, 1,680 s'lokas. Character, Maithilí. Date, Sk. 1667. Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháñgá, Paṇḍit Bábu Jháṉjhá. Appearance, old. Prose. Correct.

Mímáñsá-palvala. A dissertation on the philosophy of religious rites. By Indrapati, Mahámahopádhyáya.

Beginning. जित्वा शङ्खसुरद्विषं हृतवते वेदान् निमग्नां धरा-
मुद्धर्त्तुं कमठाकृतिं कृतवते कोलाकृतिं कुर्व्वते ।
देवारातिहिरण्यदैत्यदलने सैंहीं तनुं बिभ्रते
विद्वद्भार्गववाङ्कजाकृतिकृते तुभ्यं नमः श्रीपते ॥
सिद्धान्तसन्तानमधीत्य जैमिनेर्गोपालभट्टस्य गुरोः सकाशात् ।
संक्षेपतस्वालनमात्रमर्षां नत्वा शिवामिन्द्रपतिः करोति ॥

यं लेभे रुक्मिणी देवी स्वरेरुचिपतेः सुतं।
स तनोति शिवं नत्वा मीमांसारसपल्लवं॥
अविवेको मिथिलायां शिशुरेको धीरमर्थयति।
बालकखेलनहेलनबुद्ध्या कोपो मयि त्याज्यः॥
इह खलु त्रिविधा विधयो भवन्तीति। इत्यादि।

End. तथा च तत्र रागप्राप्तनिषेधवत् भ्रान्तिप्राप्तस्य बाधमङ्गीकृत्य न विकल्प इति।

Colophon. इति महोपाध्यायश्रीमदिन्द्रपतिकृतं मीमांसापल्लवं समाप्तं। शाके १६६७।

विषयः। विधिस्वरूपविवेचनं। श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां स्वरूपादिनिरूपणं। मन्त्राणामर्थप्रकाशकत्वं शक्त्यैव न तु लक्षणयेतिनिरूपणं। स्तोत्राणामदृष्टार्थकत्वनिरूपणं। ऊहविवेचनं। आवाहनमन्त्रादावनूहकथनं। व्रत-श्राद्ध-याग-इष्टि-दान-स्नान-पूजादीनां प्रकृतिकथनं। एकादशीप्रसङ्गेन काम्योपवासक्रमकीर्त्तनं। अधिकाराकाङ्क्षाभेदेन द्विविधप्रकरणनिरूपणं। पार्व्वणश्राद्धप्रकृतिविवेचनं। द्रव्यगुणादीनां विरोधे द्रव्यादीनामुपादेयत्वनिरूपणं। सोमयागप्रकृतिविवेचनं। हविोत्सर्गेतिकर्त्तव्यताचिन्तनं। निषेधनिरूपणं। परिसंख्यानिरूपणं। प्रधानस्य विकल्पनिरूपणं। तस्य अनुकल्पचिन्तनञ्च। प्रधानाङ्गयोः सङ्कोचेन विरोधपरीहारसम्भवे अङ्गसङ्कोचस्यैव उचितत्वकथनं। उद्देश्यविधेयतादिविवेचनं। श्रुतिलिङ्गादीनां बलाबलनिरूपणं। अतिदेशनिरूपणञ्च।

No. 1960. दिव्यदीपिका।

Substance, country-made paper, 14 × 4 inches. Folia, 20. Lines, 6 on a page. Extent, 600 s'lokas. Character, Maithilí. Date, Sk. 1694. Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháñgá, Paṇḍit Bábu Jhánjhá. Appearance, old. Prose and verse. Correct.

Divya-dípiká. A digest of the laws regarding oaths, affirmations, and ordeals. By Dámodara Ṭhakkura. The work was compiled under the auspices of Muhammad Shah.

Beginning. श्रीमन्महम्मदभूपाललब्धमानेन सर्व्वदा।
दामोदरेण क्रियते दिव्यानामत्र निर्णयः॥
तत्र याज्ञवल्क्यः। तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। इत्यादि।

End. नाश्यमाह चतुर्दशां प्रायश्चित्तपरीक्षणम्।

न परीक्षाऽधिमासे च शनिभौमदिने भवेत् ॥

Colophon. इति दामोदरठक्कुरकृता दिव्यदीपिका सम्पूर्णा । शाके १६९४ ।

विषयः। साहसाभियोगे, धनाभियोगे, पातकाभियोगे च दिव्यविधानकीर्त्तनं। शीर्षकावष्टम्भादीनां लक्षणादिकथनं। तत्र महाभियोगे शुद्धिदानेच्छायां शिरोवादं विनापि दिव्यकरणावश्यकताकथनं। अपराधविशेषे तण्डुलकोषादिप्रयोगविधिकीर्त्तनं। सर्व्वदिव्यसाधारणेतिकर्त्तव्यताकथनं। वर्णविशेषेण परीक्षाविशेषविधिकथनं। तुलादौ प्रत्येकमितिकर्त्तव्यतानिरूपणं। वर्णविशेषेण परीक्षास्थानादिनिरूपणं। परीक्षाविषये प्राड्विवाककृत्यकथनं। अनल-विष-कोश-तण्डुल-तप्तमाषादिना परीक्षाप्रकारकथनं। धर्म्माधर्म्मपरीक्षाविधिकथनं। फालविधिकथनं। विविधशपथविधिकथनं। परीक्षादिकालनिरूपणञ्च।

No. 1961. पदार्थधर्म्मसङ्ग्रहः।

Substance, country-made paper, 12 × 4 inches. Folia, 40. Lines, 7 on a page. Extent, 949 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháṅgá, Paṇḍit Bábu Jhánjhá. Appearance, new. Prose. Correct.

Padártha-dharma-saṅgraha: An elementary exposition of the categories of the Vaiśeshika doctrine. By Prasastapáda. This work is distinct from the author's commentary on the Vaiśeshika Aphorisms which is popularly called *Prasastapáda-bháshya*, or *Dravya-bháshya.*

Beginning. प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः।

पदार्थधर्म्मसङ्ग्रहः प्रवक्ष्यते महोदयः॥

द्रव्यगुणकर्म्मसामान्यविशेषसमावायानां षण्णां पदार्थानां साधर्म्म्यवैधर्म्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः। तच्चेश्वरचोदनाभिव्यक्ताद्धर्म्मादेव। अथ के द्रव्यादयः पदार्थाः किञ्च तेषां साधर्म्म्यवैधर्म्म्यञ्चेति। इत्यादि।

End. तस्माच्चात्मवृत्तिरत एव चातीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात् स्वात्मगतसम्वेदनाभावाच्च तस्मादिह बुद्ध्यनुमेयः समवाय इति सिद्धम्।

Colophon. समाप्तश्च प्रबन्धाख्यं प्रकरणं कृतिरियं प्रशस्तपादपादानाम्॥

विषयः। वैशेषिकसूत्रमवलम्ब्य द्रव्यगुणकर्म्मादीनां लक्षणकथनं। साधर्म्म्यवैधर्म्म्यादिनिरूपनञ्च।

No. 1962. पदार्थीयदिव्यचक्षुः ।

Substance, country-made yellow paper, 12 × 4 inches. Folia, 48. Lines, 8 on a page. Extent, 1,016 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháñgá, Paṇḍit Bábu Jhánjhá. Appearance, new. Prose. Correct.

Padárthíya-divya-chakshu. An elementary exposition of the categories of the Nyáya Philosophy. By Umápati Upádhyáya, son of Ratnapati Upadhyáya.

Beginning. रत्नावतीरत्नपत्योः पित्रोः पूर्व्वतपोबलात् ।
आतनोमि पदार्थीयदिव्यचक्षुरुमापतिः ॥
द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावाः पदार्थाः सप्त । पृथिव्यप्तेजोवाय्वाकाश-
कालदिगात्ममनांसि द्रव्याणि नव । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग-
विभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मा
गुणाश्चतुर्विंशतिः । इत्यादि ।

End. विभागनाशकतायाश्च विनिगमकस्य असम्भवेन सर्व्वैजात्यनानात्वेऽत्यन्तगौरवा-
दितिसंक्षेपः । इति द्रव्यनाशदर्शनं ।

Colophon. इति वेदवेदाङ्गपारगश्रीरत्नपत्युपाध्यायात्मजश्रीमदुमापति-उपाध्यायविरचितं
पदार्थीयदिव्यचक्षुः सम्पूर्णं ।

विषयः । द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावरूपसप्तपदार्थनिरूपणं । एतन्न्यूनाधिकत्व-
शङ्कानिरसनञ्च ।

No. 1963. द्रव्यकिरणावलीप्रकाशः ।

Substance, palm-leaf, 11 × 2 inches, Folia, 99. Lines, 6 on a page. Extent, 3,359 s'lokas. Character, Maithilí. Date, L. S. 421. Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháñgá, Paṇḍit Bábu Jhánjhá. Appearance, old, decayed. Prose. Correct.

Dravya-kiraṇávalí-prakáśa. A commentary on Udayana Áchárya's Dravya-kiraṇávalí—a treatise on the Nyáya doctrine. By Vardhamána, Mahámahopádhyáya, son of Gañgeśvara.

Beginning. मिलन्मन्दाकिनीमञ्जीदामां मूर्ध्नि पुरद्विषः ।
विश्ववीजाङ्कुरप्रख्यां वैधवीं तां कलां नमः ॥
कर्त्तव्यविघ्नविघातकं रविनमस्कारं निबध्नाति । विद्येति । यद्दितिसामान्यतोऽपि कर्तृनिर्द्देशे विद्याऽविद्ययोः सन्ध्यारजनीभ्यां रूपणा + + + ता लभ्यते । विद्येव या पूर्व्वसन्ध्या तदुदयोद्रेकादविद्येव या रजनी तत्त्चये सति यदुदेति उदयगिरिशिखरमधिरोहति। सन्ध्या च रात्रेर्न भागविशेषः । निरस्तैतद्द्वीपवर्त्तिरविरश्मिजालस्य कालविशेषस्य रात्रित्वात् सन्ध्यायास्त्वत्र द्वीपे कतिपयतत्सत्त्वात् । अत एव रात्रिसन्ध्ययोः धर्मशास्त्रे पृथगभिधानं । इत्यादि ।

End. यस्तर्कतन्त्रशतपत्रसहस्ररश्मिर्गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्यात्मजोऽतिगहनां किरणावलीं तां प्राकाशयत् कृतिमुदे बुधवर्द्धमानः ॥

